BIBLIOTHECA INDICA:
A
Collection Of Oriental Works

PUBLISHED BY
THE ASIATIC SOCIETY OF BENGAL.
New Series, Nos. 895, 898, 903, 926, 930, 1145, 1146 & 1147.

—•—

THE AITAREYA BRAHMANA
OF THE RIG-VEDA,

WITH THE
COMMENTARY OF SAYANA ACHARYA.

EDITED BY

ACARYA SATYAVRATA SAMASRAMI,
Associate Member of the Asiatic Society of Bengal; Editor,
Author, Commentator, Annotator, Compiler, Translator,
& Publisher of different Vedic Works &c. &c.

VOL. IV.

CALCUTTA:
Printed by H. V. Chatterji, Satya Press.
1906.

S
294.59212
B813a.s

81.20.074134

5881

॥ ऐतरेयब्राह्मणम् ॥

(ऋग्वेदस्य)

भगवत्सायणाचार्यकृत-'वेदार्थप्रकाश'-नामभाष्ययुतम् ।

वङ्गदेशीयास्यायितिकसमितेरनुमत्या व्ययेन च,

सामश्रमिश्रीसत्यव्रतशर्म्मणा

यथामति संशोध्य सटीक्य च सम्पादितम् ।

॥ चतुर्थभागः ॥

(सप्तमाष्टमपञ्चिकात्मकः)

कलिकाता-राजन्वत्याम्
१९६२-संवत्सरायां सत्ययन्त्रेण यत्नतो मुद्रितम् ॥

॥ अथैतरेयालोचनविषयसूची ॥

विषयः पृ०

अथ किमिदमैतरेयनाम ? ... १
आम्नायशब्दनिरुक्तिः ... १
आम्नायग्रन्थानां वेदभाष्यत्वम् २
देवताविधानदृष्टान्तः ... ३
मन्त्रविधानदृष्टान्तः ... ४
आम्नायकृतं मन्त्रव्याख्यानम् ... ५
आख्यायिकातो विज्ञानलाभः ७
सूक्तविधानदृष्टान्तः ८
अर्थवाददृष्टान्तस्यानृतत्वम् ... १०

अथ कोऽस्य प्रवक्ता ? ... ११
महिदासस्य दासीपुत्रत्वम् ? १२
असवर्णविवाहव्यवस्था ... १३
दासीपुत्रस्य मन्त्रद्रष्टृत्वमपि १४
आर्यानार्यपरिचयः ... १५
जातिपरिवर्त्तनस्वीकारः ... १५
वेदाधिकारिनिरूपणम् ... १६
यूरोपीयानामार्यानार्यत्वाभावः १७
मनुष्याणामायुःकालनिर्णयः १८
ऐतरेयारण्यकविचारः ... १९

अथ कुत्रत्यः सः ? २०
आर्यशब्दार्थनिश्चयः ... २१
आर्यावर्त्तशब्दनिरुक्तिः ... २२

विषयः पृ०

प्रथम आर्यावासः २३
द्वितीय आर्यावासः २४
तृतीय आर्यावासः २५
प्राचीनार्यावर्त्तनिरूपणम् ... २६
तत्र पूर्वसमुद्रप्रदेशः ... २७
—पश्चिमसमुद्रप्रदेशः ... २८
—उत्तरसमुद्रप्रदेशः ... २९
हिन्दुस्तानशब्दार्थनिर्णयः ... ३०
प्राचीनार्यावर्त्तोत्तरसीमा ... ३१
प्राचीनार्यावर्त्तपश्चिमसीमा ३२
आर्यानार्यभूमिनिर्णयः ३३--३७
संहिताकालिकार्यावर्त्तः ... ३८
आर्यसाम्राज्यपरिचयः ... ३८
उत्तरमद्रोत्तरकुरुप्रदेशाना
मार्यसाम्राज्यभिन्नराज्यत्वम् ... ४१
ऐतरेयकालिकमध्यदेशः ... ४२
ऐतरेयकालिकार्यावर्त्तः ... ४३
शतपथकालिकार्यावर्त्तः ... ४३
पाणिनिकालिकार्यावर्त्तः ... ४४
यास्ककालिकार्यावर्त्तः ... ४४
पतञ्जलिकालिकार्यावर्त्तः ... ४५
मनुकालिकार्यावर्त्तः ... ४६
कलिङ्गराज्यस्य परिचयः,
निन्दा, औचित्यापत्तिश्च ४७

विषयः पृ०
अमरसिंहकालिकार्यावर्त्तः ... ४८
यूरोपीयमतानुगतार्यावासस्वीकारे दोषत्रयाणामुल्लेखः ... ४८
यूरोपीयमतपोषकाण्यष्टप्रमाणानि, तत्खण्डनानि च ४८--५५
बालगङ्गाधरमतखण्डनम् ५५--७०
आर्यप्रत्नौकोनिर्णयः ७०
ऐतरेयवासस्थाननिरूपणम् ... ७१

अथ कः कालोऽस्यैतरेयस्य ? ७२
ऐतरेयस्य पाणिनिपूर्वजत्वम् ७३
—— आश्वलायनपूर्वजत्वम् ७३
—— जनमेजयपूर्वजत्वम् ७४
—— शाकलशाखानां प्रवक्तुः शाकल्याच्च पूर्वजत्वम् ... ७५
पदसंहिताप्रवक्तुः शाकल्यात्तस्यैतरेयस्य परजत्वम् ... ७६

अथैतरेयकालिकाचाराः ... ७६
जातिपदार्थनिरूपणम् ... ७७
ब्राह्मणादिस्वभावादिवर्णनम् ७८
ब्राह्मणादीनां भक्ष्यनिर्णयः ... ८०
ब्राह्मणक्षत्रिययोरायुधानि ... ८०
आर्यानार्ययोः साम्यभावः ... ८१
वाग्विषयकोपदेशाः ... ८३
विवाहस्य कर्त्तव्यतोपदेशः ... ८३
क्षत्रियाणामन्यजातिभावनिन्दा ८३

विषयः पृ०
पुंसां बहुविवाहे दोषाभावः ८३
मृतपतिकाया एव पुनर्विवाहे दोषाभावकथनम् ... ८४
स्त्रीणामपि पाण्डित्यम् ... ८४
कुलवधूनां लज्जाशीलता ... ८४
पत्नीभगिन्योः पत्न्याः प्राधान्यम् ८४
अग्निहोत्रस्यातिकर्त्तव्यता ... ८५
स्नातस्यैव दैवकार्यविधिः ... ८६
भुक्तस्यापि दैवकार्यविधिः ... ८६
पशुशरीरदाहविधानम् ... ८६
देवपितृमनुष्यपूजाविधिः ... ८६
देवनिरूपणम् ८७
पितृनिरूपणम् ८७
जीवानां जन्मत्रयवर्णनम् ... ८८
मनुष्यनिरूपणम् ... ९१
अतिथिसत्कारे विशेषोपदेशः ९२
पशुहिंसा विहिता न वा ? ९३
पिपासते पानीयदानादिविधिः ९४
आर्त्विज्यकर्मणः प्राशस्त्यम् ९४
अयाज्ययाजननिषेधः ... ९५

अथैरेयकालिकव्यवहाराः ... ९६
पुरोहितस्यावश्यकता ... ९६
दक्षिणादानस्यातिकर्त्तव्यता ... ९७
वदान्यतायाः प्रशंसा ... ९८
पुंसोऽपि क्रयविक्रयातिसर्गाः ९९
पुत्रे पितुर्यथेच्छव्यवहारः ... ९९

विषयः पृ०

पुत्राणां पितृलावण्याक्रमम् ... ९९
धार्मिकाणामर्थसमृद्धता ... ९९
वस्तूनामप्यस्तिता ... ९९
अस्थिच्छेदकानामप्यस्तिता ९९
चौरस्यास्तिता तन्निन्दा च १००
शपथव्यवहारः ... १००
सार्वभौमराजास्तिता ... १००
राजप्रियायैप्रजानामावेदनम् १००
राजभ्रातॄणां राजानुगत्वम् १०१
राजधानीपरिरक्षणम् ... १०१
ऐकमत्याय शपथव्यवहारः १०१
स्वार्थमवेतनिकानामपि
प्रजानां स्वतः प्रवृत्तिः १०१
कामतोऽपि शत्रुवशीकरणम् १०१
सेनानियोगप्रकारवर्णनम् १०२
सर्पविमोकव्यवहारः १०२
सर्पिश्च्यतेजनीवीवधव्यवहारः १०२
अनलस्य प्रशंसा, अनलस्य निन्दा च १०३
कल्यादिचतुर्युगलक्षणम् ... १०३
धर्माणां सर्वेषु सद्भावः १०५
युगधर्माणां सर्वयुगाश्रितत्वम् १०५

अथैतरेयकालिकविज्ञानानि १०५
पृथिव्या गतिहेतुः, द्यावा-
पृथिव्योः सम्बन्धः, शाश्वहेतुः,
उत्थानामनिशासद्भा-
भावहेतुश्च ... १०५—१०७

विषयः पृ०

पृथिव्या भ्रमणम्, सूर्यस्य
उदयास्तमयाभावः, अहो-
रात्रनिर्वृत्तिहेतुश्च ... १०७
सूर्यविज्ञानम् ... १०८
चन्द्रविज्ञानम् ... ११०
वायुविज्ञानम् ... १११
अग्निविज्ञानम् ... १११
अब्विज्ञानम् ... १११
पाश्चात्यानुसरणस्य कर्त्तव्यता ११२
विद्युद्विज्ञानम् ... ११२
गर्भादिविज्ञानम् ... ११३
शारीरादिविज्ञानम् ... ११४
खाद्यविज्ञानम् ... ११५
भेषजविज्ञानम् ... ११५
कालविज्ञानम् ... ११६
दिग्विज्ञानम् ... ११६
देशाकृतिविज्ञानम् ... ११७
शिल्पविज्ञानम् ... ११७
शब्दार्थविज्ञानम् ... ११७

अथ कस्याः शाखाया इदम्? ११८
विष्णुपुराणीयशाखाकथा ११९
भागवतीयशाखाकथा ... १२०
कूर्म्मपुराणीयशाखाकथा १२१
पौराणिकशाखामतखण्डनम् १२१
शाखाशब्दार्थनिरूपणम् ... १२३
स्वामिदयानन्दीयशाखाकथा १२५

विषयः पृ०
पञ्चशाखः नामाऽऽगमः ... १२७
चरणव्यूहोक्तपञ्चशाखाः ... १२९
देवीपुराणीयशाखाचयम् १३०
अग्निपुराणोक्तशाखाद्वयम् १३१
मण्डूकान्येव स्यात् शाङ्खायनी १३२
साङ्ख्या-शाङ्खायन्यौ विभिन्ने १३२
दृष्टदेवताया अशाकलीयत्वम् १३२
बाष्कलशाङ्खायन्योर्भेदः ... १३३
अथ शैशिरीयापरिचयः ... १३४
वालखिल्यसूक्तानां परिचयः १३५
अथ बाष्कलापरिचयः ... १३६
संज्ञानसूक्तीयर्चः पञ्चदश १३७
शाखा (मौद्गली) वात्स्या च १३८
अथाश्वलायनीपरिचयः ... १३९
आश्वलायन्या अध्ययनशीलत्वम् १४०
शाकलपरिच्छेदसङ्ख्यादि ... १४१
आश्वलायनसूक्तसङ्ख्यादि ... १४२
शाखासु मन्त्रविधानशैली १४३
ऐतरेयावलम्बितशाखा ... १४५

अथ कोऽस्य विषयः ? ... १४६
प्रकृतिविकृतियागनिर्णयः १४८
यागदेवतानिरूपणम् ... १४८
सोमपदेवपरिचयः ... १५१
[illegible]दित्याप्रतिवषट्कार-
स्वरूपनिर्णयः ... १५२–१५७

विषयः पृ०
असोमपदेवपरिचयः ... १५८
अग्निनिरूपणम् ... १६२
इन्द्रनिरूपणम् ... १६४
सूर्यनिरूपणम् ... १६६
देवतानां कश्यपादित्वेन
पौराणिकमतनिरासः ... १६८
पौराणिकवृत्रवधोपाख्यानम् १७०
इन्द्रवृत्रनिरूपणम् १७१, १७२
अमरसिंहस्य दोषोदाहरणम् १७४
आख्यायिकानां गतिः ... १७७
चत्वारो देवगुणाः १८०
अधियज्ञादिव्याख्याने विषयाः १८१
सायणयास्काभिमतप्रदर्शनम् १८२–१८७
यज्ञानां परिचयः ... १८८

अथ किम् प्रयोजनमेतस्य ? २००
द्वैतमतनिरासः ... २००
स्वर्गलोकनिर्णयारम्भः ... २०१
पितृलोकादिनिर्णयः ... २०३
भूलोकस्य चित्रं पदत्वञ्च २१०
सूर्यलोक एव मुख्यः स्वर्गः २१६
यमयमीनिर्णयः ... २१८
नाकनरकनिरुक्तिः ... २२०
त्रिविधस्वर्गस्वीकारः २२१
स्वर्गस्य दुरारोहणम् ... २२२
उपसंहारः ... २२२–२२४

अथ

॥ ऐतरेयब्राह्मणम् ॥

॥ अथ सप्तमपञ्चिका ॥

(३१)

॥ [illegible]: प्रथमाध्यायः ॥

॥ ॐ ॥ अथातः पशोर्विभक्तिस्तस्य विभागं वक्ष्यामो हनू सजिह्वे प्रस्तोतुः श्येनं वक्ष उद्गातुः कण्ठः काकुदः प्रतिहर्तुर्दक्षिणा श्रोणिर्होतुः सव्या ब्रह्मणो दक्षिणं सक्थि मैत्रावरुणस्य सव्यं ब्राह्मणाच्छंसिनो दक्षिणं पार्श्वं सांसमध्वर्योः सव्यमुपगातॄणां सव्योंसः प्रतिप्रस्थातुर्दक्षिणं दोर्नेष्टुः सव्यं पोतुर्दक्षिण * ऊरुरच्छावाकस्य सव्य आग्नीध्रस्य दक्षिणो बाहुरात्रेयस्य सव्यः सदस्यस्य सदञ्चानूकञ्च गृहपतेर्दक्षिणौ पादौ गृहपतेर्व्रतप्रदस्य सव्यौ पादौ गृहपतेर्भार्यायै व्रतप्रदस्यौष्ठ एनयोः साधारणो भवति तं गृहपतिरेव प्रशिंष्याज्जाघनीं पत्नीभ्यो हरन्ति तां ब्राह्मणाय दद्युः स्कन्ध्याश्च मणिकास्तिस्रश्च कीकसा ग्रावस्तुतस्तिस्रश्चैव

---

* "दक्षिणा" ग, घ।

कीकसा अर्द्धञ्च वैकर्त्तस्योन्नेतु रशनैव वैकर्त्तश्च क्लोमा च शमितुस्तद् ब्राह्मणाय दद्याद्यब्राह्मणः * स्याच्छिरः सुब्रह्मण्यायै यः श्वस्सुत्यां प्राह तस्याजिन मिळा सर्वेषां होतुर्वा ता वा एताः षट्त्रिंशत मेकपदा यज्ञं वहन्ति षट्त्रिंशदक्षरा वै बृहती बार्हताः स्वर्गा लोकाः प्राणांश्चैव तत् स्वर्गांश्च लोकानाप्नुवन्ति प्राणेषु चैव तत् स्वर्गेषु च लोकेषु प्रतितिष्ठन्तो यन्ति स एषः स्वर्ग्यः पशुर्य एन मेवं विभजन्त्यथ ये ऽतो ऽन्यथा तद्यथा सेळगा † वा पापकृतो वा पशुं विमथ्नीरंस्तादृक्तत्तां वा एतां पशोर्विभक्तिं श्रौत ऋषिर्देवभागो विदाञ्चकार ता मु हाप्रोच्यैवास्माल्लोकादुच्चक्रामत्ता मु ह गिरिजाय बाभ्रव्यायामनुष्यः प्रोवाच ततो हैना मेतदर्वाङ् मनुष्या अधीयते ऽधीयते ॥ १ ॥

॥ इत्यैतरेयब्राह्मणे सप्तमपञ्चिकायां प्रथमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥

वर्णितं शस्त्रजातन्तु होतृहोत्रकगोचरम् ।
पशोरुपकृतीयस्य विभागस्त्वथ कथ्यते ॥

आश्वलायनः सत्रिणां धर्मेष्वेव माह— "सुत्यासु हविरुच्छिष्टभक्षा एव स्युः, धानाः करम्भः परिवापः पुरोळाशः पयस्येति ।

---

* ख-घ-ङ-च-पुस्तकेषु एवमादिषु विसर्गो लुप्तः ।

† "शैलगा" क, ख, घ, ङ ।

तेषां यथत् कामयेरंस्तत् तदुप वि गुल्फयेयुः"-इति (श्रौ० १२. ८.३२,३३.)। प्राणधारणाय यथा पर्याप्यते, तथा हविःशेषस्याधिक्येन सम्पादनेन 'उपविगुल्फनम्'। एवं बहुविधान् हविःशेषभक्षानुक्त्वा पुनरन्यमप्येव मुवाच— "अपि वान्यत्र सिद्धं गार्हपत्ये पुनरधिश्रित्योपजक्षयेरन्नन्यान् वा पथ्यान्, भक्षाना मूलफलैश्च एतेन वर्तयेयुः पशुना च"-इति (श्रौ०१२.८.३९-४१. *) 'अन्यत्र सिद्धं' गृहे पक्व मन्नं पुनरपि गार्हपत्ये संतप्तदवस्थाप्य 'उपजक्षयेरन्' उपभुञ्जीरन्। 'अन्यान् वा' लड्डुक-मण्डकादीन् 'भक्षान्' 'पथ्यान्' अजीर्णादिदोषरहितान्, मूलफलपर्यन्त मिच्छया स्वीकुर्युः। 'एतेन' सुत्यादिनेषु सन्निहितेन सवनीयपशुना च 'वर्तयेयुः' जीवनरूपां वृत्तिं सम्पादयेयुः। इत्येवं सवनीयपशुरूपस्य हविषः शेषभक्षणेन ऋत्विजां जीवन मप्यभिहितम्। तस्मिन् पशौ कस्य को विभाग इति जिज्ञासायां तद्विभागकथनं प्रतिजानीते— "अथातः पशोर्विभक्तिस्तस्य विभागं वक्ष्यामः"-इति। 'अथ' होतृ-होतक-प्रश्ननिर्णयानन्तरम्†, यतः यज्ञानुष्ठायिनां ऋत्विजां जीवनोपायोऽपेक्षितः, 'अतः' कारणात् सवनीयस्य 'पशोः' विभक्तिः कथ्यते। विभक्तिशब्दस्यैव व्याख्यानं तस्येत्यादि॥

---

* "तेषां प्रत्याम्नि,— पयो दीक्षासु, व्रतिनीय काल मुपसदां चतुर्थं मेकस्या दुग्धेन, तावदेव त्रिभिः स्तनैस्तावद् द्वाभ्या मेकेन तावदेव। सुत्यासु०—०गुल्फयेयुः। आग्निरहुतो दध्यर्थं, सौम्यं वा विगुल्फं निवर्तयेयुरिति शौनको यावच्छरावं भक्षयेरन्। वैश्वदेव मेके, वारुणस्य मेके, सर्वान् वानुसवनम्। अपि वा०—०पशुना च"-इति तदाम्नातपाठः (१-४१.)।

† २भा० १८४पृ० द्वादश प्रश्नाः— 'आज्यप्रउगे, निष्केवल्यमरुत्वतीये, वैश्वदेवाग्निमारुते इति होतुः प्रश्नाः षट्; तथा होतकाना मपि षट्'-इति। 'प्रशास्ता ब्राह्मणाच्छंस्यच्छावाक इति मध्यमा होतकाः'-इति आप० श्रौ० ५. १०. १०। विशेषतस्तु २भा० २४८पृ० * टीप्पण्यां द्रष्टव्यम्।

वक्ष्याम इति प्रतिज्ञातो यो विभागस्तं दर्शयति—"हनू सजिह्वे प्रस्तोतुः, श्येनं वक्ष उद्गातुः, कण्ठः काकुद्रः प्रतिहर्तुर्, दक्षिणा श्रोणिर्होतुः, सव्या ब्रह्मणो, दक्षिणं सक्थि मैत्रावरुणस्य, सव्यं ब्राह्मणाच्छंसिनो, दक्षिणं पार्श्वं सांसमध्वर्योः, सव्यमुपगातॄणां, सव्योऽंसः प्रतिप्रस्थातुर्, दक्षिणं दोर्नेष्टुः, सव्यं पोतुर्, दक्षिण ऊरुरच्छावाकस्य, सव्य आग्नीध्रस्य, दक्षिणो बाहुरात्रेयस्य, सव्यः सदस्यस्य, सदं चानूकं च गृहपतेर्, दक्षिणौ पादौ गृहपतेर्व्रतप्रदस्य, सव्यौ पादौ गृहपतेर्भार्यायै व्रतप्रदस्यौष्ठ एनयोः साधारणो भवति, तं गृहपतिरेव प्रशिंष्याज्जाघनीं पत्नीभ्यो हरन्ति, तां ब्राह्मणाय दद्युः; स्कन्ध्याश्च मणिकास्तिस्रश्च कीकसा ग्रावस्तुतस्, तिस्रश्चैव कीकसा अर्धं च वैकर्तस्योन्नेतुरर्धं चैव वैकर्तस्य, क्लोमा च शमितुस्तद्ब्राह्मणाय दद्याद्यद्यब्राह्मणः स्याच्छिरः सुब्रह्मण्यायै, यः श्वःसुत्यां प्राह तस्याजिनमिळा सर्वेषां होतुर्वा"—इति। जिह्वया सहितं हनुद्वयं प्रस्तोतुर्भागः। श्येनाकारं वक्ष उद्गातुर्भागः *। यः कण्ठः, यश्च 'काकुद्रः' काकुदं, तदुभयं प्रतिहर्तुर्भागः। श्रोणिः जघनमूलं, तदुभयं दक्षिण-सव्यरूपं क्रमेण होतुर्ब्रह्मणोर्भागः। ऊर्वधोभागः 'सक्थि', तच्चोभयं क्रमेण मैत्रावरुण-ब्राह्मणाच्छंसिनोर्विभागः। दक्षिणांसेन युक्तं दक्षिणं पार्श्वं अध्वर्योर्भागः। सव्यं पार्श्वमात्रमुपगातॄणां भागः। सव्यः अंसः प्रतिप्रस्थातुर्भागः। 'दोः' बाहुः, तच्चोभयं क्रमेण नेष्टृ-पोत्रोर्भागः। ऊरुद्वयं क्रमेण अच्छावाकाग्नीध्रयोर्भागः। सक्थिशब्देन अधोभागस्याभिहितत्वात् ऊर्ध्वभाग ऊरुशब्देन विवक्षितः। बाहुद्वयं क्रमेण आत्रेय-सदस्ययो-

---

* 'श्येनमस्य वक्षः'-इत्यादि १भा० २७२पृ० द्र०।

श्रोणी । [illegible]योरेकैकोऽप्यर्धभागो [illegible]भागाभ्यां भेदो द्रष्टव्यः । [illegible] पूर्वाचार्यैर्व्याख्यातौ—

“[illegible]: स्यात् , साक्षेत्येके वदन्ति च ।
[illegible]: स्यादेतद् गृहपतेरियम्”–इति ।

यः पुमान् गृहपतेर्व्रतप्रदो भोजनदायी, तस्य दक्षिणौ पादौ भागः । गृहपतेर्या भार्या, तस्यै च व्रतप्रदो यः पुमान् , तस्यैव सव्यौ पादौ भागः । अत्र पुरोवर्त्तिनोः पादयोर्बाहुत्वेनाभिहितत्वात् , पाश्चात्यावेव पादशब्देन विवक्षितौ । तत्रैकस्मिन्नपि दक्षिणे पादे द्विवचन मवयवापेक्षम् । एव मुत्तरत्रापि । योऽयमोष्ठः, सोऽयम् ‘एनयोः’ व्रतप्रदयोः ‘साधारणः’ भागो भवति । ‘तं’ भागं गृहपतिरेव ‘प्रशिंष्यात्’ तव अयं तव अय मिति विभज्य प्रदद्यात् । ‘जाघनीं’ पुच्छं पत्नीभ्यो ‘हरन्ति’ दद्युः ; ताश्च पत्न्यः ‘तां’ जाघनीं ब्राह्मणाय कस्मैचित् दद्युः । स्कन्धे भवाः ‘स्कन्ध्याः’, मणिसदृशा मांसखण्डा ‘मणिकाः’, एकस्मिन् पार्श्वे स्थिता मांसयुक्ताकास्तिस्रः ‘कीकसाः’ ; मणिकाः कीकसाश्चेत्युभयं ग्रावस्तुतो भागः । इतरपार्श्वे स्थिताः तिस्रः कीकसाः ; ‘वैकर्तः’ प्रौढो मांसखण्डः, तस्यार्द्धं पूर्वोक्तकीकसात्रयं चोन्नेतुर्भागः । यत्तु वैकर्त्तस्येतरदर्द्धं, यश्च हृदयपार्श्ववर्त्ती क्लोमशब्दाभिधो मांसखण्डः, तदुभयं शमितुर्भागः । अयं शमिता यदि अ-ब्राह्मणः स्यात् , तदा स्वेन स्वीकृतं तदुभय मन्यस्मै ब्राह्मणाय दद्यात् । यच्छिरोऽस्ति, तत् सुब्रह्मण्याभिधानर्त्विजे दद्यात् । श्वःसुत्येति निगदनाम *, तां चाग्नीध्रो ब्रूते । तथा चाश्वलायन आह—

---

* “[illegible] निगदस्व गौतम[illegible] मघ आगच्छ रोहिताभ्यां [illegible] धूमकेतो [illegible] विचर्षण आङ्गिरस ब्राह्मणाङ्गिरस[illegible]बुवाणेति प्राक् सुत्यादिवसात्”–इति आश्वा० श्रौ० ६.४ ।

“आग्नीध्रः स्वस्तुत्यां प्राह”-इति (श्रौ०१२.९.१४.)। ‘अजिनं’ चर्म, तच्चाग्नीध्रस्य भागः। ‘इळा’ सवनीयपश्वोः सम्बन्धी योऽयमिळाभागः, स सर्वेषां साधारणः; यद्वा होतुरसाधारणः * ॥

उक्तानां पशुविभक्तीनां सङ्ख्यां प्रशंसति— “ता वा एताः षट्त्रिंशत मेकपदा यज्ञं वहन्ति; षट्त्रिंशदक्षरा वै बृहती, बार्हताः स्वर्गा लोकाः; प्राणांश्चैव तत् स्वर्गांश्च लोकानाप्नुवन्ति; प्राणेषु चैव तत् स्वर्गेषु च लोकेषु प्रतितिष्ठन्तो यन्ति”-इति। ‘ता वै’ इत्यादय इळान्ताः श्रुत्या उक्ताः, अस्माभिरपि दर्श्यमानाः ‘षट्त्रिंशतं’ षट्त्रिंशत्-सङ्ख्याकाः ‘एकपदाः’ हनुः जिह्वेत्येव मेकैकेन पदेन अभिधीयमानाः पशुविभक्तयो ‘यज्ञं वहन्ति’ यज्ञस्य निर्वाहं कुर्वन्ति। सङ्ख्या चेयं पूर्वाचार्यैर्व्याख्याता—

“तत्र पादौ द्वौ तौ द्वावन्यौ द्वात्रिंशदेव हि।
इत्यादि इळान्त मुक्तं षट्त्रिंशन्नतयः पशोः”-इति।

अतः सङ्ख्यासाम्यादियं विभक्तिः बृहतीरूपा; स्वर्गलोकाश्च बृहत्या सम्पादयितुं शक्यत्वात् ‘बार्हताः’। ‘तत्’ तेन पशुविभागेन सत्रिणः प्राणान् स्वर्गलोकानपि प्राप्नुवन्ति। पश्ववयवानां प्राणाधारत्वात् तेन विभागेन सत्रिणोऽस्मिन् जन्मनि प्राणेषु प्रतिष्ठिता वर्त्तन्ते, जन्मान्तरेषु बृहतीद्वारा स्वर्गेषु लोकेषु प्रतिष्ठिता वर्त्तन्ते ॥

पशुं प्रशंसति— “स एषः स्वर्ग्यः पशुर्य एन मेवं विभजन्ति”-इति। ‘ये’ सत्रिणः ‘एनं’ पशुं ‘एवम्’ उक्तेन प्रकारेण विभक्तं

‘परसम्बोधनार्थमन्त्रा निगदाः’-इति निगदमन्त्रलक्षणम्। तद्विचारस्तु मीमांसायां द्रष्टव्यः। जै० द० २, १. ३८-४५ सू०, १२ अधि०।

* ऋत्विजां परिचयः आश्व० श्रौ० ४.१.१-८, ३भा० २१५पृ०। द्रष्टव्यः।

कुर्वन्ति, तेषां सत्रिणां स एषः पशुः ‘स्वर्ग्यः’ स्वर्गीय हितो भवति * ॥

प्रकारान्तरेण विभागं निन्दति— “अथ ये ऽतोऽन्यथा तद्यथा सेळगा वा पापकृतो वा पशुं विमथ्नीरंस्तादृक्तत्”–इति । ‘अथ’ उक्तविभागप्रशंसानन्तरम्, इतरन्निन्द्योच्यत इति शेषः । ‘ये’ सत्रिणः ‘अतः’ पूर्वोक्तविभागात् ‘अन्यथा’ प्रकारान्तरेण, विभजन्त इत्यनुवर्त्तते ; ‘तत्’ तेषां निदर्शन मुच्यते । इळाशब्देन अन्न मुच्यते, तेन सह वर्त्तत इति ‘सेळः’ अन्नबहुलो देशः, तं गच्छन्तीति ‘सेळगाः’, विहितकर्माननुष्ठायिनः केवलोदरपोषणपरायणा इत्यर्थः ; ‘पापकृतः’ प्रतिषिद्धकर्मकारिणः ; ते च द्विविधाः यथा पशुं ‘विमथ्नीरन्’ केवलं मांसभक्षणार्थं मेव हन्युः ; तादृगेव ‘तत्’ अन्यथा विभजनं द्रष्टव्यम् ॥

उक्तं पशुविभागं तद्द्रष्टृमहर्षिद्वारा प्रशंसति— “तां वा एतां पशोर्विभक्तिं श्रौत ऋषिर्दैवभागो विदाञ्चकार ; तामु हाप्रोच्यैवास्माल्लोकादुच्चक्रामत्”–इति । ‘ता मेतां’ पूर्वोक्तां पशुविभक्तिं श्रुतनामकस्य † मुनेः पुत्रो देवभागाख्यो महर्षिः ‘विदाञ्चकार’ ज्ञातवान् । ‘ता मु ह’ ता मेव स्वेन ज्ञातां विभक्तिम्, ‘अप्रोच्यैव’ रहस्यविद्येति मत्वा कस्मै चिदप्यकथयित्वैव अस्मात् लोकात् ‘उच्चक्रामत्’ उत्क्रान्तवान्, मृत इत्यर्थः ॥

कथं तर्हि तत्सम्प्रदायः ? इत्याशङ्क्याह— “ता मु ह गिरिजाय बाभ्रव्यायामनुष्यः प्रोवाच, ततो हैना मेतदर्वाङ् मनुष्या अधीयते ऽधीयते”–इति । ‘ता मु ह’ ता मेव पशु-

---

* ‘श्वःसुत्यायां पशुं०—०अभिजितव्यं चैव लीप्सितव्यं च’–इति १भा० २५२४०’ ।

† ‘श्रुतर्षि’–इति ऋ० मं० १०, ४७, ९ ; तै० ब्रा० २, ५, ६, १ ।

विभक्तिम् 'अमनुष्यः' मनुष्यव्यतिरिक्तः, कश्चिद् गन्धर्वादिः 'बाभ्रव्याय' बभ्रोरपत्याय गिरिजनामकाय * महर्षये प्रोवाच । 'एतदर्वाङ् मनुष्याः' एतस्माद् गिरिजाख्यात् महर्षेरर्वाचीनाः सर्वे मनुष्याः 'ततः' तस्य गिरिजाख्यस्य सकाशात् 'एनां' पशुविभक्तिमधीयते । पदाभ्यासोऽध्यायसमाप्त्यर्थः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां प्रथमाध्याये
(एकत्रिंशाध्याये) प्रथमः खण्डः † ॥ १ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'-नामभाष्ये
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायाः प्रथमोऽध्यायः ॥

---

* "गिरिजा एवयामरुत्"-इति ऋ० सं० ५. ८७. १ ।

† एष खण्डस्तूद्धृतो यथावदाश्वलायनीयश्रौतसूत्रे (१२. ९. १-१८.) ।

॥ अथ द्वितीयाध्यायः ॥

(तत्र)

॥ प्रथमः खण्डः ॥

तदाहुर्य आहिताग्निरुपवसथे म्रियेत कथमस्य यज्ञः स्यादिति, नैनं याजयेदित्याहुरनभिप्राप्तो हि यज्ञं भवतीति तदाहुर्य आहिताग्निरधिश्रिते ऽग्निहोत्रे सान्नाय्ये वा हविःषु वा म्रियेत का तत्र प्रायश्चित्तिरित्येवैनान्यनुपर्यादध्याद् यथा सर्वाणि सन्दह्येरन्नेषा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निरासन्नेषु हविःषु म्रियेत का तत्र प्रायश्चित्तिरिति याभ्य एव तानि देवताभ्यो हवींषि गृहीतानि भवन्ति ताभ्यः स्वाहेत्येवैनान्याहवनीये सर्वहुन्ति जुहुयात्सैषा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निः प्रवसन्म्रियेत कथमस्याग्निहोत्रं स्यादित्यभिवान्यवत्सायाः पयसा जुहुयादन्यदिवैतत्पयो यदभिवान्यवत्साया अन्यदिवैतदग्निहोत्रं यत्प्रेतस्यापि वा यत एव कुतश्च पयसा जुहुयुरथाप्याहुरेव मेवैनानजस्रानजुह्वत आसीरन्ना शरीराणामाहर्तोरिति यदि शरीराणि न विद्येरन् पर्णशरः षष्टिस्त्रीणि च शतान्याहृत्य तेषां पुरुषरूपक

मिव कृत्वा तस्मिंस्ता मावृतं कुर्युरथैनाङ्करीरै *-राहृतैः संस्पर्श्योद्वासयेयुरध्यर्द्धशतं कार्ये सक्थिनो द्विपञ्चाशे च विंशे चोरू द्विपञ्चविंशे शेषं तु शिरस्युपरि दध्यात्सा तत्र प्रायश्चित्तिः ॥ १ (२) ॥

सत्रिणां वर्णितं कार्यं प्रायश्चित्तं ब्रवीत्यथ ।
चोद्योत्तरप्रकारेण सुस्पष्ट मिति गम्यताम् ॥

तत्र प्रथमे चोद्योत्तरे दर्शयति— "तदाहुर्य आहिताग्निरुपवसथे म्रियेत, कथ मस्य यज्ञः स्यादिति ; नैनं याजयेदित्याहुरनभिप्राप्तो हि यज्ञं भवतीति"–इति । तत्र यज्ञवैकल्यविषये केचिद् ब्रह्मवादिनः पृच्छन्ति— 'यः' पुमान् आहिताग्निः सन् उपवसथाख्ये सुत्यादिनात् पूर्वदिने म्रियेत, अस्य यज्ञः कथं प्रवर्त्तते ? इति प्रश्नः । तस्येद मुत्तरम्— 'एनं' मृतं न याजयेदित्यभिज्ञा आहुः । तत्रेय मुपपत्तिः—सुत्याया अनुपक्रान्तत्वादयं यज्ञ मनभिप्राप्त एव भवति ; तस्माद् यागो न युक्तः ॥

द्वितीये प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निरधिश्रिते ऽग्निहोत्रे सान्नाय्ये वा हविष्षु वा म्रियेत, का तत्र प्रायश्चित्तिरित्यत्रैवैनान्यनुपर्यादध्याद् यथा सर्वाणि सन्दहेरंस्सा तत्र प्रायश्चित्तिः"–इति । 'अग्निहोत्रे' तत्साधनभूते पयसि कार्यार्थं वह्नावधिश्रिते सति, तथा 'सान्नाय्ये' दर्शपूर्णमासार्थे क्षीरे अधिश्रिते सति, तथा 'हविष्षु' पुरोडाशादिषु अधिश्रितेषु, यजमानस्य मरणे किं प्रायश्चित्तम् ? इति प्रश्नः । प्रायो नाशस्तस्य चित्तं समाधानम् । 'अत्रैव' यजमानदहनदेशे एव 'एतानि' क्षीरादीनि 'अनु-

---

* सर्वेष्वेव पुस्तकेषु "०रथैनाङ्करीरै०"–इत्येव पाठो लिपिकरप्रमादादिजन्य एव ।

'पर्यादध्यात्' यजमान मनु परितः प्रक्षिपेत् । येन प्रकारेण सर्वाणि तानि यजमानेन सम्भूय दह्येरन्, तथा प्रक्षिपेत् । 'सा' तादृशी क्रिया 'तत्र' दोषे प्रायश्चित्तिः भवति ॥

तृतीये प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निरासन्नेषु हविष्षु म्रियेत, का तत्र प्रायश्चित्तिरिति; याभ्य एव तानि देवताभ्यो हवींषि गृहीतानि भवन्ति, ताभ्यः स्वाहेत्येवैनान्याहवनीये सर्वहुन्ति जुहुयात्; सा तत्र प्रायश्चित्तिः"-इति । 'हविष्षु' पुरोडाशादिषु वेद्या मासन्नेषु यजमानमरणे, याभ्यो देवताभ्यः पूर्वं तानि हवींषि उपक्रान्तानि, 'ताभ्यः' तद्देवतानामानि चतुर्थ्यन्तानि उच्चार्य स्वाहेत्यनेनैव मन्त्रेण 'एनानि' हवींषि 'सर्वहुन्ति' निःशेषेण यथा सर्वाणि हुतानि भवन्ति तथा आहवनीये जुहुयात् ॥

चतुर्थे प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निः प्रवसन् म्रियेत, कथ मस्याग्निहोत्रं स्यादित्यभिवान्यवत्सायाः पयसा जुहुयादन्यदिवैतत्पयो यदभिवान्यवत्साया अन्यदिवैतदग्निहोत्रं यत्प्रेतस्य"-इति । अग्निहोत्रं भार्यासमीपे स्थाप्य ग्रामान्तरे 'प्रवसन्' ततः स यदि म्रियेत, तदानीं स्वगृहे पुत्रादिः 'अभिवान्यवत्सायाः पयसा अग्निहोत्रं जुहुयात्' । 'वा गतिगन्धनयोः' इतिधातोरभिपूर्वस्य 'अभिवा'-इति रूपम्; अन्यश्चासौ वत्सश्च 'अन्यवत्सः'; अभिप्राप्तोऽन्यवत्सो यस्या गोः, सेयम् 'अभिवान्यवत्सा'; पोषणादिप्रकारेण उपस्थितेत्यर्थः । एतादृश्या अभिवान्यवत्सायाः यत्पयोऽस्ति, एतद् 'अन्यदिव' दैनन्दिनाग्निहोत्रीयपयसः सकाशात् अन्यदेवैतद्द्रव्यम्; प्रेतस्यापि यदग्निहोत्रम्, 'एतत् अन्यदिव' एतत् नित्याग्निहोत्रादन्यदेव कर्मान्तरम्; तत्समानधर्मकं पुत्रादि-

कर्त्तृकम्; अतः प्रेतस्याधिकाराभावेऽपि पुत्रादेरधिकारसद्भावात् अनुष्ठान मुपपद्यते इत्यर्थः * ॥

तत्रैव पक्षान्तर माह— "अपि वा यत एव कुतश्च पयसा जुहुयुः"–इति। अभिवान्यवत्साया इति नियमो नास्ति, किन्तु 'यतः कुतः' यस्याः कस्याश्चिद्गोः पयसा पुत्रादयो जुहुयुरिति † ॥

पुनरपि पक्षान्तर माह— "अथाप्याहुरेव मेवैनानजस्रानजुह्वत इन्धीरन्ना शरीराणा माहर्त्तोः"–इति। अपि च अन्ये याज्ञिकाः पक्षान्तर माहुः। देशान्तरे मृतस्य प्रेतस्य 'शरीराणाम्' अस्थ्यादिप्रेतावयवानाम् 'आ आहर्त्तोः' आहरणपर्यन्तम् 'एनान्' आहवनीयादीन् त्रीनग्नीन् 'अजस्रान्' उपशमरहितान् 'अजुह्वतः' होमरहितान् 'एव मेव' असमासेनैव प्रकारेण 'इन्धीरन्' प्रज्वालयेयुरिति। होमाभावेऽपि त्रयोऽप्यग्नयो यथा नोपशाम्यन्ति, तथा प्रेतास्थिसमानयनपर्यन्तं प्रज्वालयेदित्यर्थः ॥

प्रेतास्थिविनाशे किं कर्त्तव्य मित्याशङ्क्याह— "यदि शरीराणि न विद्येरन्, पर्णशरः षष्टिस्त्रीणि च शतान्याहृत्य तेषां पुरुषरूपक मिव कृत्वा तस्मिंस्ता माहृतं कुर्युरथैनाञ्छरीरैराहृतैः संस्पर्श्योद्वासयेयुः"–इति। यदि कथञ्चित् 'शरीराणि' अस्थ्यादीनि 'न विद्येरन्' विनश्येयुः, तदा 'पर्णशरः' पलाशवृन्तस्य छिन्नान् वृन्तान् षष्ट्युत्तरशतत्रयसङ्ख्याकानाहृत्य, 'तेषां' वृन्तानां सम्बन्धि 'पुरुषरूपक मिव कृत्वा' मनुष्यसदृशं किञ्चिद्रूपं निर्माय, 'तस्मिन्' रूपे 'ता माहृतं' प्रेतशरीरोचितप्रकारं दहनपिण्डदानादिरूपं

---

* "अथ प्रमीतस्याभिवान्यवत्सायाः पयसाग्निहोत्रं तूष्णीं सर्वं हुतं जुहुयुरा समवायात्"–इत्यादि आश्व० श्रौ० ६. १०, १० ।

† "प्रोषितश्चेत् प्रेयात्"–इत्यादि कात्या० श्रौ० २५, ८, ९ ।

कुर्युः । 'अथ' तदानीं कृत्रिमरूपदहनकाले 'एनाम्' आहवनीयाद्यग्नीन् श्मशाने नीत्वा समाहृतैस्तैः पलाशवृन्तनिर्मितैः शरीरावयवैः 'संसृज्य' संसृष्टं कृत्वा उद्वासयेयुः * ॥

पुरुषरूपनिर्माणप्रकारं दर्शयति— "अध्यर्द्धशतं काये, सक्थिनी द्विपञ्चाशे च विंशे, चोरू द्विपञ्चविंशे, शेषन्तु शिरस्युपरि दध्यात्; सा तत्र प्रायश्चित्तिः"-इति । आनीतानां पलाशवृन्तानाम् 'अध्यर्द्धशतम्' अधिकेनार्द्धेन पञ्चाशद्रूपेण युक्तं शतं 'काये' मध्यशरीरस्थाने 'दध्यात्' परितः प्रक्षिपेत् । पञ्चाशत्सङ्ख्याकानां वृन्तानां समूहरूपं 'पञ्चाशं', द्विसङ्ख्याके पञ्चाशे 'द्विपञ्चाशे'; विंशतिसङ्ख्याकानां समूहरूपं विंशं; 'द्विपञ्चाशे च विंशे च सक्थिनी दध्यात्' चत्वारिंशदधिकेन शतेन सक्थिद्वयं निष्पादयेदित्यर्थः । पञ्चविंशतिसङ्ख्याकानां समूहरूपं पञ्चविंशं, द्विसङ्ख्याके पञ्चविंशे, ते 'ऊरू दध्यात्' पञ्चाशत्सङ्ख्याकैर्वृन्तैरूरुद्वयं निष्पादयेदित्यर्थः । एवं नवत्यधिकशतद्वये गते सति 'शेषं' सप्ततिसङ्ख्याकं शिरस्युपरि प्रक्षिपेत् । प्रवसतो मृतस्याग्निहोत्रवैकल्यप्रायश्चित्तं निगमयति— "सा तत्र प्रायश्चित्तिः"-इति । 'सा' प्रोक्तक्रिया 'तत्र' वैकल्ये 'प्रायश्चित्तिः' समाधानकारणम् ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) प्रथमः खण्डः ॥ १ (२) ॥

---

* "शरीरनाशे त्रीणि षष्टिशतानि पलाशवृन्तानां कृष्णाजिने पूर्ववत्"-इति कात्या० श्रौ० २५, ८, १५ ।

॥ अथ द्वितीयः खण्डः ॥

तदाहुर्यस्याग्निहोत्र्युपावसृष्टा दुह्यमानोपविशेत् का तत्र प्रायश्चित्तिरिति ता मभिमन्त्रयेत यस्माद्भीषा निषीदसि ततो नो अभयं कृधि पशून्नः सर्वान् गोपाय नमो रुद्राय मीळ्हुष इति ता मुत्थापयेदुदस्थाद्देव्यदितिरायुर्यज्ञपतावधात् इन्द्राय कृण्वती भागं मित्राय वरुणाय चेत्यथास्या उदपात्र मूधसि च मुखे चोपगृह्णीयादथैनां ब्राह्मणाय दद्यात्सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्निहोत्र्युपावसृष्टा दुह्यमाना वाश्येत का तत्र प्रायश्चित्तिरित्यशनायां ह वा एषा यजमानस्य प्रतिख्याय वाश्यते ता मन्न मप्यादयेच्छान्त्यै शान्तिर्वा अन्नं सूयवसाद्भगवती हि भूया इति सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्निहोत्र्युपावसृष्टा दुह्यमाना स्पन्देत का तत्र प्रायश्चित्तिरिति सा यत्तत्र स्कन्दयेत्तदभिमृश्य जपेद्यदद्य दुग्धं पृथिवी मसृप्त यदोषधीरत्यसृपद्यदापः पयो गृहेषु पयो अघ्न्यायां पयो वत्सेषु पयो अस्तु तन्मयीति तत्र यत्परिशिष्टं स्यात्तेन जुहुयाद्यद्यलं होमाय स्याद् यद्यु वै सर्वं सिक्तं स्यादथान्या माहूय तां दुग्ध्वा तेन जुहुयादा त्वेव श्रद्धायै होतव्यं सा तत्र प्रायश्चित्तिः * ॥ २ (३) ॥

---

* सर्वं मेतत् पञ्चमपञ्चिकायाः पञ्चमाध्यायीयद्वितीयखण्डे द्रष्टव्यम् (३भा० १९७४०)।

पञ्चमे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्निहोत्र्युपावसृष्टा, दुह्यमानोपविशेत्, का तत्र प्रायश्चित्तिरिति ; ता मभिमन्त्रयेत" -इति । अग्निहोत्रहविरर्थं दोग्ध्री धेनुः 'अग्निहोत्री' । 'यस्य' अग्निहोत्रिणः सम्बन्धिनी सा धेनुः 'उपावसृष्टा' वत्सेन संयोजिता दुह्यमाना सती दोहनस्य विघ्नं कृत्वा यद्युपविशेत्, तदानीं वक्ष्यमाणेन मन्त्रेण ता मभिमन्त्रयेत । यद्यप्येतत् पञ्चविंशाध्यायस्य द्वितीयखण्डे * वर्णितं, तथापि तत्र बुद्धिस्थसङ्गतिः, अत्र तु प्रायश्चित्तप्राधान्येनोपक्रमात् साक्षादेव सङ्गत मित्यभिप्रेत्य पुनरप्याम्नातम् ॥

तत्रोत्तरशेषं दर्शयति— "यस्माद्भीषा निषीदसि, ततो गो अभयं कृधि, पशूनः सर्वान् गोपाय, नमो रुद्राय मीळ्हुष इति, ता मुत्थापयेदुदस्थाद्देव्यदितिरायुर्यज्ञपतावधात्, इन्द्राय कृण्वती भागं, मित्राय वरुणाय चेत्यथास्या उदपात्र मूधसि च मुखे चोपगृह्णीयादथैनां ब्राह्मणाय दद्यात् ; सा तत्र प्रायश्चित्तिः"-इति । एतत् सर्वं पूर्वत्रैव † व्याख्यातम् ॥

षष्ठे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्निहोत्र्युपावसृष्टा, दुह्यमाना वाश्येत, का तत्र प्रायश्चित्तिरित्यशनायां ह वा एषा यजमानस्य प्रतिख्याय वाश्यते, ता मन्न मप्यादयेच्छान्त्यै; शान्तिर्वा अन्नं ; सुयवसाद्भगवती हि भूया इति ; सा तत्र प्रायश्चित्तिः"-इति । एतदपि पूर्वत्र ‡ व्याख्यातम् ॥

सप्तमे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्निहोत्र्युपावसृष्टा,

---

* १भा० १६७पृ० द्र० । आश्व० श्रौ० ३. ११ । आप० श्रौ० ९. ५ ।

† १भा० १६८पृ० १२पं०–१६९पृ० ९पं० । आश्व० श्रौ० ३. ११. १–२ ।

‡ १भा० १६९पृ० १०–२२पं० । आश्व० श्रौ० ३. ११. ४ ।

दुह्यमाना स्कन्देत, का तत्र प्रायश्चित्तिरिति; सा यत्तत्र स्कन्देत्तदभिमृश्य जपेद्यदद्य दुग्धं पृथिवी मसृप्त यदोषधीरत्यसृपद्यदापः, पयो गृहेषु पयो अघ्न्यायां, पयो वत्सेषु पयो अस्तु तन्मयीति; तत्र यत् परिशिष्टं स्यात्तेन जुहुयाद्यद्यलं होमाय स्यात्; यद्यु वै सर्वं सिक्तं स्यादथान्यामाहूय तां दुग्ध्वा तेन जुहुयादा त्वेव श्रद्धायै होतव्यं; सा तत्र प्रायश्चित्तिः"—इति। एतदपि पूर्ववत् * व्याख्यातम् ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) द्वितीयः खण्डः ॥ २ (३) ॥

॥ अथ तृतीयः खण्डः ॥

तदाहुर्यस्य सायं दुग्धं सान्नाय्यं दुष्येद्वापहरेद्वा का तत्र प्रायश्चित्तिरिति प्रातर्दुग्धं द्वैधं कृत्वा तस्यान्यतरां भक्तिमातच्य तेन यजेत सा तत्र प्रायश्चित्तिस्तदाहुर्यस्य प्रातर्दुग्धं सान्नाय्यं दुष्येद्वापहरेद्वा का तत्र प्रायश्चित्तिरित्यैन्द्रं वा माहेन्द्रं वा पुरोळाशं तस्य स्थाने निरुप्य तेन यजेत सा तत्र प्रायश्चित्तिस्तदाहुर्यस्य सर्वमेव सान्नाय्यं दुष्येद्वापहरेद्वा का तत्र प्रायश्चित्तिरित्यैन्द्रं वा माहेन्द्रं वेति समानं सा

---

* ३भा० १६९पृ० २९पं०–१७१पृ० ४पं०। आश्व० श्रौ० ३. ११. ७–१०।

तत्र प्रायश्चित्तिस्तदाहुर्यस्य सर्वाण्येव हवींषि दुष्येयुर्वापहरेयुर्वा का तत्र प्रायश्चित्तिरित्याज्यस्यैनानि यथादेवतं परिकल्प्य तयाज्यहविषेष्ट्या यजेतातो ऽन्या मिष्टि मनुल्बणां तन्वीत यज्ञो यज्ञस्य प्रायश्चित्तिः ॥ २ (४) ॥

अष्टमे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्य सायं दुग्धं सान्नाय्यं दुष्येद्वापहरेद्वा, का तत्र प्रायश्चित्तिरिति ; प्रातर्दुग्धं द्वैधं कृत्वा तस्यान्यतरां भक्तिमातच्य तेन यजेत, सा तत्र प्रायश्चित्तिः"–इति । दर्शपूर्णमासयोर्दध्यर्थं सायङ्काले दुग्धं पयः सान्नाय्यरूपं *, केशकीटादिभिर्दुष्येत् , यः कश्चिदपहरेद्वा, तदानीं परेद्युः प्रातर्दुग्धं पयो भागद्वयं कृत्वा तत्रैकभागं मातच्य, तेन संस्कृत्य दधिस्थानीयेन तेन यजेत ॥

नवमे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्य प्रातर्दुग्धं सान्नाय्यं दुष्येद्वापहरेद्वा, का तत्र प्रायश्चित्तिरित्यैन्द्रं वा माहेन्द्रं वा पुरोडाशं तस्य स्थाने निरुप्य तेन यजेत, सा तत्र प्रायश्चित्तिः"–इति ।

---

* "स प्रजापतिः पशूनब्रवीदेतदस्मै समनयतेति , तत्पशव ओषधीभ्यो ऽध्यात्मन्त्समनयन् ; तत्प्रत्यदुहन् ; यत्समनयन् , तत् सान्नाय्यस्य सान्नाय्यत्वम्"–इति तै० सं० २, ५. ३. ३ । तदेतस्मात् पयःपयसोः सान्नाय्यत्व मवगम्यते । गोरस इति, एतद्ब्राह्मणवचनव्याख्यायां सायणः । "सोमः खलु वै सान्नाय्यम्"–इति तै० ब्रा० १. २. १. ११ । पौर्णमासं हविः सान्नाय्यम्"–इति शत० ब्रा० १. ६. ४. ६ । 'सान्नाय्यं दधिपयोलक्षणम्'–इति शत० ब्रा० ११. २. ६. ६ भाष्ये सायणः । 'सम्यक् नीयते होमार्थं मग्निं प्रति इति सान्नाय्यं हविर्विशेषः'–इति पा० ३. १. १२९–सूत्रस्थो दीक्षितः । 'सान्नाय्यं दुग्धदधिरूपं हविः'–इति कात्या० श्रौ० ४. २. १७ सू० वृत्तौ याज्ञिकदेवः ।

5881

प्रातर्दुग्धरूपस्य सान्नाय्यस्य दोषापहाराभ्यां वैकल्ये सति, तस्य दुग्धस्य स्थाने इन्द्रदेवताकं महेन्द्रदेवताकं वा पुरोडाशं कृत्वा, तेन यजेत। इन्द्रयाजि-महेन्द्रयाजि-भेदाद्देवताव्यवस्था ॥

दशमे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्य सर्वमेव सान्नाय्यं दुष्येद्वापहरेद्वा, का तत्र प्रायश्चित्तिरित्यैन्द्रं वा माहेन्द्रं वेति समानं, सा तत्र प्रायश्चित्तिः"–इति। सायं दुग्धं प्रातर्दुग्धं चेत्युभयं 'सर्वम्' ॥

एकादशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्य सर्वाण्येव हवींषि दुष्येयुर्वापहरेयुर्वा, का तत्र प्रायश्चित्तिरित्याज्यस्यैनानि यथादेवतं परिकल्प्य तयाज्यहविषेष्ट्या यजेतातोऽन्यामिष्टिमनुल्बणां तन्वीत यज्ञो यज्ञस्य प्रायश्चित्तिः"–इति। पुरोडाशदधिपयोरूपाणि हवींषि 'सर्वाणि' इत्युच्यन्ते। आज्यस्य सम्बन्धीनि 'एनानि' त्रीणि हवींषि, तत्तद्देवता अनतिक्रम्य तत्तदनुसारेण परिकल्प्य आज्यहविर्युक्तया तया इष्ट्या यजेत। इष्ट्वा च तत्तदूर्ध्वमन्यामिष्टिम् 'अनुल्बणाम्' अन्यूनामधिकां यथाशास्त्रं 'तन्वीत' विस्तारयेत्। यथाशास्त्रमनुष्ठितो 'यज्ञः' पूर्वस्य विकलस्य 'यज्ञस्य' प्रायश्चित्तिः * ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (४) ॥

---

* आश्व॰ श्रौ॰ ३. १०. १९ सू॰ द्र॰।

॥ अथ चतुर्थः खण्डः ॥

तदाहुर्यस्याग्निहोत्र मधिश्रित ममेध्य मापद्येत का तत्र प्रायश्चित्तिरिति सर्व मेवैनत्स्रुच्यभिपर्यासिच्य प्राङुदेत्याहवनीये हैतां समिध मभ्यादधात्यथोत्तरत आहवनीयस्योष्णं भस्म निरूह्य जुहुयान्मनसा वा प्राजापत्यया वर्चा तद्धुतं चाहुतं च स यद्येकस्मिन्नुन्नीते यदि द्वयोरेष एव कल्पस्तच्चेद् व्यपनयितुं शक्नुयान्निषिच्यैतद्दुष्ट मदुष्ट मभिपर्यासिच्य तस्य यथोन्नीतं स्यात्तथा जुहुयात्सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्निहोत्र मधिश्रितं स्कन्दति वा विष्यन्दते वा का तत्र प्रायश्चित्तिरिति तदद्भिरुपनिनयेच्छान्त्यै शान्तिर्वा आपोऽथैनद्दक्षिणेन पाणिनाऽभिमृश्य जपति दिवं तृतीयं देवान् यज्ञोऽगात् ततो मा द्रविणमाष्टान्तरिक्षं तृतीयं पितॄन् यज्ञोऽगात् ततो मा द्रविण माष्ट पृथिवीं तृतीयं मनुष्यान् यज्ञोऽगात् ततो मा द्रविण माष्ट यस्यो रोजसा स्कभिता रजांसीति वैष्णुवारुणी मृचं जपति विष्णुर्वै यज्ञस्य दुरिष्टं पाति वरुण * स्विष्टं तयोरुभयोरेव शान्त्यै सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्निहोत्र मधिश्रितं प्राङुदायंस्खलते वापि वा भ्रंशते का तत्र प्रायश्चित्तिरिति स यद्युप-

---

* "वरुणः" (सविसर्गः) क ।

निवर्त्तयेत्स्वर्गाल्लोकाद्यजमान मावर्त्तयेदेवास्मा उपविष्टायैत मग्निहोत्रपरीशेष * माहरेयुस्तस्य यथोन्नीती स्यात् तथा जुहुयात् सा तत्र प्रायश्चित्तिस्तदाहुरथ यदि स्रुग्भिद्येत का तत्र प्रायश्चित्तिरित्यन्यां स्रुच माहृत्य जुहुयादथैतां स्रुचं भिन्ना माहवनीयेऽभ्यादध्यात् प्राग्दण्डां प्रत्यक्पुष्करां सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याहवनीये ह्यग्निर्विद्येताथ गार्हपत्य उपशाम्येत् का तत्र प्रायश्चित्तिरिति स यदि प्राञ्च मुद्धरेदायतनाच्च्यावेत यत्प्रत्यञ्च मसुरवद्यज्ञं तन्वीत यन्मन्थेद् भ्रातृव्यं यजमानस्य जनयेद् यदनुगमयेत्प्राणो यजमानं जह्यात् सर्व मेवैनं सह भस्मानं समोप्य गार्हपत्यायतने निधायाथ प्राञ्च माहवनीय मुद्धरेत् सा तत्र प्रायश्चित्तिः ॥ ४ (५) ॥

द्वादशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्निहोत्र मधिश्रित ममेध्य मापद्येत, का तत्र प्रायश्चित्तिरिति ; सर्व मेवैतत् स्रुच्यभिपर्यासिच्य प्राङुदेत्याहवनीये हैतां समिध मभ्यादधात्यथोत्तरत आहवनीयस्योष्णं भस्म निरुह्य जुहुयात्, मनसा वा प्राजापत्यया वर्चा तद्धुतं चाहुतञ्च ; स यद्येकस्मिन्नुन्नीते यदि द्वयोरेव एव कल्पस्तच्चेद् व्यपनयितुं शक्नुयान्निर्णिज्यैतद् दुष्ट मदुष्ट मभिपर्यासिच्य तस्य यथोन्नीती स्यात्तथा जुहुयात् ; सा तत्र प्रायश्चित्तिः"

---

* "परिशेष" क, ग, घ ।

–इति । अग्निहोत्रार्थं पयो गार्हपत्ये पाकार्थं यदधिश्रितम्, तद्यदि किञ्चिद् 'अमेध्यं' यज्ञानर्हं केशकीटादिकम् 'आपद्येत' प्राप्नुयात्, तदानीम् 'एतत्' हविः सर्व मप्यग्निहोत्रहवण्यां 'स्रुचि' आनयेन सिक्त्वा, प्राङ्मुख 'उदेत्य' उत्थाय आहवनीयं प्रति गत्वा, तस्मिन् 'एतां' नित्यां समिध मादध्यात् । 'अथ' अनन्तर माहवनीयस्योत्तरभागं किञ्चिदुष्णं भस्म ततो निःसार्य तस्मिन् 'मनसा' नित्याग्निहोत्रमन्त्र मनुस्मृत्य 'वाचा वा' "प्रजापते न त्वदेतानि"–इति (ऋ० सं० १०. १२१. १०.) मन्त्र मुच्चार्य जुहुयात् । 'तत्' एतद्भस्म उष्णत्वाद्धुत मपि भवति, अग्निराहित्यादहुत मपि भवति । न केवल मधिश्रित एवामेध्यमया एतत् प्रायश्चित्तम्; किं तर्हि ? चतुरुन्नयनावस्थायां यद्येकस्मिन् उन्नीते, यदि वा द्वयोरुन्नीतयोरमेध्यपातः, तदानी मेष एव 'कल्पः' प्रकारः । उन्नयनं नामाग्निहोत्रहवण्यां सेचनम् । तत्र केशकीटादिदूषित मग्निहोत्रहवण्या मुन्नीतं यद्यपनेतुं शक्नुयात्, तदानी मेतत् दुष्टं 'निरुष्य' निःसार्य, स्थाल्या मवस्थितम् 'अदुष्टं' क्षीर मग्निहोत्रहवण्या मभिपर्यासिच्य 'यथोन्नीतं स्यात्' उन्नीतं येन प्रकारेण भवति, तेन प्रकारेण जुहुयात् ; 'अदुष्ट' द्रव्यान्तर मधिश्रयणादिना संस्कृत्य जुहुयादित्यर्थः * ॥

त्रयोदशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्निहोत्र मधिश्रितं स्कन्दति वा विष्यन्दते वा, का तत्र प्रायश्चित्तिरिति ; तदद्भिरुपनिनयेच्छान्त्यै ; शान्तिर्वा आपो ऽथैनद्दक्षिणेन पाणिना ऽभिमृश्य जपति"–इति । अग्निहोत्रद्रव्यं गार्हपत्ये पाकार्थं

---

* "व्यापन्नानि हवींषि केशनखकीटपतङ्गैरन्यैर्वा बीभत्सैः॰—॰ प्रजापते न त्वदेतान्यन्य इति॰—॰ जुहुयात्"–इति आश्व॰ श्रौ ३. १०, १०–११।

मधिश्रितं सत्, कदाचित् 'स्कन्दति' स्खलति, क्षीरबिन्दुरधः पततीत्यर्थः। 'विष्यन्दते' विशेषेण स्यन्दनं दाहाधिक्येन स्थालीमुखस्योपरि उद्गमनं; तत् स्कन्नं विष्यन्दितं वा द्रव्यं दक्षिणेन पाणिना स्पृष्ट्वा वक्ष्यमाणं मन्त्रं जपेत् ॥

तं दर्शयति— "दिवं तृतीयं देवान् यज्ञो ऽगात्, ततो मा द्रविण माष्टान्तरिक्षं तृतीयं पितॄन् यज्ञो ऽगात्, ततो मा द्रविण माष्ट; पृथिवीं तृतीयं मनुष्यान् यज्ञो ऽगात्, ततो मा द्रविण माष्ट"-इति *। अस्य स्कन्दनस्य विष्यन्दितस्य वा पयसः 'तृतीयम्' अंशस्वरूपं 'दिवं' स्वर्गलोकम् 'अगात्' प्राप्नोतु। तेन यज्ञोऽपि देवान् प्राप्नोतु। प्रापणाद् वैकल्यपरिहारे सति 'मा' मा मग्निहोत्रिणम् 'द्रविण माष्ट' धनं प्राप्नोतु। तथैवापरं 'तृतीयं' द्रव्यांशस्वरूप मन्तरिक्ष मगात्। तेन यज्ञोऽपि पितॄन् प्राप्नोति। ततः प्रापणात् मां धनं प्राप्नोतु। पुनरप्यपरं 'तृतीयं' द्रव्यांशस्वरूपं पृथिवी मगात्। तेन यज्ञोऽपि मनुष्यानगात्। ततस्तदुभयप्रापणात् मां 'द्रविणं' धनम् 'आष्ट' प्राप्नोतु ॥

मन्त्रान्तरजपं विधत्ते— "ययो रोजसा स्कभिता रजांसीति वैष्णुवारुणी मृचं जपति; विष्णुर्वै यज्ञस्य दुरिष्टं पाति, वरुण स्स्विष्टं, तयोरुभयोरेव शान्त्यै"-इति। "ययोरोजसा"-इत्याद्यृक् सूत्रे पठिता †। तस्याश्चतुर्थपादे "विष्णू अगन् वरुणा पूर्वहूतौ"-इतिश्रुतत्वादियं विष्णुवरुणदेवताका। यज्ञस्य यद्

---

* संहितायां नाम्नात इति ब्राह्मणे श्रुतोऽयं मन्त्रः।

† "ययोरोजसा स्कभिता रजांसि वीर्येभिर्वीरतमा शविष्ठा।
या पत्येते ऽप्रतीता सहोभिर्विष्णू अगन् वरुणा पूर्वहूतौ ॥"
-इति मत० आ० ४, ५, ७, ७.। "यज्ञो मे विष्णुः"- इत्यादि च तत उत्तरम्।

'दुरिष्टम्' अङ्गवैकल्यं, तच्छमयित्वा विष्णुः पाति ; यज्ञस्य यत् 'स्विष्टं' यथाशास्त्र मनुष्ठित मङ्गं, तद्वरुणः पाति । फलप्रतिषेधनिवारणं तत्प्रतिपालनम् । तस्मादयं जपः 'तयोरुभयोः' दुरिष्टस्विष्टयोर्यथोक्तप्रकारेण प्राप्त्यर्थं सम्पद्यते । उक्तवाक्य मुपसंहरति— "सा तत्र प्रायश्चित्तिः"–इति ॥

चतुर्दशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्निहोत्र मधिश्रितं प्राङुदायन्स्खलते वा ऽपि वा भ्रंशते, का तत्र प्रायश्चित्तिरिति; स यद्युपनिवर्त्तयेत्स्वर्गाल्लोकाद्यजमान मावर्त्तये दत्रैवास्मा उपविष्टायैत मग्निहोत्रपरिशेष माहरेयुस्तस्य यथोन्नीती स्यात् , तथा जुहुयात् ; सा तत्र प्रायश्चित्तिः"–इति । अग्निहोत्रद्रव्यं गार्हपत्ये ऽधिश्रितं, पाकादूर्द्ध्व मादाय प्राङ्मुख आहवनीयं प्रति 'उदायन्' उद्गच्छन् अध्वर्युर्यदा भवति, तदानीं तद्द्रव्यं 'स्खलते' यद्वा 'भ्रंशते' । बिन्दुपतनं स्खलनम् , साकल्येन द्रव्यपतनं भ्रंशः । पुनरप्यग्निहोत्रस्थाल्या द्रव्यं गृहीतुं सोऽध्वर्युर्यदि पश्चिमाभिमुखो निवृत्तो भवेत् , तदानीं स्वर्गप्राप्तं यजमानं तस्माल्लोकादावर्त्तयेत् । अतो निवृत्ति मकृत्वा स्खलन-भ्रंशदेश एवोपविष्टाय 'अस्मै' अध्वर्यवे स्थालीगत मग्निहोत्रद्रव्यशेष मन्ये पुरुषाः आहरेयुः । 'तस्य' द्रव्यस्य स्वीकारेण अध्वर्युर्यथोन्नीती स्यात् , तथा जुहुयात् । 'उन्नीतम्' उन्नयनं स्थालीगतस्य द्रव्यस्याग्निहोत्रहवण्यां चतुर्वारं प्रक्षेपः ; "चतुरुन्नयति"–इति श्रुतत्वात् । उन्नयनादिसंस्कारपूर्वकं जुहुयादित्यर्थः * ॥

पञ्चदशे प्रश्नोत्तरे दर्शयति—"तदाहुरथ यदि स्रुग्भिद्येत, का तत्र प्रायश्चित्तिरित्यन्यां स्रुच माहृत्य जुहुयादथैतां स्रुचं भिन्ना

---

* आश्व श्रौ० २, १०, २१ सू० द्र० ।

माहवनीये ऽभ्यादध्यात् प्राग्दण्डां प्रत्यक्पुष्करां; सा तत्र प्रायश्चित्तिः”-इति । ‘स्रुग्’ अग्निहोत्रहवणी, तद्भेदे स्रुगन्तरेण हुत्वा भिन्नां स्रुच माहवनीये प्रक्षिपेत् । तदानीं तदीयो दण्डः प्राच्या मवस्थितः, तदीयं ‘पुष्कर” बिलं प्रतीच्या मवस्थितम्, यथा भवति तथा प्रक्षिपेत् ॥ *

षोडशे प्रश्नोत्तरे दर्शयति— “तदाहुर्यस्याहवनीये ऽग्निर्वि-द्येताथ गार्हपत्य उपशाम्येत्, का तत्र प्रायश्चित्तिरिति ; स यदि प्राञ्च मुद्धरेदायतनाच्यवेत, यत्प्रत्यञ्च मसुरवद्यज्ञं तन्वीत, यदन्येद् भ्रातृव्यं यजमानस्य जनयेद्, यदनुगमयेत्प्राणो यजमानं जह्यात् ; सर्व मेवैनं सह भस्मानं समोप्य, गार्हपत्यायतने निधायाथ प्राञ्च माहवनीय मुद्धरेत् ; सा तत्र प्रायश्चित्तिः”-इति । प्रतिदिन माहवनीयाग्निर्होमादूर्ध्व मुपशाम्यति ; गार्हपत्याग्निस्तु सर्वदा धार्यते ; तस्माद्गार्हपत्यात् तत्तद्धोमकाले आहवनीयार्थ मग्निं विहरेदित्येषो ऽनुष्ठानक्रमः । एवं सति यदि कदाचिदाहव-नीयस्य स्थाने अग्निरनुपशान्तो विद्येत, तदानीं गार्हपत्यश्चोप-शाम्येत् ; तत्रत्यवैकल्यस्य परिहाराय पक्षाः पञ्चविधाः सम्भवन्ति । विद्यमान माहवनीयं गार्हपत्यतया सम्भाव्य, ततोऽपि पूर्वदेशे आहवनीयं कर्तुं तस्मात् पूर्वसिद्धाहवनीयात् प्राञ्च मग्नि मुद्धरे-दिति प्रथमः पक्षः । तस्मिन् पक्षे यजमानः ‘आयतनात्’ स्वकीय-स्थानात् प्रच्यवेत ; आहवनीयस्थानात् प्रच्युतत्वात् । अथ गार्ह-पत्यार्थं पूर्वसिद्धादाहवनीयात् प्रत्यञ्च मग्नि मुद्धरेदिति द्वितीयः पक्षः । अस्मिन् द्वितीयपक्षे यज्ञ एषो ऽसुरयज्ञसमानः स्यात् । असुरयज्ञश्च शाखान्तरे तामसुरान् प्रकृत्यैव माम्नायते— “त

---

* भाष्यपुस्तकेष्विहैव चतुर्थखण्डसमाप्तिः ।

आहवनीय मग्र आ दधत, अथ गार्हपत्यम्, अथान्वाहार्यपचनम्"–इति (तै० ब्रा० १. १. ४. ४.)। तदीयदोषोऽपि तत्रैवाम्नातः—"भद्रा भूत्वा परा भविष्यन्ति"–इति। गार्हपत्यार्थमग्निमन्थनं कर्तव्य मिति तृतीयः पक्षः। तदानीं विद्यमान आहवनीये तद्विरोधिनोऽग्न्यन्तरस्य मन्थनाद्यजमानस्य शत्रु मुत्पादयेत्। पुनराधानं कर्तुं विद्यमान माहवनीयम् 'अनुगमयेत्' उपशमयेदिति चतुर्थः पक्षः। तस्मिन् पक्षे विद्यमानस्य विनाशनात् प्राणो यजमानं परित्यजेत्। आहवनीयगतं भस्मसहितं सर्वमप्यग्निं कस्मिंश्चित् पात्रे प्रक्षिप्य, नीत्वा, गार्हपत्यस्थाने प्रक्षिप्य, अनन्तरं ततो गार्हपत्यात् प्राञ्च माहवनीय मुद्धरेदिति पञ्चमः पक्षः। अस्मिन् पक्षे दोषाभावात् सैव प्रायश्चित्तिर्भवति * ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) चतुर्थः खण्डः ॥ ४ (५) ॥

॥ अथ पञ्चमः खण्डः ॥

तदाहुर्यस्याग्नावग्नि मुद्धरेयु॑ः का तत्र प्रायश्चित्ति रि॑ति स यद्य॑नुपश्येदुद्धृत्य पूर्व मपरं निदध्या॑द्यद्यनानुपश्ये॑त्सो ऽग्नये ऽग्निवते॑ ऽष्टाकपाल॑ं पुरोळाशं

आश्व० श्रौ० ३. १२. २० ।

निर्वपेत्तस्य याज्यानुवाक्ये अग्निनाग्निः समिध्यते त्वं ह्यग्ने अग्निनेत्याहुतिं वाहवनीये जुहुयादग्नयेऽग्निवते स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्यस्य गार्हपत्याहवनीयौ मिथः संसृज्येयातां का तत्र प्रायश्चित्तिरिति सोऽग्नये वीतयेऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये अग्न आयाहि वीतये यो अग्निं देववीतय इत्याहुतिं वाहवनीये जुहुयादग्नये वीतये स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्यस्य सर्व एवाग्नयो मिथः संसृज्येरन् का तत्र प्रायश्चित्तिरिति सोऽग्नये विविचयेऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये स्वर्ण वस्तोरुषसा मरोचि त्वा मग्ने मानुषीरीळते विश इत्याहुतिं वाहवनीये जुहुयादग्नये विविचये स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्नयोऽन्यैरग्निभिः संसृज्येरन् का तत्र प्रायश्चित्तिरिति सोऽग्नये क्षामवतेऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये अक्रन्ददग्नि * स्तनयन्निव द्यौरधा यथा नः पितरः परास इत्याहुतिं वाहवनीये जुहुयादग्नये क्षामवते स्वाहेति सा तत्र प्रायश्चित्तिः ॥ ५ (६) ॥

---

* ग-पुस्तके सविसर्गपाठः ।

सप्तदशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्नावग्नि मुद्धरेयुः, का तत्र प्रायश्चित्तिरिति; स यद्यनुपश्येदुद्धृत्य पूर्व मपरं निदध्याद् यद्यनानुपश्येत्, सो ऽग्नये ऽग्निवते ऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये 'अग्निनाग्निः समिध्यते'–'त्वं ह्यग्ने अग्निनेत्याहुतिं वाहवनीये जुहुयादग्नये ऽग्निवते स्वाहेति ; सा तत्र प्रायश्चित्तिः"–इति । सायम्प्रातराहवनीयेऽग्नौ स्थित एवं सति पुनरपि गार्हपत्याग्निं य उद्धरेयुः, तदानीं मुद्धृतस्याग्नेः प्रक्षेपात् पूर्व मेव विद्यमानस्याग्नेः दर्शनम् । तं 'पूर्वं' विद्यमान मग्निम् 'उद्धृत्य' तस्मादाहवनीयस्थानादुद्धृत्य, तस्मिन् स्थाने पुनः 'अपरम्' इदानीं मानीत मग्निं निदध्यात् । यदि विद्यमानं ('अनानुपश्येत्') नानुपश्येत्, तदानीं मानीत मग्निं तत्र प्रक्षिप्य, पश्चादग्निद्वय मवगत्य 'अग्निवते ऽग्नये' देवतायै पुरोडाशं निरूप्य, तस्यैते याज्यानुवाक्ये कुर्यात् । "अग्निनाग्निः"–इति (ऋ० सं० १. १२. ६.) पुरोनुवाक्या, "त्वं ह्यग्ने अग्निना"–इति (ऋ० सं० ८. ४३. १४.) याज्या । सोऽय मेकः पक्षः । दर्विहोमवद्याज्यानुवाक्ये परित्यज्य "अग्नये ऽग्निवते स्वाहा"–इतिमन्त्रेण आहवनीये आज्यं जुहुयादिति * द्वितीयः पक्षः ॥

अष्टादशे प्रश्नोत्तरे दर्शयति—"तदाहुर्यस्य गार्हपत्याहवनीयौ मिथः संसृज्येयातां, का तत्र प्रायश्चित्तिरिति ; सो ऽग्नये वीतये ऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये 'अग्न आ याहि वीतये'–'यो अग्निं देववीतय इत्याहुतिं † वाहवनीये जुहुयादग्नये

---

* आग्नेयीष्विष्टिषु एषा अन्यतमाग्निवतीष्टिः । तथाहि "अथाग्नेय्य इष्टयः"–इत्यधिकारे "साग्नावग्निप्रणयनेऽग्निवते"–इति आश्व० श्रौ० ३. १३, ३, १२ । *

† ऋ० सं० ६. १६. १०, १, १२. ९ ।

वीतये स्वाहेति; सा तत्र प्रायश्चित्तिः"—इति । अग्न्युद्धरणादूर्ध्वं व्यवस्थितयोराहवनीयगार्हपत्ययोः सतोर्यदि गार्हपत्यगतोऽङ्गार आहवनीये प्रमादात् पतेत्, आहवनीयगतो वा गार्हपत्ये पतेत्, सोऽयं 'मिथः संसर्गः'; तत्र प्रायश्चित्तार्थस्य पुरोडाशस्य 'वीति'-गुणयुक्तो ऽग्निर्देवता * । अन्यत् पूर्ववद् व्याख्येयम् ॥

एकोनविंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्य सर्व एवाग्नयो मिथः संसृज्येरन्, का तत्र प्रायश्चित्तिरिति; सो ऽग्नये विविचये ऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये 'स्वर्ण वस्तोरुषसा मरोचि'—'त्वा मग्ने मानुषीरीळते विश इत्याहुतिं † आहवनीये जुहुयादग्नये विविचये स्वाहेति; सा तत्र प्रायश्चित्तिः" —इति । आहवनीय-गार्हपत्य-दक्षिणाग्नीनां सर्वेषां परस्पर-संसर्गे सति 'विविचि'-गुणयुक्तोऽग्निः पुरोडाशदेवता ‡ । अन्यत् पूर्ववद् व्याख्येयम् ॥

विंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्नयो ऽन्यैरग्निभिः संसृज्येरन्, का तत्र प्रायश्चित्तिरिति; सो ऽग्नये क्षामवते ऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये 'अक्रन्ददग्नि स्तनयन्निव द्यौः'—'अधा यथा नः पितरः परास इत्याहुतिं § आहवनीये जुहुयादग्नये क्षामवते स्वाहेति; सा तत्र प्रायश्चित्तिः" —इति । 'यस्य' अग्निहोत्रिणः सम्बन्धिन आहवनीयाद्यग्नयोऽन्यदीयैराहवनीयादिभिर्लौकिकाग्निभिर्वा संसृज्येरन्, तस्य प्राय-

---

* "गार्हपत्याहवनीययोर्वीतये"—इति आश्व० श्रौ० ३. १३. ५ ।

† ऋ० सं० ७. १०. २; ५. ८. ३ ।

‡ "मिथश्चेद् विविचये"—इति आश्व० श्रौ० ३. १३. ५ ।

§ ऋ० सं० १०. ४५. ४; ४. २. १६ ।

क्षित्यर्थे पुरोडाशे क्षामवद्-गुणयुक्तो ऽग्निर्देवता * । अन्यत् पूर्ववद् व्याख्येयम् ॥ ५ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) पञ्चमः खण्डः ॥ ५ (६) ॥

॥ अथ षष्ठः खण्डः ॥

तदाहुर्यस्याग्नयो ग्राम्येणाग्निना सन्दह्येरन्॑ का तत्र प्रायश्चित्तिरिति॑ सो ऽग्नये संवर्गायाष्टाकपालं॑ पुरोळाशं निर्वपे॑त्तस्य याज्यानुवाक्ये॑ कुवित्सु नो॑ गविष्टये॑ मा नो अस्मिन्महाधन इत्याहुतिं वाहवनीये॑ जुहुयादग्नये संवर्गाय स्वाहेति॑ सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्नयो दिव्येनाग्निना संसृज्येरन्॑ का तत्र प्रायश्चित्तिरिति॑ सो ऽग्नये ऽप्सुमते॑ ऽष्टाकपालं॑ पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये अप्स्वग्ने सधिष्टव॑

---

* आश्व० श्रौ० ६, १२, ४ । तै० ब्रा० ३, ७, ४, ५ । तै० सं० २, २, २, ४, ५ । मी० द० जै० सू० ६, ४, १७–२१ ; अधि ५ । "ग्रामवत्यादिना यद्वत् कर्मणा पृतनापते । दैवदोषादकस्मो जाते दीपकदग्धके । होमेनैकेन दोषाणां चतुर्णां चय मादिशेत्"—इति भ०पु० । 'एवञ्च एकप्रायश्चित्तेनानेकदोषक्षयाय क्षामवतीष्टिः सर्वत्र द्रष्टव्या'—इति प्रा०त० ।

मयो दधे मेधिरः पूतदक्ष इत्याहुतिं वाहवनीये जुहुयादग्नये ऽप्सुमते स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्नयः शवाग्निना संसृज्येरन् का तत्र प्रायश्चित्तिरिति सो ऽग्नये शुचये ऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये अग्निः शुचिव्रततम उदग्ने शुचयस्तवेत्याहुतिं वाहवनीये जुहुयादग्नये शुचये स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्नय आरण्येनाग्निना सन्दह्येरन् का तत्र प्रायश्चित्तिरिति समे वारोपयेदरणी वोल्मुकं वा मोचयेद्यद्याहवनीयाद्यदि गार्हपत्याद्यदि न शक्नुयात्सो ऽग्नये संवर्गायाष्टाकपालं पुरोळाशं निर्वपेत्तस्योक्ते याज्यानुवाक्ये आहुतिं वाहवनीये जुहुयादग्नये संवर्गाय स्वाहेति सा तत्र प्रायश्चित्तिः ॥ ६ (७) ॥

एकविंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्नयो ग्राम्येणाग्निना सन्दह्येरन्, का तत्र प्रायश्चित्तिरिति; सो ऽग्नये संवर्गायाष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये 'कुवित्सु नो गविष्टये'–'मा नो अस्मिन् महाधने' इत्याहुतिं * वाहवनीये जुहुयादग्नये संवर्गाय स्वाहेति; सा तत्र प्रायश्चित्तिः"–इति। 'ग्राम्योऽग्निः' महानसादिगतः। स कदाचित् प्रमादेन प्रवृद्धो ग्रामगतानि गृहाणि दहन्नग्निहोत्रशालागतानाहवनीयादीन-

---

* ऋ० सं० ८. ७५. ११; १२।

ग्नीन् सम्यग् दहति, तदानीं प्रायश्चित्तस्य पुरोडाशस्य 'संवर्ग'-गुणयुक्तो ऽग्निर्देवता *। अन्यत् पूर्ववत् ॥

द्वाविंशे प्रश्नोत्तरे दर्शयति—"तदाहुर्यस्याग्नयो दिव्येनाग्निना संसृज्येरन्, का तत्र प्रायश्चित्तिरिति; सो ऽग्नये ऽप्सुमते ऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये 'अप्स्वग्ने सधिष्टव'-'मयो दधे मेधिरः पूतदक्ष इत्याहुतिं † वाहवनीये जुहुयादग्नये ऽप्सुमते स्वाहेति; ;सा तत्र प्रायश्चित्तिः"-इति। 'दिव्याग्निः' वैद्युतः। अशनिपाते सति तदीयेनाग्निना आहवनीयादीनां संसर्गे प्रायश्चित्तस्य पुरोडाशस्य 'अप्सुमान्' अग्निर्देवता ‡। अन्यत् पूर्ववत् ॥

त्रयोविंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्नयः शवाग्निना संसृज्येरन्, का तत्र प्रायश्चित्तिरिति; सो ऽग्नये शुचये ऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये 'अग्निः शुचिव्रततम'-'उदग्ने शुचयस्तवेत्याहुतिं § वाहवनीये जुहुयादग्नये शुचये स्वाहेति; सा तत्र प्रायश्चित्तिः"-इति। प्रेतदहनाय प्रवृत्तोऽग्निः 'शवाग्निः'। तत्संसर्गे पुरोडाशस्य 'शुचि'-गुणयुक्तो ऽग्निर्देवता । अन्यत् पूर्ववद् व्याख्येयम् ॥

चतुर्विंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्याग्नय आरण्येनाग्निना सन्दह्येरन्, का तत्र प्रायश्चित्तिरिति; समे वारोपयेदरणी वोल्मुकं वा मोक्षयेद्; यद्याहवनीयाद्यदि गार्हपत्याद्; यदि न

---

* "ग्राम्येण संवर्गाय"-इति आश्व० श्रौ० ३, ११.७।

† ऋ० सं० ८, ४३.९, ३.१.२।

‡ "वैद्युतेऽप्सुमते"-इति आश्व० श्रौ० ३, १३.८।

§ ऋ० सं० ८, ४४, २१, १७।

‖ "शवे संसर्गेऽग्निमाद्येन" इति आश्व० श्रौ० ३, १३, ४

यान्नुयात्, सो ऽग्नये संवर्गायाष्टाकपालं पुरोळाशं निर्वपेत्; तस्योक्ते याज्यानुवाक्ये * आहुतिं वाहवनीये जुहुयादग्नये संवर्गाय स्वाहेति; सा तत्र प्रायश्चित्तिः"–इति। दावाग्निररण्यादागत्य अग्निहोत्रशालां दहन्नाहवनीयादीन् यदा सम्यग् दहति, तदानीं तद्दहनात् पूर्वमेवाग्नीन् 'अरणी' द्वयोररण्योः सह समारोपयेदेव। तदशक्तौ गार्हपत्याहवनीयात् 'उल्मुकं मोचयेत्' सहसोल्मुकमादाय परितो गच्छेत्। समारोपणं वोल्मुकमोचनं वेति पक्षद्वयस्य अग्निदाहत्वरया यदा न शक्तिः, तदा 'संवर्ग'–गुणयुक्तो ऽग्निः पुरोडाशदेवता †। तदीययाज्यानुवाक्ये च पूर्वमेवाभिहिते (३१पृ० १२पं०) ॥ ६ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) षष्ठः खण्डः ॥ ६ (७) ॥

॥ अथ सप्तमः खण्डः ॥

तदाहुर्य आहिताग्नि॑रुपवसथे ऽश्रु कुर्वी॑त का तत्र प्रायश्चित्तिरिति॑ सो ऽग्नये व्रतभृते॑ ऽष्टाकपालं पुरोळाशं निर्वपे॑त्तस्य याज्यानुवाक्ये॑ त्व मग्ने व्रतभृच्छुचि॑र् व्रतानि बिभ्रद् व्रतपा अदब्ध इत्या॑हुतिं

---

* ऋ० सं० ८, ४४, २१, १७।

† "अग्नये संवर्गाय [illegible]"–इति कात्या० श्रौ० २५, ४, ३१।

वाहवनीये जुहुयादग्नये व्रतभृते स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निरुपवसथे ऽश्रु प्रपद्येत का तत्र प्रायश्चित्तिरिति सो ऽग्नये व्रतपतये ऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये त्वमग्ने व्रतपा असि यद्वो वयं प्र मिनाम व्रतानीत्याहुतिं वाहवनीये जुहुयादग्नये व्रतपतये स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निरमावास्यां पौर्णमासीं वातीयात् * का तत्र प्रायश्चित्तिरिति सोऽग्नये पथिकृते ऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये वेत्था हि वेधो अध्वन आ देवानामपि पन्था मगन्मेत्याहुतिं वाहवनीये जुहुयादग्नये पथिकृते स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्यस्य सर्वं एवाग्नय उपशाम्येरन् का तत्र प्रायश्चित्तिरिति सो ऽग्नये तपस्वते जनद्वते पावकवते ऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये आ याहि तपसा जनेष्वा नो याहि तपसा जनेष्वित्याहुतिं वाहवनीये जुहुयादग्नये तपस्वते जनद्वते पावकवते स्वाहेति सा तत्र प्रायश्चित्तिः ॥ ७ (८) ॥

पञ्चविधे प्रश्नोत्तरे दर्शयति— “तदाहुर्य आहिताग्निरुपवसथे ऽश्रु कुर्वीत , का तत्र प्रायश्चित्तिरिति ; सो ऽग्नये व्रतपते

---

* “वा अतीयात्” क ।

ऽष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये 'त्व मग्ने व्रतभृच्छुचिर्'-'व्रतानि बिभ्रद् व्रतपा अदब्ध इत्याहुतिं वाहवनीये जुहुयादग्नये व्रतभृते स्वाहेति ; सा तत्र प्रायश्चित्तिः"—इति । 'उपवसथे' यजनीयदिनात् पूर्वदिने शिरोव्यथादिना मृतबन्धुश्रवणादिना वा नेत्रयोरश्रुमोचने पुरोडाशस्य 'व्रतभृद्'-गुणकोऽग्निर्देवता । त्व मग्ने व्रतभृदित्यादिके सूत्रकारेण पठिते याज्यानुवाक्ये * ॥

षड्विंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निरुपवसथेऽव्रत्य मापद्येत, का तत्र प्रायश्चित्तिरिति ; सोऽग्नये व्रतपतयेऽष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये 'त्व मग्ने व्रतपा असि'-'यद्वो वयं प्र मिनाम व्रतानी'त्याहुतिं † वाहवनीये जुहुयादग्नये व्रतपतये स्वाहेति ; सा तत्र प्रायश्चित्तिः"—इति । व्रतविरुद्धं निषिद्धाचरणम् 'अव्रत्य' दिवास्वापादिकम् 'आपद्येत' प्राप्नुयात्, तत्र 'व्रतपति'-गुणयुक्तोऽग्निः पुरोडाशदेवता‡ ॥

सप्तविंशे प्रश्नोत्तरे दर्शयति—"तदाहुर्य आहिताग्निरमावास्यां पौर्णमासीं वातीयात्, का तत्र प्रायश्चित्तिरिति ; सोऽग्नये पथिकृतेऽष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये 'वेत्था हि वेधो अध्वन'-'आ देवाना मपि पन्था मगन्मे'त्याहुतिं § वाहवनीये जुहुयादग्नये पथिकृते स्वाहेति ; सा तत्र प्रायश्चित्तिः"

---

* "अग्निर्व्रतभृद् । त्व मग्ने व्रतभृच्छुचिरग्ने०—०व्रतानि बिभ्रद् व्रतपा०—०एषे-भार्ज्ञानुपाति"—इति आश्व० श्रौ० ३. १२. १२–१५ ।

† ऋ० सं० ८, ११. १, १०. २. ४ ।

‡ "व्रतातिपत्तौ व्रतपतये"—इति आश्व० श्रौ० ३. १ . २ ।

§ ऋ० सं० ६. १६. ३, १०. २. ३ ।

इति । आहिताग्निरमावास्येष्टिं पौर्णमासेष्टिं वा यदि कदाचिदतिक्रामेत्, तदा 'पथिकृद्'-गुणयुक्तोऽग्निः पुरोडाशदेवता* ॥

अष्टाविंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्यस्य सर्व एवाग्नय उपशाम्येरन्, का तत्र प्रायश्चित्तिरिति; सोऽग्नये तपस्वते जनद्वते पावकवतेऽष्टाकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये 'आ याहि तपसा जनेषु'-'आ नो याहि तपसा जनेष्वित्याहुतिं† वाहवनीये जुहुयादग्नये तपस्वते जनद्वते पावकवते स्वाहेति; सा तत्र प्रायश्चित्तिः"-इति । आहवनीय-गार्हपत्य-दक्षिणाग्नीनां सर्वेषा मुपशान्तौ 'तपस्वज्जनद्वत्पावकवद्'-गुणयुक्तोऽग्निः पुरोडाशदेवता ‡ ॥ ७ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) सप्तमः खण्डः ॥ ७ (८) ॥

॥ अथ अष्टमः खण्डः ॥

तदाहुर्य आहिताग्निरा॑ग्रयणेनानिष्ट्वा॑ नवान्नं॑ प्राश्नीयात्॑ का तत्र प्रायश्चित्तिरिति॑ सोऽग्नये वैश्वानराय॑ द्वादशकपालं पुरोळाशं निर्वपेत्त॑स्य याज्यानु-

---

* "यदि त्वतीयादमावास्यां पौर्णमासीं वा"-इति आश्व० श्रौ० ३. १०. १०—१२ ।

† आश्व० श्रौ० ३. १२. २७. ३० ।

‡ "तत इष्टिरग्निस्तपस्वान् जनद्वान् पावकवान्"-इति आश्व० श्रौ० ३. १२. २९ ।

वाक्ये वैश्वानरो अजीजनत् पृष्टो दिवि पृष्टो अग्निः पृथिव्यामित्याहुतिं वाहवनीये जुहुयादग्नये वैश्वानराय स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निर्यदि कपालं नश्येत् का तत्र प्रायश्चित्तिरिति सो ऽश्विभ्यां द्विकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये अश्विना वर्त्तिरस्मद् आ गोमता नासत्या रथेनेत्याहुतिं वाहवनीये जुहुयादश्विभ्यां स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निर्यदि पवित्रं नश्येत् का तत्र प्रायश्चित्तिरिति सो ऽग्नये पवित्रवते ऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये पवित्रं ते विततं ब्रह्मणस्पते तपोष्पवित्रं विततं दिवस्पद इत्याहुतिं वाहवनीये जुहुयादग्नये पवित्रवते स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निर्यदि हिरण्यं नश्येत् का तत्र प्रायश्चित्तिरिति सो ऽग्नये हिरण्यवते ऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये हिरण्यकेशो रजसो विसार आ ते सुपर्णा अमिनन्तँ एवैरित्याहुतिं वाहवनीये जुहुयादग्नये हिरण्यवते स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निर्यदि प्रातरस्नातो ऽग्निहोत्रं जुहुयात् का तत्र प्रायश्चित्तिरिति सो ऽग्नये वरुणा-

याष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये त्वं नो अग्ने वरुणस्य विद्वान्त्स त्वं नो अग्ने ऽवमो भवोतीत्याहुतिं आहवनीये जुहुयादग्नये वरुणाय स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निर्यदि सूतकान्नं प्राश्नीयात् का तत्र प्रायश्चित्तिरिति सो ऽग्नये तन्तुमते ऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये तन्तुं तन्वन्रजसो भानु मन्विह्यक्षानहो नह्यत नोत सोम्या इत्याहुतिं आहवनीये जुहुयादग्नये तन्तुमते स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निर्जीवे मृतशब्दं श्रुत्वा का तत्र प्रायश्चित्तिरिति सोऽग्नये सुरभिमते ऽष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये अग्निर्होता न्यसीदद्यजीयान्त्साध्वी मकर्देववीतिं नो अद्येत्याहुतिं आहवनीये जुहुयादग्नये सुरभिमते स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्य आहिताग्निर्यस्य भार्या गौर्वा यमौ जनयेत् का तत्र प्रायश्चित्तिरिति सो ऽग्नये मरुत्वते त्रयोदशकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये मरुतो यस्य हि क्षये ऽरा इवेदचर मा अहेवेत्याहुतिं आहवनीये जुहुयादग्नये मरुत्वते स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुरपत्नीको

ऽप्यग्निहोत्र माहरे३त् नाहरे३त् इति आहरेदित्याहुर्यदि नाहरेदनद्धापुरुषः कोऽनद्धापुरुष इति न देवान्न पितॄन्न मनुष्या इति तस्मादपत्नीको ऽप्यग्निहोत्र माहरेत्तदेषाभियज्ञगाथा गीयते यजेत् सौत्रामण्या मपत्नीको ऽप्यसोमपः मातापितृभ्या मनृणार्थाद्यजेतेति वचनाच्छ्रुतिरिति तस्मात् सौम्यं याजयेत् ॥ ८ (९) ॥

एकोनत्रिंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निराग्रयणेनानिष्ट्वा नवान्नं प्राश्नीयात्, का तत्र प्रायश्चित्तिरिति ; सोऽग्नये वैश्वानराय द्वादशकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये 'वैश्वानरो अजीजनत्'–'पृष्टो दिवि पृष्टो अग्निः पृथिव्या मित्याहुतिं * वाहवनीये जुहुयादग्नये वैश्वानराय स्वाहेति ; सा तत्र प्रायश्चित्तिः"–इति । गृहेषु नवधान्ये समागते सति, आग्रयणेष्टिं कृत्वा पश्चात् नवान्नं भोक्तव्यम् ; तस्या इष्टेरकरणे 'वैश्वानर'–गुणयुक्तो ऽग्निः † पुरोडाशदेवता ।

त्रिंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निर्यदि कपालं नश्येत्, का तत्र प्रायश्चित्तिरिति; सोऽश्विभ्यां द्विकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये 'अश्विना वर्तिरस्मद्'–'आ गोमता नासत्या रथेनेत्याहुतिं ‡ वाहवनीये जुहुयादश्विभ्यां

---

* आश्व० श्रौ० २. १४. २ द्र०।

† आश्व० श्रौ० ३. [illegible]. ८। ऋ० १. ६. ८।

‡ ऋ० सं० १. ९२. १६, ७. ७२. १।

स्वाहेति ; सा तत्र प्रायश्चित्तिः”-इति । ‘य आहिताग्निः’ यस्य आहिताग्नेः पुरोडाशनिष्पादकं ‘कपालं’ यदि नश्येत्, तदानीमश्विनौ पुरोडाशदेवते * ॥

एकत्रिंशे प्रश्नोत्तरे दर्शयति— “तदाहुर्य आहिताग्निर्यदि पवित्रं नश्येत्, का तत्र प्रायश्चित्तिरिति ; सोऽग्नये पवित्रवतेऽष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये ‘पवित्रं ते विततं ब्रह्मणस्पते’-‘तपोष्पवित्रं विततं दिवस्पद’ इत्याहुतिं † वाहवनीये जुहुयादग्नये पवित्रवते स्वाहेति ; सा तत्र प्रायश्चित्तिः”-इति । आहिताग्नेः पवित्रनाशे ‘पवित्रवद्’-गुणयुक्तोऽग्निः ‡ पुरोडाशदेवता ॥

द्वात्रिंशे प्रश्नोत्तरे दर्शयति— “तदाहुर्य आहिताग्निर्यदि हिरण्यं नश्येत्, का तत्र प्रायश्चित्तिरिति ; सोऽग्नये हिरण्यवतेऽष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये ‘हिरण्यकेशो रजसो विसार’-‘आ ते सुपर्णा अमिनन्तँ एवैरित्याहुतिं § वाहवनीये जुहुयादग्नये हिरण्यवते स्वाहेति ; सा तत्र प्रायश्चित्तिः”-इति । आहिताग्नेर्हिरण्यनाशे ‘हिरण्यवद्’-गुणयुक्तोऽग्निः पुरोडाशदेवता ॥

त्रयस्त्रिंशे प्रश्नोत्तरे दर्शयति— “तदाहुर्य आहिताग्निर्यदि प्रातरस्नातोऽग्निहोत्रं जुहुयात्, का तत्र प्रायश्चित्तिरिति ; सोऽग्नये वरुणायाष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये

---

* आश्व० श्रौ० ३. १२. ९, १० ।

† ऋ० सं० ९. ८३. १, २ ।

‡ आश्व० गृ० ३, ९ ।

§ ऋ० सं० १. ७९, १, २ ।

'त्वं नो अग्ने वरुणस्य विद्वान् त्वं नो अग्ने ऽवमो भवोती'त्याहुतिं * आहवनीये जुहुयादग्नये वरुणाय स्वाहेति ; सा तत्र प्रायश्चित्तिः"-इति । आहिताग्नेः [illegible] 'वरुण'-गुणको ऽग्निः पुरोडाशदेवता * ॥

चतुस्त्रिंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निर्वहि सूतकान्नं प्राश्नीयात् , का तत्र प्रायश्चित्तिरिति ; सो ऽग्नये तन्तुमते ऽष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये 'तन्तुं तन्वन्रजसो भानुमन्विहि'-'अक्षानहो नह्यतनोत सोम्या इत्याहुतिं † आहवनीये जुहुयादग्नये तन्तुमते स्वाहेति ; सा तत्र प्रायश्चित्तिः"-इति । आहिताग्नेः सूतकान्नप्राशने 'तन्तुमद्'-गुणको-ऽग्निर्देवता ‡ ॥

पञ्चत्रिंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निर्जीवे मृतप्रवादं श्रुत्वा, का तत्र प्रायश्चित्तिरिति ; सोऽग्नये सुरभिमते ऽष्टाकपालं पुरोळाशं निर्वपेत् ; तस्य याज्यानुवाक्ये अग्निर्होता न्यसीदद्यजीयान्'-'साध्वीमकर्देववीतिं नो अद्ये'त्याहुतिं § आहवनीये जुहुयादग्नये सुरभिमते स्वाहेति ; सा तत्र प्रायश्चित्तिः"-इति । आहिताग्निः स्वस्मिन् जीवत्येव स्वकीयमरणप्रवादं यदा केनचिन्मुखाच्छृणुयात् , तदानीं 'सुरभि'-मद्गुणयुक्तो ऽग्निर्देवता ‖ ॥

षट्त्रिंशे प्रश्नोत्तरे दर्शयति— "तदाहुर्य आहिताग्निर्यस्य

---

* ऋ॰ सं॰ ४. १. ४, ५ ।

† ऋ॰ सं॰ १०. ५३. ६, ७ ।

‡ आप॰ श्रौ॰ ९. ८. ५. ६ । शाङ्खा॰ श्रौ॰ ५. ४ ।

§ ऋ॰ सं॰ ५. १, ६, १०. ५३. ३ ।

‖ "[illegible] यत्र जीवे मृतप्रवादः"-इति आप॰ श्रौ॰ ९, १६, ११ ।

भार्या गौर्वा यमौ जनयेत्, का तत्र प्रायश्चित्तिरिति; सो ऽग्नये मरुत्वते त्रयोदशकपालं पुरोळाशं निर्वपेत्; तस्य याज्यानुवाक्ये 'मरुतो यस्य हि क्षये'—'ऽरा इवेदचरमा अहेवेत्याहुतिं* वा यजनीये जुहुयादग्नये मरुत्वते स्वाहेति; सा तत्र प्रायश्चित्तिः"—इति । आहिताग्निर्योऽस्ति, तस्येत्यस्मिन्नर्थे यस्येति शब्दः प्रयुक्तः; 'तस्य' आहिताग्नेर्भार्या वा तद्गृहावस्थिता गौर्वा 'यमौ' अपत्यद्वयं सह जनयेत्, तदानीं 'मरुत्वद्'-गुणयुक्तो ऽग्निर्देवता† ॥

सप्तविंशे पर्याये कञ्चिद्विचार मुद्भावयति— "तदाहुरपत्नीको ऽप्यग्निहोत्र माहरे३त्, नाहरे३त्?"—इति । पुरुषे जीवति सति तदा भार्या म्रियते, तदानी माहितैरग्निभिर्भार्याया दाह इत्येकः पक्षः । तथा च मनुः (५. १६७.)—

"भार्यायै पूर्वमारिण्यै दत्त्वाग्नीनन्त्यकर्मणि ।
पुनर्दारक्रियां कुर्यात् पुनराधान मेव च ॥"—इति ।

आहितेभ्यो ऽग्निभ्योऽन्येनाग्निना भार्यां दहेदिति द्वितीयः । तथा चाश्वलायनः— "आहार्येणानाहिताग्निं पत्नीं च"—इति (श्रौ० ६. १०. ८, १०.) । भारद्वाजोऽप्याह— "निर्मन्थ्येन पत्नीम्"—इति । अस्मिन् पक्षे पुनरपि विवाहेच्छारहितत्वादय मपत्नीक एव वर्त्तते, सोऽग्निहोत्रम् 'आहरेत्' अनुतिष्ठेन्न वेति श्रुतिद्वयं विचारार्थम्‡ ॥

तत्र निर्णयं दर्शयति— "आहरेदित्याहुः"—इति ।

अननुष्ठाने बाधं दर्शयति— "यदि नाहरेदनद्धापुरुषः"—इति ।

---

* ऋ० सं० १. ८६. १, ५. ५८, ५ ।

† "यस्य भार्या गौर्वा यमौ जनयेदिष्टिर्मरुत्वतः"—इति आश्व० श्रौ० ३. १३. १२ ।

‡ "विचार्यमाणानाम्"—इति पा० ८. २. ९७ सू० ।

अद्धेति सत्यनाम *; तद्विपरीतत्वादनद्धः पुरुषः 'अनद्धापुरुषः', अननुष्ठानेनानृती भवेदित्यर्थः॥

प्रश्नोत्तराभ्यां शब्दार्थं निश्चिनोति— "को ऽनद्धापुरुष इति; न देवान्न पितॄन्न मनुष्यानिति †"–इति। अनद्धापुरुषशब्देन को विवक्षितः? इति प्रश्नः। यः पुमान् 'देवान्' पूजयेदिति शेषः, पितॄनपि न पूजयेत्, 'मनुष्यान्' अतिथीनपि न पूजयेत्, तादृशः पुमान् 'अनद्धापुरुषः' इत्युत्तरम्। अग्निहोत्रस्याननुष्ठाने सत्यनद्धापुरुषो भवेदिति ‡॥

विपक्षे बाधं बुद्ध्वा स्वपक्षमुपसंहरति— "तस्मादपत्नीको ऽप्यग्निहोत्रमाहरेत्"–इति॥

उक्तार्थदार्ढ्याय शाखान्तरगतां गाथामुदाहरति – "तदेषाभियज्ञगाथा गीयते"–इति। 'तत्' तस्मिन् अवश्यानुष्ठानरूपे ऽर्थे 'एषा' वक्ष्यमाणा 'यज्ञम्' अभिलक्ष्य सर्वैर्गीयमाना 'यज्ञगाथा' याज्ञिकैः 'गीयते' पठ्यते॥

तां गाथां दर्शयति— "यजेत् सौत्रामण्यामपत्नीको ऽप्यसोमपः। मातापितृभ्यामनृणार्थाद्यजेति वचनाच्छ्रुतिः"–इति। सौत्रामणीयागमपि कुर्यात्, किं सुताग्निहोत्रादिकम्? हविर्यज्ञेष्वप्यधिकारो ऽस्तीत्यर्थः §। तद्वत् सोमयागेष्वधिकारशङ्कायां

---

* निघ० ३. १०. ४।

† आतिरिक्तसर्वमूलपुस्तकेषु 'मनुष्या इति'–इति पाठः।

‡ "अनद्धापुरुष" पुरुषादिष ह वा अनद्धापुरुषो यो न देवानवति, न पितॄन् न मनुष्यान्–इति शत० ब्रा० ६. ३. १. २४। "अनद्धापुरुष मोघते देवपितृमनुष्याणामर्थकम्"–इति कात्या० श्रौ० १६. १. १३।

§ "सायम्प्रातर्होमौ स्थालीपाको नवश्च यः। बलिश्च पितृयज्ञश्चाष्टका सप्तमः पशुः इत्येते पाकयज्ञाः॥ अग्न्याधेयमग्निहोत्रं पौर्णमासामावास्ये। नवेष्टिश्चातुर्मास्यानि पशु-

तदग्निहोत्रं [illegible] । यथा पत्नीरहितोऽपि प्राप्तेऽतिथौ अशनाच्छादनादिकं ददाति, तद्वदग्निहोत्र मपि कुर्यादिति शेषः। अत्र हेतुः 'अनृणार्थात्'-इति, ऋणपरिहारनिमित्तम् । तथा च शाखान्तरे श्रूयते— "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते । ब्रह्मचर्येणर्षिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्य ; एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी"-इति (तै० सं० ६, ३.१०.)। अनेनैवाभिप्रायेण 'स्मृतिः' श्रुतेः । 'यजेति' वचन मस्ति; यज देवान्, अधीष्व वेदान्, प्रजा मुत्पादयेति शाखान्तरे वचन मस्ति ; तस्माद् वचनादनुष्ठानपक्ष एव युक्त इति गाथाया अर्थः । तथा च विष्णुः स्मरति—

"मृतायामपि भार्यायां वैदिकं न त्यजेद् द्विजः ।
उपाधिनापि यत् कर्म यावज्जीवं समापयेत् ॥"-इति ।

उपाधिः कुशमयादिपत्नीकल्पना । तथा च स्मृत्यन्तरम्—

"अन्ये कुशमयीं पत्नीं कृत्वा तु गृहमेधिनः ।
अग्निहोत्र मुपासन्ते यावज्जीव मनुव्रताः ॥"-इति ।

तथा च मैत्रायणीयश्रुतिरप्याम्नायते—

"यस्तु स्वैरग्निभिर्भार्यां संस्करोति कथञ्चन ।
असौ मृतः स्त्री भवति स्त्री चैवास्य पुमान् भवेत् ॥"-इति ।

बन्धोऽत्र सप्तम इत्येते हविर्यज्ञाः ॥ अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशिमांस्ततः । वाजपेयोऽतिरात्रश्चाप्तोर्यामाश्च सप्तम इत्येते सुत्याः"-इति गो० ब्रा० १.५.२३ । "अष्टका पार्वणः श्राद्धं श्रावण्याग्रहायणी । चैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः । अग्न्याधेय मग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः । अग्निष्टोमो ह्यत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयो ऽतिरात्रो ऽप्तोर्याम इति सप्त सोमसंस्थाः"-इति गौ० ध० सू० ८अ० । १भा० ५०पृ० १०पं० सायणीयोक्तं चान्यदपि द्रष्टव्यम् ।

तस्मात् मृतभार्योऽपि स्वकीयानग्नीनवस्थाप्याग्निहोत्र माहरेत् ॥

तदेतदभिप्रेत्योपसंहरति— “तस्मात् सौम्यं याजयेत्”– इति । ऋणापकरणार्थी दोषराहित्यात् ‘सौम्यः’ ; तादृश मवश्य मग्निहोत्रायानुज्ञापयेत् ॥ ८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) अष्टमः खण्डः ॥ ८ (८) ॥

॥ अथ नवमः खण्डः ॥

तदाहुर्वाचापत्नीको ऽग्निहोत्रं॑ कथ मेव जुहोति॑ निविष्टे मृता पत्नी नष्टा वाग्निहोत्रं॑ कथ मग्निहोत्रं जुहोति पुत्रान् पौत्रान्नप्तॄनित्याहुर॑स्मिंश्च लोके ऽमुष्मिं॑श्चास्मिंल्लोके * ऽयं स्वर्गो ऽस्वर्गस्य॑ स्वर्गं लोक माहरोहेत्यमुष्यैव लोकस्य॑ सन्ततिं धारयति यस्यैषा पत्नी नेच्छेत्॑ तस्मादपत्नीकस्याधानं॑ कुर्वन्त्यपत्नीको ऽग्निहोत्रं॑ कथ मग्निहोत्रं॑ जुहोति॑

---

* “॰श्चास्मिन् लोके” क ; “॰चास्मिंल्लोके” ग, घ, ङ, च ।

श्रद्धा पत्नी सत्यं यजमानः श्रद्धा सत्यं तदित्युत्तमं मिथुनं श्रद्धया सत्येन मिथुनेन स्वर्गांल्लोका*ञ्जयतीति ॥ ९ † (१०) ॥

अत ऊर्ध्वं खण्डद्वयं देशविशेषेण केचिदामनन्ति, केचिन्नामनन्ति। अत एव पूर्वनिबन्धकाराः पाठरहितदेशानुसारेण तद्व्याख्यान मुपेक्षितवन्तः; अस्माभिस्तु पाठोपेतदेशानुसारेण तद्व्याख्यायते ॥

पूर्व मपत्नीकस्य वाचिकं मानसं च द्विविध मग्निहोत्रं प्रतिपादनीयम्, तत्र वाचिकविषयं प्रश्न मुद्भावयति— "तदाहुर्वाचापत्नीको ऽग्निहोत्रं कथ मेव जुहोति?"–इति। यो ऽपत्नीकः पुरुषः, तस्य वाचा निष्पाद्यं यदग्निहोत्रं, तत् केन प्रकारेण अनुष्ठातव्यम्? इति प्रश्नः ॥

त मेव प्रश्नं पुनर्विस्पष्टयति— "निविष्टे मृता पत्नी नष्टा वाग्निहोत्रं, कथ मग्निहोत्रं जुहोति?"–इति। नैष्ठिकब्रह्मचर्यादावप्यपत्नीकत्व मस्ति, तत्राग्निहोत्रप्रसङ्ग एव नास्ति, विध्यभावात्; अतो ऽपत्नीकत्वं विशेष्यते। विवाहादूर्ध्व मग्निहोत्रे 'निविष्टे' अनुष्ठातु मुपक्रान्ते सति, पश्चात् पत्नी मृता भवति; तादृशो ऽत्रापत्नीकः। तस्याग्निहोत्रं 'नष्टा वा' नष्ट मेव भवति; पूर्वसिद्धैरग्निभिः पत्नीदाहपक्षे पुनरग्निहोत्रहेतूना मग्नीना मभावात्। अतो ऽपत्नीकः कथ मग्निहोत्रं जुहोति? इति प्रश्नः ॥

---

*. "स्वर्गां लोका" क, ग, घ; "स्वर्गां ल्लोका" ङ; "स्वर्गां ल्लोकान्" च।

† ख-नामकपुस्तके भाष्यपुस्तकीयेयं खण्डो दशमो दशमस्तु नवमः।

तस्योत्तर माह— "पुत्रान् पौत्रान्नप्तॄनित्याहुरस्मिंश्च लोके ऽमुष्मिंश्चास्मिँल्लोके ऽयं स्वर्गो ऽस्वर्गेण स्वर्गं लोक मारुरोहेत्यमुष्यैव लोकस्य सन्ततिं धारयति, यस्यैषां पत्नीं नेच्छेत्; तस्मादपत्नीकस्याधानं कुर्वन्ति"–इति। यो ऽपत्नीको ऽग्निरहितः स्थविरत्वेनानुष्ठातु मशक्तश्च, तादृशः पुमान्, पुत्रादीन् प्रत्येवं ब्रूयात्। आहुरिति बहुवचनं छान्दसम्। हे पुत्र-पौत्र-प्रपौत्राः! शृणुत। अस्मिन् लोके, 'अमुष्मिन्' स्वर्गलोके च श्रेयः सम्पादनीयम्। अस्मिन् लोके तु स्थितैः पुरुषैर्यो ऽयं स्वर्गः, शास्त्रेण श्रुत इति शेषः। तं स्वर्गलोकम् 'अस्वर्गेण' स्वर्गविलक्षणेन कामकर्माकामानुष्ठानेन 'आरुरोह' आरोहेत्। इत्येवं पुत्रादीन् प्रति वाचोपदिशति। एतदेव वाजसनेयिभिर्विस्पष्ट माम्नायते— "तस्मात् पुत्र मनुशिष्टं लोक्य माहुः, तस्मादेन मनु शासति"–इति (शत० ब्रा० १४. ४. ३. २६.)। अनेन पुत्राद्यनुशासनेन अमुष्यैव लोकस्य 'सन्ततिम्' अविच्छेदं 'धारयति' सम्पादयति; कुलपरम्परयाग्निहोत्रानुष्ठानेन सर्वेषां स्वर्गप्राप्तौ तदविच्छेदाभावात्। 'यस्य' यः पुमान् 'एषां पत्नीं नेच्छेत्' स्वस्यानुष्ठातु मशक्तत्वेन पुनर्विवाहसाध्या मेतां पत्नीं नापेक्षेत, तस्मात् तस्य अपत्नीकस्य वाचा प्रेरिताः पुत्रपौत्रादय आधानं कुर्वते। तदाधानपूर्वक मग्निहोत्र मपत्नीकस्य वाचिक मित्युच्यते॥

अथ मानस मग्निहोत्रं प्रश्नोत्तराभ्यां दर्शयति— "अपत्नीको ऽग्निहोत्रं कथ मग्निहोत्रं जुहोति? श्रद्धा पत्नी, सत्यं यजमानः; श्रद्धा सत्यं तदित्युत्तमं मिथुनं; श्रद्धया सत्येन मिथुनेन स्वर्गांल्लोकाञ्जयतीति"–इति। पूर्वोक्तः स्थविरो ऽपत्नीको वा अग्निहोत्रं स्वय मेव मनसा जुहोमीति, यदीच्छेदिति शेषः; तदानीं केन प्रकारेण

तस्य मानसो होमः ? इति प्रश्नः । श्रद्धेत्यादिकं तदुत्तरम् । येयं कर्मश्रद्धा, सैव पत्नी ; यत् तु 'सत्यं' सत्यवाक्यं वैदिकमन्त्रोच्चारणं, स एव यजमानः । श्रद्धा सत्यं चेति यदुभय मस्ति, तदुक्तेन प्रकारेण भावितं सदुत्तमं मिथुनं भवति ; तादृशेन श्रद्धासत्यरूपेण 'मिथुनेन' मानस मनुष्ठानं निष्पाद्य स्वर्गान् लोकान् जयतीत्येव मुत्तरं सम्पन्नम् ॥ ९ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) नवमः खण्डः ॥ ९ (१०) ॥

॥ अथ दशमः खण्डः ॥

तदाहुर्यद्दर्शपूर्णमासयोरुपवसति न ह वा अव्रतस्य देवा हविरश्नन्ति तस्मादुपवसत्युत मे देवा हविरश्नीयुरिति पूर्वां पौर्णमासी मुपवसेदिति पैङ्ग्य मुत्तरा मिति कौषीतकं या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूर्यां पर्यस्त मियादभ्युदियादिति सा तिथिः पूर्वां पौर्णमासी मुपवसेदनिर्ज्ञाय पुरस्तादमावास्यायां चन्द्रमसं यदुपैति यद्यजते तेन

सोमं क्रीणन्ति तेनोत्तरा मुत्तरा मुपवसेदुत्तराणि ह वै सोमो यजते सोम मनु दैवतं मेतद्वै देवसोमं यच्चन्द्रमास्तस्मादुत्तरा मुपवसेत् ॥ १० (११) ॥

तद्व्रतनिमित्त मुपवासं विधत्ते – "तदाहुर्यद्दर्शपूर्णमासयोरुपवसति, न ह वा अव्रतस्य देवा हविरश्नन्ति ; तस्मादुपवसत्युत मे देवा हविरश्नीयुरिति"–इति । 'तत्' तस्मिन् नित्यानुष्ठानविषये ब्रह्मवादिन एव माहुः । यः कोऽप्यनुष्ठाता दर्शपूर्णमासयो रुपवासं कुर्यात् । यागरूपं व्रतं निश्चित्य गार्हपत्याद्यग्निसमीपे यो वासः, स उपवासः । यदि वा अस्यापि यजेः समीपे वसन्तीति एतदीयो ऽनुष्ठानसङ्कल्प उपवासः । अग्न्युपस्तरणादिना तदीयो ऽनुष्ठाननिश्चयो ऽवगन्तव्यः । अत एव शाखान्तरे श्रूयते— "उपास्मिञ्छ्वो यक्ष्यमाणे देवता वसन्ति, य एवं विद्वानग्निमुपस्तृणाति"–इति (तै० सं० १. ६. ७. ३.) । 'अव्रतस्य' नियमविशेषस्वीकाररूपव्रतरहितस्य पुरुषस्य हविः देवा नैवाश्नन्ति । तस्मात् कारणादुत 'मे' ममापि हविर्देवा अश्नीयुरित्यभिप्रेत्य नियमं स्वीकृत्याग्निसमीपे उपवसेत् । एतदेवाभिप्रेत्य आपस्तम्ब आह— "आहवनीयागारे गार्हपत्यागारे वा शेते"–इति (श्रौ० ४. २. १७. *) । यद्वा ग्राम्याशनपरित्याग उपवासः । तत् परित्यज्य आरण्याशनरूपं नियमं स्वीकुर्यात् । अत एव शाखान्तरीया आहुः— "यद् ग्राम्यानुपवसति, तेन ग्राम्यानवरुन्धे ; यदारण्यस्याश्नाति, तेनारण्यान् ; यदनाश्वानुपवसेत् पितृदेवत्यः स्यादारण्यस्याश्नाति"–इति (तै० सं० १. ६. ७. २) ॥

---

* "अहं ग्राम्यानुपवसामि"–इत्यादीनि एतदादिसूत्राणि च द्रष्टव्यानि ।

अत्रोपवासतिथिविषये शाखाभेदवचन माश्रित्य विकल्पं दर्शयति— "पूर्वां पौर्णमासी मुपवसेदिति पैङ्ग्य मुत्तरा मिति कौषीतकं; या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका"–इति । खण्डतिथिवशाद् यदा दिनद्वये पौर्णमासी तिथिः सम्पद्यते, तदानीं पूर्वां 'पौर्णमासी मुपवसेत्' पूर्वदिने उपवासं कृत्वा परेद्युः यजेतेति सामशाखाप्रवर्त्तकस्य पैङ्गेर्महर्षेर्मतम् * । 'उत्तरां पौर्णमासी मुपवसेत्' उत्तरस्मिन् दिने उपवासं कृत्वा ततोऽपि परेद्युर्यजेतेत्यृक्शाखाप्रवर्त्तकस्य कौषीतकिमहर्षेर्मतम्† । एतदेव मतद्वय मुपजीव्य स्मार्त्ता एवं वर्णयन्ति—

"पूर्वप्रतिपदोः सन्धिर्मध्याह्ने पूर्वतोऽपि वा ।
अन्वाधानं पूर्वदिने तद्दिने याग इष्यते ॥
परतश्चेत् परेऽह्नीष्टिस्तद्दिने ऽन्वाहितिर्भवेत् ॥"–इति ।

एतच्च पौर्णमासीद्वयसद्भावे वेदितव्यम्; अनुमतिराकाशब्दाभ्यां पौर्णमासीभेदस्य सर्वत्र व्यवहृतत्वात् । तयोः स्वरूप मभिधानकार आह— "कलाहीने सानुमतिः, पूर्णे राका निशाकरे"–इति (अम० को० १.४.८.) । चतुर्दश्योसंयोगाच्चन्द्रमसि कलाहीने सत्यनुमतिरित्युच्यते ; तत्संयोगाभावेन चन्द्रमण्डलपूर्णे सति राकेत्युच्यते ॥

---

* पा० ४. ३. १०५ सू० 'पिङ्गेन प्रोक्तः पैङ्गीकल्पः' । अनु० सू० २, ९; ४; १०; ६. ७; ११. ८ । शाङ्खा० ब्रा० २. १; १९. ९; २४. ९ । शाङ्खा० श्रौ० ४.२.११ इत्यादिषु । "मधुकः पैङ्ग्यः"–इति शत० ब्रा० १४. ९. २. १७ । 'मधुकः कोयष्टिकाख्यः पक्षी, तद्वर्णोपमे यस्य ; मध्वेव मधुकं क्षौद्रं, तद्वत् पिङ्गलेव इति वा'–इति महा० भा० १२ पं० २१८७ श्लो० व्याख्याने नीलकण्ठः ।

† ऋग्वेदस्तु एकविंशतिशाखोऽपि वस्तुतो द्विविधः । तत्र शैशिरीयादयः पञ्च शाकलभेदाः , कौषीतक्यादयस्तु षोडश शाङ्खायनभेदाः ।

पौर्णमासीन्याय ममावास्याया मपि दर्शयति— "या पूर्वामावास्या सा सिनीवाली, योत्तरा सा कुहूः"–इति । अत्रापि चतुर्दशीयोगाच्चन्द्रदर्शने सत्यमावास्या सिनीवाली उच्यते ; तद्योगराहित्येन चन्द्रदर्शनाभावे कुहूरिति । तदप्यभिधानकारेणोक्तम्— "सा दृष्टेन्दुः सिनीवाली, सा नष्टेन्दुकला कुहूः"–इति (अम० को० १.४.९.) । अत्राप्युपवासयागनिर्णये मतभेदः पूर्ववद्द्रष्टव्यः ॥

अत्र पूर्वोत्तरविभागनिर्णयाय कर्मोपयोगिन्यास्तिथेः स्वरूपं दर्शयति—"यां पर्यस्त मियादभ्युदियादिति सा तिथिः"–इति । अमावास्यां पौर्णमासीं वा, यां परिप्राप्य सूर्योऽस्त मियात् , तथा या मभिलक्ष्य सूर्यं उदियात् , सेय मुदयास्तमयव्यापिनी कर्मोपयुक्ता तिथिः । तादृश्यां तिथौ उदयास्तमययोर्मध्ये पूर्वोत्तराभ्यां चतुर्दशीप्रतिपद्भ्यां मिश्रणे सति पर्वणो द्वैविध्यं भवति ; तस्मिन् द्वैविध्ये पूर्वोक्तं मतद्वयं द्रष्टव्यम् ॥

तदेतदुपसंहरति— "पूर्वां पौर्णमासी मुपवसेदनिर्ज्ञाय पुरस्तादमावास्यायां चन्द्रमसं यदुपैति, यद्यजते, तेन सोमं क्रीणन्ति; तेनोत्तरा मुत्तरा मुपवसेदुत्तराणि ह वै सोमो यजते, सोम मनु दैवत मेतद्वै देवसोमं यच्चन्द्रमास्तस्मादुत्तरा मुपवसेत्"–इति । पूर्वा मिति पैङ्गिमतस्योपसंहारः । अमावास्यादिने 'पुरस्तात्' पूर्वस्यां दिशि चन्द्रमसम् 'अनिर्ज्ञाय' च शास्त्रमार्गेण चन्द्र मदृष्ट्वा चन्द्रोदयो न भविष्यतीति निश्चित्य 'यत् उपैति' उपवसति प्रारभत इति यदस्ति, 'यद् यजते' परेद्युर्यागं करोतीति यदस्ति , 'तेन' उपवासेन यागेन च 'उत्तरा मुत्तराम्' आगामिपक्षगतां पौर्णमासी ममावास्यां चोपवसेत् । 'उत्तराणि' उपवासदिना दुत्तरेषु दिनेषु यजते । स यागः 'सोमो भवति'

सोमयागसदृशो भवति । तं सोम मनु सर्वं मपि दैवतं कल्पतीति शेषः । योऽयं चन्द्रमा अस्ति, एतदेव 'सोमं' देवाना मपेक्षितं सोमद्रव्यसदृशं वस्तु ; यस्माच्चन्द्रमण्डलं देवानां प्रियम् , तस्मात् मण्डलं सम्पूर्णं ममिलक्ष्योत्तरां पौर्णमासी मुपवसेदिति कौषीतकिमतस्योपसंहारः * ॥ १० (११) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) दशमः खण्डः ॥ १० (११) ॥

॥ अथैकादशः खण्डः ॥

तदाहुर्यस्याग्नि मनुद्धृत मादित्यो ऽभ्युदियाद्वा ऽभ्यस्तमियाद्वा प्रणीतो वा प्राग्घोमादुपशाम्येत् का तत्र प्रायश्चित्तिरिति हिरण्यं पुरस्कृत्य साय मुद्धरेज्ज्योतिर्वै शुक्रं हिरण्यं ज्योतिः शुक्र मसौ तदेव तज्ज्योतिः शुक्रं पश्यन्नुद्धरति रजत मन्तर्धाय प्रातरुद्धरेदेतद् रात्रिरूपं पुरा सम्भेदाच्छायाना माहवनीय मुद्धरेन् मृत्युर्वै तमश्छाया तेनैव तज्ज्योतिषा मृत्युं

---

* "सध्या पौर्णमासी मुपवसे दुत्तरा मित्येके"-इत्यादीनि सूत्राणि शा० वै० श्रौ० सू० १. ५. २—११ द्रष्टव्यानि ।

तमम्छायां तरति॑ सा तत्र प्रायश्चित्तिस्त॑दाहुर्यस्य गार्हपत्याहवनी॑यावन्तरेणानो वा रथो वा॑ श्वा वा प्रतिपद्येत॑ का तत्र प्रायश्चित्तिरिति॑ नैनन् मनसि कुर्यादित्याहुरा॑त्मन्यस्य हिता भवन्तीति॑ तच्चेन्मनसि कुर्वीत॑ गार्हपत्यादविच्छिन्ना मुदकधारां हरे॑त् तन्तुं तन्वन्रजसो भानु मन्विही॑त्याहवनीयात्॑ सा तत्र प्रायश्चित्तिस्त॑दाहुः कथ मग्नीनन्वादधानो॑ ऽन्वाहार्यपचन माहारये३त्॑ नाहारये३त् इति॑* आहारयेदित्याहुः॑ प्राणान्वा एषो ऽभ्यात्मन् धत्ते॑ यो ऽग्नीनाधत्ते॑ तेषा मेषो ऽन्नादतमो भवति॑ यदन्वाहार्यपचनस्त॑स्मिन्नेता माहुतिं जुहो॑त्यग्नये ऽन्नादायान्नपतये स्वाहे॑त्यन्नादो हान्नपतिर्भ॑वत्यश्नुते प्रजयान्नाद्यं॑ य एवं वेदान्तरे॑ण गार्हपत्याहवनीयौ होष्यन्स॑ञ्चरेतैतेन ह वा एनं॑ सञ्चरमाण मग्नयो विदु॑रय मस्मासु होष्यती॑त्येतेन ह वा अस्य सञ्चरमाणस्य॑ गार्हपत्याहवनीयौ पाप्मान मपहतः॑ सो ऽपहतपाप्मोर्ध्वः॑ स्वर्गं लोक मेतीति वै॑ ब्राह्मणा मुदाहरन्ति॑ तदाहुः कथ मग्नीन् प्रवत्स्यन्नुपतिष्ठेत॑ प्रोष्य वाप्रत्येत्याहरहर्वैति॑ तूष्णी मित्याहुस्तूष्णीं॑ वै श्रेयस आकाङ्क्षन्ते॑ ऽथाप्याहुर॑हरहर्वा एते यजमानस्या॑श्वयोदासनात्म॑प्लावनाद्

---

* "नाहारये३दिति"– क।

बिभ्यति तानुपतिष्ठेतैवाभयं वोभयं मे ऽस्त्वित्यभयं हैवास्मै भवत्यभयं हैवास्मै भवति ॥ ११ (१२) ॥

॥ इत्यैतरेयब्राह्मणे सप्तमपञ्चिकायां द्वितीयोऽध्यायः ॥

इत्थ मग्निहोत्रप्रायश्चित्तप्रसङ्गागत मपत्नीकाग्निहोत्रादिकं परिसमाप्य प्रकृत मेव प्रायश्चित्त मनुसरन् प्रश्न मुत्थापयति— “तदाहुर्यस्याग्नि मनुद्धृत मादित्यो ऽभ्युदियाद्वा ऽभ्यस्तमियाद्वा प्रणीतो वा प्राग्घोमादुपशाम्येत्, का तत्र प्रायश्चित्तिरिति”—इति । सायङ्काले आदित्यस्यास्तमयात् पुरा अग्निहोत्रार्थं गार्हपत्यादग्नि मुद्धरेत्, प्रातःकाले तु सूर्योदयात् पुरोद्धरेदित्याम्नातम् *। एवं सति ‘यस्य’ अग्निहोत्रिणो ऽनुद्धृत मग्नि मभिलक्ष्यादित्यः ‘उदियाद्वा अस्तमियाद्वा’ अग्न्युद्धरणात् प्रागेवोदयास्तमयौ भवत इत्यर्थः । अथवा स्वस्वकाले प्रणीतोऽग्निराहवनीयदेशे स्थित्वा होमात् पूर्वं मुपशाम्येत् । तेषु त्रिषु विषयेषु प्रायश्चित्तं पृच्छति ॥

तस्योत्तर माह — “हिरण्यं पुरस्कृत्य साय मुद्धरेज्ज्योतिर्वै शुक्रं हिरण्यं, ज्योतिः शुक्र मसौ, तदेव तज्ज्योतिः शुक्रं पश्यन्नुद्धरति ; रजत मन्तर्धाय प्रातरुद्धरेदेतद्रात्रिरूपम् ; पुरा सम्भेदाच्छायाना माहवनीय मुद्धरेन्मृत्युर्वै तमश्छाया, तेनैव तज्ज्योतिषा मृत्युं तमश्छायां तरति ; सा तत्र प्रायश्चित्तिः”—इति । यदा सूर्यास्तमयादूर्ध्व मुद्धरणीयम्, तदानीं हिरण्यं ‘पुरस्कृत्य’ उपर्यवस्थाप्य, वह्नि मुद्धरेत् । यदेतद्धिरण्य मस्ति, तदेतत् ‘शुक्रं ज्योतिर्वै’ अत्यन्तं भास्वरः प्रकाशः ; ‘असौ’ आदित्योऽपि ‘शुक्रं ज्योतिः’ अत्यन्तं

---

* आश्व श्रौ॰ २, २, १–१८ ।

भास्वरः प्रकाशः। तथा सति 'तदेव' हिरण्य मेव 'तज्ज्योतिः' आदित्यप्रकाशः। अतः 'शुक्रं' दीप्तिमद्धिरण्यं पश्यन्नेवाग्नि मुद्धरेत्। प्रातःकाले तु रजतम् 'अन्तर्धाय' उपर्यवस्थाप्याग्नि मुद्धरेत्। 'एतत्' च रजतं रात्रेः स्वरूपम्; रात्रौ हि चन्द्रतारादिकं रजतसमानं दृश्यते, अतो रजतेन सूर्योदयात् प्राचीनो रात्रिकाल एवं सम्पद्यते। यद्यप्येतावतैव त्रिविधप्रश्नोत्तरं सम्पन्नम्, तथापि तत्प्रसङ्गात् नित्य मुद्धरणं, पुरेत्यादिना प्रदर्श्यते। छायानां 'सम्भेदः' एकीभावः। सूर्यास्तमये सत्येषा मनुष्यच्छाया एषा वृक्षच्छायेति विभागो न ज्ञायते, सोऽयं सम्भेदः। तस्मात् पुरा सूर्यप्रकाशवशाच्छायाविशेषो विज्ञायते। तस्मिन्नेव काले सायं–होमार्थं माहवनीय मुद्धरेत्। तत्रोपपत्तिर्मृत्युरित्यादिः। यदिदं तमः, या च छाया, तदुभयं मृत्युस्वरूप मेव; अतः सत्यादित्यप्रकाशे तेनैव ज्योतिषा मृत्युरूपं तमस्तद्रूपां छायां च 'तरति' उल्लङ्घयति *। सेय मुक्ता तत्र वैकल्ये प्रायश्चित्तिः। नित्योद्धरणस्यापि वैकल्यविरोधित्वादुपचरितं प्रायश्चित्तत्वम्॥

पूर्वत्र सप्तत्रिंशे पर्याये पत्नीरहितस्याग्निहोत्रं विधाय, अष्टत्रिंशे पर्याये दर्शपूर्णमासयोरुपवासनिर्णयः, एकोनचत्वारिंशे पर्याये वाचिकं मानसं वाग्निहोत्र मपत्नीकस्य विधाय, चत्वारिंशे वह्न्युद्धरणकालातिक्रमे प्रायश्चित्त मुक्तम्॥

अथैकचत्वारिंशे प्रश्नोत्तरे दर्शयति—"तदाहुर्यस्य गार्हपत्याहवनीयावन्तरेणानो वा रथो वा श्वा वा प्रतिपद्येत, का तत्र प्रायश्चित्तिरिति? नैनत् मनसि कुर्यादित्याहुरात्मन्यस्य हिता भवन्तीति; तद्धेन् मनसि कुर्वीत, गार्हपत्यादविच्छिन्ना मुदकधारां

---

* आश्व० श्रौ० ३.१२.१९-२।

हरेत् ,‘तन्तुं तन्वन्रजसो भानु मन्विहीत्याहवनीयात् ; सा तत्र प्रायश्चित्तिः”–इति । गार्हपत्याहवनीययोर्मध्ये शकटं वा रथो वा श्वा वा यदागच्छेत् , तदानी मेतच्छकटादिकं मनसि न कुर्यात् ; ‘अस्य’ अनुष्ठातुः ‘आत्मनि’ स्वकीये पारमार्थिकस्वरूपे वेदान्तप्रतिपाद्ये वस्तुनि ‘हिता भवन्ति’ तानि शकटादीन्यवतिष्ठन्ते । अतः शकटादिरूपबुद्धिं परित्यज्य परमात्मबुद्धिं कुर्यात् । यद्यात्मविवेकाभावेन तच्छटकादिकं मनसि कुर्वीत , शकटादिबुद्धिं न परित्यजेत् , तदानीं गार्हपत्यादारभ्याहवनीयपर्यन्त मविच्छिन्ना मुदकधारां हरेत् * । तत्र “तन्तुं तन्वन्”–इति (ऋ० सं० १०. ५३. ६.) मन्त्रः ॥

अथ द्विचत्वारिंशे पर्याये कञ्चिद्विचारमुद्भावयति – “तदाहुः कथ मग्नीनन्वादधानोऽन्वाहार्यपचन माहारये३त्, नाहारये३त्? इति”–इति । अन्वाहार्यनामक ओदनः पच्यते यस्मिन् दक्षिणाग्नौ, सोऽयम् ‘अन्वाहार्यपचनः’ ; तस्य ‘आहरणम्’ अभिज्वलनम् , इष्टेरादावन्वाधानकाले दक्षिणाग्नेरभिज्वलनं कुर्यान्न वा ? इति । विचारार्थं श्रुतिद्वयम् ॥

तत्र निर्णयं दर्शयति – “आहारयेदित्याहुः ; प्राणान्वा एषो ऽध्यात्मन् धत्ते, यो ऽग्नीनाधत्ते ; तेषा मेषो ऽन्नादतमो भवति , यदन्वाहार्यपचनस्तस्मिन्नेता माहुतिं जुहोत्यग्नये ऽन्नादायान्नपतये स्वाहेति”–इति । ‘आहारयेत्’ प्रज्वलयेदित्येव मभिज्ञा आहुः । तत्रेय मुपपत्तिः । ‘यः’ पुमानग्नीनाधत्ते, ‘एषः’ एव पुमान् ‘अध्यात्मन्’ स्वात्मस्वरूपे प्राणानेव धारयति । ‘यः’ अय मन्वाहार्यपचनोऽस्ति, एषः ‘तेषाम्’ आहितानां चाग्नीनां मध्ये अति-

---

* आश्व० श्रौ० १०. ९, १५ ।

अयेनान्नादः ; तस्मात् प्राणधारिणा अन्नभक्षणसिद्धये सोऽयं प्रज्वलनीयः ; प्रज्वलिते 'तस्मिन्' दक्षिणाग्नौ "अग्नयेऽन्नादाय"- इत्यादिमन्त्रेण एता माहुतिं जुहुयात् * ॥

वेदनं प्रशंसति—"अन्नादो हान्नपतिर्भवत्यश्नुते प्रजयान्नाद्यं य एवं वेद"-इति । वेदिता स्वयम् 'अन्नादः' रोगराहित्येन भोक्तुं समर्थः, 'अन्नपतिः' अन्नस्वामी च भवति । तथा 'प्रजया' हि पुत्रादिरूपया सहान्नाद्यं प्राप्नोति ॥

पूर्वं गार्हपत्याहवनीययोर्मध्ये शकटादिगमनं निषिद्धम्, तद्यागकर्त्तुरपि मध्ये सञ्चारनिषेधशङ्कायां तद्व्यावर्त्तयितु माह— "अन्तरेण गार्हपत्याहवनीयौ होष्यन्त्सञ्चरेतैतेन ह वा एनं सञ्चरमाण मग्नयो विदुरय मस्मासु होष्यतीत्येतेन ह वा अस्य सञ्चरमाणस्य गार्हपत्याहवनीयौ पाप्मान मपहतः सो ऽपहतपाप्मोर्द्ध्वः स्वर्गं लोक मेतीति वै ब्राह्मण मुदाहरन्ति"-इति । यः पुमान् होष्यति, स पुमान् 'गार्हपत्याहवनीयावन्तरेण' तन्मध्यगतेन मार्गेण सञ्चरेत । 'एतेन' मार्गेण सञ्चरमाणम् 'एनं' होमकर्त्तार मग्नयः स्वमनसैवं विदुः 'अय मस्मासु होष्यति'-इति । तस्मादग्नीना मभीष्टत्वात् तस्य सञ्चारो युक्तः । किञ्च होमार्थं सञ्चरमाणस्य पाप्मान मुभावग्नी विनाशयतः । स च पापरहित ऊर्द्ध्वगामी स्वर्गं लोकं प्राप्नोति । अस्मिन्नर्थे शाखान्तरगतं बहुविधं ब्राह्मण मभिज्ञा उदाहरन्ति ॥

अथ त्रिचत्वारिंशे प्रश्नोत्तरे दर्शयति — "तदाहुः कथ मग्नीन् प्रवत्स्यन्नुपतिष्ठेत, प्रोष्य वा, प्रत्येत्याहरहर्वेति ? तूष्णी मित्याहुः ; तूष्णीं वै श्रेयस आकाङ्क्षन्ते ; ऽथाप्याहुरहरहर्वा एते यजमानस्या-

---

* ब्राह्मणोक्त एष एव मन्त्रः ।

अग्नयोद्वासनात्प्रप्लावनाद् बिभ्यति, 'तानुपतिष्ठेतैवाभयं वोऽभयं मेऽस्त्वित्यभयं हैवास्मै भवत्यभयं हैवास्मै भवति"–इति । यदाग्निहोत्री स्वगृह एवाग्नीनवस्थाप्य स्वयं ग्रामान्तरं प्रतिवसति, तदानीं 'प्रवत्स्यम्' अग्निहोत्री प्रवासकाले कथ मग्नीनुपतिष्ठेत ? अथ वा 'प्रोष्य' ग्रामान्तरे गत्वा 'प्रत्येत्य' पुनरागत्य कथ मुपतिष्ठेत? अथ वा स्वगृहे तिष्ठन्नपि 'अहरहः' प्रतिदिनं कथ मुपतिष्ठेत ? इत्येतस्य प्रश्नत्रयस्य तूष्णी मित्यादिक मुत्तरम् । नात्र मन्त्रपाठः कश्चिदस्ति, किन्तु तूष्णी मेवाञ्जल्यादिना विनयं प्रदर्शयन्नुपतिष्ठेत; लोकेऽपि सेवकाः तूष्णीम्भूता एव सन्तो विनीताः 'श्रेयसः' श्रेष्ठान् राजगुर्वादीन् पुरुषान् 'आकाङ्क्षन्ते' आगत्य स्वाभीष्टं प्रार्थयन्ते । तस्मात् तूष्णी मुपस्थान मित्येकः पक्षः ।

'अथाप्याहुः' अपि च अभिज्ञाः केचिदेवं पक्षान्तरं वदन्ति । 'अहरहर्वै' प्रतिदिन मेव 'एते' अग्नयो 'बिभ्यति' । भयकारणं यजमानस्येत्यादिनोच्यते । होमे निष्पन्ने सति पश्चादुपयोगाभावात् यजमानस्य अग्निष्वश्रद्धा भवति ; अतोऽय मग्नीनुद्वासयेदित्येको भयहेतुः * । 'प्रप्लावयेत्' लौकिकपाकार्थं नीत्वा प्रप्लावनं † वा कुर्यादिति द्वितीयो भयहेतुः । अतो भयपरिहाराय तानेतेन मन्त्रेण सर्वत्रोपतिष्ठेत । हे अग्नयः ! मत्तः सकाशाद् 'वः' युष्माकम्

---

* प्रमापणादिवधान्तेषु त्रिंशद्वधनामसु पठित ममरसिंहेन उद्वासन मिति (२. ८. ११२-११५.) । वस्तुत उद्वासनं निर्वासन मित्यनर्थान्तरम् । "प्रोषितश्चेत् प्रेयात् प्राचीनावीती निवान्यां दुग्ध्वा दक्षिणतोऽधिश्रयणोद्वासने"–इति कात्या० श्रौ० २५. ८. ९ । 'उष्णे भस्मन्यधिश्रयण मुद्वासनं च गार्हपत्याद् दक्षिणस्यां दिशि कुर्यात्'–इति सटीकायाम् ।

† प्रप्लावनशब्दार्थः १भा० २२६पृ० द्रष्टव्यः । "यस्मिन् कुम्भे सजीवं भवति, तं प्रप्लावयति समुद्रे"–इति शत० ब्रा० ४. ४. ५ २० ।

अभय मस्तु ; युष्मत्सकाशात् ममाप्यभय मस्त्विति मन्त्रार्थः । एव मुपस्थानं कुर्वते 'अस्मै' यजमानाय अभय मेव भवति । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ११ (१२) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां द्वितीयाध्याये
(द्वात्रिंशाध्याये) एकादशः खण्डः ॥ ११ (१२) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'-नामभाष्ये
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायाः द्वितीयोऽध्यायः ॥

॥ अथ तृतीयाध्यायः ॥

(७म)

॥ अथ प्रथमः खण्डः ॥

* * *

॥ ओँ ॥ हरिश्चन्द्रो ह वैधस ऐक्ष्वाको राजाऽपुत्र आस तस्य ह शतं जाया बभूवुस्तासु पुत्रं न लेभे तस्य ह पर्वतनारदौ गृह ऊषतुः स ह नारदं पप्रच्छ यन्न्विमं पुत्र मिच्छन्ति ये विजानन्ति ये च न किंस्वित्पुत्रेण विन्दते तन् म आ चक्ष्व नारदेति स एकया पृष्टो दशभिः प्रत्युवाच ऋणम स्मिन्त्सन्नयत्यमृतत्वञ्च गच्छति पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखं यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि यावन्तो अप्सु प्राणिनां भूयान् पुत्रे पितुस्ततः शश्वत्पुत्रेण पितरोऽत्यायन् बहुलं तमः आत्मा हि जज्ञ आत्मनः स इरावत्यतितारिणी किन्नु मलं किमजिनं किमु श्मश्रूणि किं तपः पुत्रं ब्रह्माण इच्छध्वं स वै लोकोऽवदावदः अन्नं ह प्राणः शरणं ह वासो रूपं हिरण्यं पशवो विवाहाः सखा ह जाया कृपणं ह दुहिता ज्योतिर्ह पुत्रः परमे व्योमन् पतिर्जायां प्र विशति गर्भो भूत्वा स मातरं तस्यां पुनर्नवो भूत्वा दशमे

मासि जायते तज्जाया जाया भवति यदस्यां जायते पुनः आभूतिरेषा भूतिर्बीज मेतन्निधीयते देवाश्चैता मृषयश्च तेजः समभरन्महत् देवा मनुष्यानब्रुवन्नेषा वो जननी पुनः नापुत्रस्य लोकोऽस्तीति तत् सर्वे पशवो विदुः तस्मात्तु पुत्रो मातरं स्वसार चाधिरोहति एष पन्था उरुगायः सुशेवो यं पुत्रिण आक्रमन्ते विशोकाः तं पश्यन्ति पशवो वयांसि च तस्मात् ते मात्रापि मिथुनीभवन्तीति ह स्मा आख्याय ॥ * १ (१३) ॥

॥ श्रीगणेशाय नमः ॥

आहिताग्नेर्मृतावग्निहोत्राङ्गे विकले तथा ।
प्रायश्चित्त मपत्नीकहोम इत्यादि वर्णितम् ॥ १ ॥
उक्तं द्वात्रिंशदध्यायैः कर्म वर्णत्रयान्वितम् ।
अथ त्वष्टभिरध्यायैर्वर्ण्यते राजकर्मकम् ॥ २ ॥
तत्र क्रतौ राजसूये वह्निष्टिपशुसोमके ।
मध्येऽभिषेचनीयेऽह्नि शौनःशेपं श्रुतं श्रुतौ ॥ ३ ॥
त्रयस्त्रिंशोऽय मध्यायः शौनःशेपेति नामवान् ।
हरिश्चन्द्रकथा तत्र कथिता बहुपुत्रदा ॥ ४ ॥

तदेतदुपाख्यानं दर्शयति— "हरिश्चन्द्रो ह वैधस ऐक्ष्वाको राजाऽपुत्र आस ; तस्य ह शतं जाया बभूवुस्, तासु पुत्रं न

---

* क-ख-पुस्तकयोरेव स्वरचिह्नानि सन्ति, नान्येषु पुस्तकेष्विति ।

लेभे ; तस्य ह पर्वतनारदौ गृह ऊषतुः ; स ह नारदं पप्रच्छ"–इति । हरिश्चन्द्रो नाम राजर्षिः ; "प्रस्कण्वहरिश्चन्द्रावृषी"–इति (६.१.१५३.) पाणिनिना सूचितत्वात् । स च वेधसो नृपतेः पुत्रः, इक्ष्वाकुवंशोद्भवो राजा पुत्रहीन आस । स च शतसङ्ख्यानां मध्ये कस्याश्चिदपि जायायां पुत्रं न लेभे । तस्य राज्ञो गृहे पर्वत-नारद-नामानौ यावृषी , तौ निवासं चक्रतुः । तयोर्मध्ये नारद मृषि मेतया गाथया राजा पप्रच्छ ॥

तां गाथां दर्शयति— "यं न्विमं * पुत्र मिच्छन्ति, ये विजानन्ति, ये च न ; किंस्वित्पुत्रेण विन्दते, तन्म आ चक्ष्व नारदेति"–इति । 'ये' देवमनुष्यादयो 'वि जानन्ति' विवेकज्ञानयुक्ताः , 'ये' च पश्वादयो 'न वि जानन्ति' विवेकज्ञानरहिताः, ते सर्वेऽपि 'नु' क्षिप्रं 'यम् इमं' पुत्र मिच्छन्ति, तेन पुत्रेण 'किंस्विद्विन्दते' किं नाम फलं पिता लभते ? हे नारद ! 'मे' मह्यं 'तत्' फलम् आ चक्ष्व । 'इति' राज्ञः प्रश्नः ॥

तस्योत्तर मवतारयति— "स एकया पृष्टो दशभिः प्रत्युवाच" –इति । 'सः' नारदः 'एकया' गाथया पृष्टः सन् 'दशभिः' गाथाभिः प्रत्युत्तर मुक्तवान् ॥

तत्र प्रथमां गाथा माह— "ऋण मस्मिन्संनयत्यमृतत्वञ्च गच्छति, पिता पुत्रस्य जातस्य, पश्येच्चेज्जीवतो मुखम्"–इति । उत्पन्नस्य सुखेन जीवतः पुत्रस्य मुखं पिता यदि पश्येत् , तदानीम् 'अस्मिन्' पुत्रे स्वकीय मृणं लौकिकं वैदिकं च 'संनयति' सम्यगवस्थापयति । लौकिकस्य अवस्थापनात् पुत्रपौत्रादिभिः ऋणं प्रत्यर्पणीय मिति स्मृतिकारा आहुः । वैदिकं तु "त्रिभि-

---

* मूलपुस्तकेषु सर्वेष्वेव 'य न्विमं'–इति लुप्तानुस्वारपाठः ।

र्ऋणवा जायते"–इत्यादि श्रुत्युक्तं पूर्व मेवोदाहृतम् (४२पृ०)। तस्य च पुत्रावस्थापनं सम्प्रत्तिनामकेन सम्पद्यते । तच्च कर्म वाजसनेयिभिराम्नातम् –"अथातः सम्प्रत्तिः । यदा प्रेष्यन् मन्यते, अथ पुत्र माह, त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति । स पुत्रः प्रत्याह । अहं ब्रह्म अहं लोक अहं यज्ञः"–इति (शत० ब्रा० १४. ४. ३. २५. *)। 'ब्रह्म' मया कर्त्तव्यं वेदाध्ययनम् , मयानुष्ठेयो यज्ञश्च, मया सम्पाद्या उत्तमा लोकाश्चेत्येतत् सर्वं पुत्रेण त्वयैव सम्पादनीय मिति पितृवाक्यस्यार्थः । सर्व मह सम्पादयिष्यामीति पुत्रवाक्यस्यार्थः । अत्राप्यारण्यककाण्डे सङ्क्षिप्य सन्दर्शयिष्यते – "सोऽस्याय मात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते"–इति (ऐ० आ० २.५.४.१०.)। एव मृणं पुत्रे समर्पयति । तथैव 'अमृतत्वं' मरणरहितं मुक्तिपदं च गच्छति ; पुत्रार्पितलौकिकवैदिकभारस्याविघ्नेन तत्त्वज्ञानसम्पादनात् ॥

द्वितीयां गाथा माह— "यावन्तः पृथिव्यां भोगा, यावन्तो जातवेदसि , यावन्तो अप्सु प्राणिनां, भूयान् पुत्रे पितुस्ततः"–इति । 'पृथिव्यां भोगाः' स्वस्य निवासादयः , 'जातवेदसि' अग्नौ भोगा दहनपचनादयः , 'अप्सु' भोगाः स्नानपानादयः । प्राणिना मेते सर्वे भोगा यावन्तः सन्ति । ततस्तावद्भ्यः सर्वेभ्यो भोगेभ्यो 'भूयान्' अभ्यधिकः पितुः पुत्रे भोगो विद्यते ; अत्यन्तसुखहेतुत्वात् । तथा च आहुः— "पुत्रोत्पत्तिविपत्तिभ्यां नापरं सुखदुःखयोः"–इति ॥

---

* "अथ त्रयो वाव लोकाः । मनुष्यलोकः पितृलोको देवलोक इति । सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो, नान्येन कर्मणा ; कर्मणा पितृलोको, विद्यया देवलोको ; देवलोको वै लोकानां श्रेष्ठस्तस्माद् विद्यां प्रशंसन्ति"–इति च तत्पुरस्तादेव ।

तृतीयां गाथा माह—"शश्वत् पुत्रेण पितरो ऽत्यायन् बहुलं तमः, आत्मा हि जज्ञ आत्मनः, स इरावत्यतितारिणी"—इति । 'पितरः' जनकाः उत्पन्नेन पुत्रेण 'शश्वत्' सर्वदा लोकद्वयेऽपि 'बहुलम्' अभ्यधिकं 'तमः' ऐहिक मामुष्मिकञ्च दुःखम् 'अत्यायन्' अतिक्रामन्ति । तथा च बौधायन आह—

"पुदिति नरकस्याख्या, दुःखञ्च नरकं विदुः ।
पुदस्त्राणात्ततः पुत्र मिहेच्छन्ति परत्र च ॥"—इति * ।

किञ्च 'हि' यस्मात् कारणात् पितुः पुत्र उत्पन्न इत्युक्ते सति पिता स्वस्मात् स्वय मेव 'जज्ञे' उत्पन्न इत्युक्तं भवति । ततः पिता यथा 'स्वयं' स्वकीयं दुःखं विनाशयति, तथा पुत्रोऽप्येतदीयं दुःखं विनाशयतीति द्रष्टव्यम् । तस्मात् 'सः' पुत्रः 'इरावती' अन्नयुक्ता 'अतितारिणी' नदीसमुद्रादेरतितरणहेतुर्नौरिति शेषः । यथा नौः दुर्घटं नद्यादिकं तारयति, एवं पुत्रोऽप्यैहिक मामुष्मिकञ्च दुःखं तारयतीत्यर्थः ॥

चतुर्थीं गाथा माह— "किन्नु मलं, कि मजिनं, कि मु श्मश्रूणि, किं तपः; पुत्रं ब्रह्माण इच्छध्वं, स वै लोको ऽवदावदः"—इति । अथ मलाजिनश्मश्रुतपःशब्दैः आश्रमचतुष्टयं विवक्षितम् । मलरूपाभ्यां शुक्रशोणिताभ्यां संयोगात् मलशब्देन गार्हस्थ्यं विवक्षितम् । कृष्णाजिनसंयोगादजिनशब्देन ब्रह्मचर्यं विवक्षितम् । क्षौरकर्मराहित्यात् श्मश्रुशब्देन वानप्रस्थ्यं विवक्षितम् । इन्द्रियनियमसद्भावात् तपःशब्देन पारिव्राज्यं विवक्षितम् । 'मलं' गार्हस्थ्यं 'किन्नु' किं नाम सुखं करिष्यति ? न किञ्चि-

---

* एष श्लोको हरिवंशेऽप्युद्धृतः । मनुसंहितायाञ्चैव मेव ९. १३८ । महा० भा० १४, २७५२ । रामा० २. १०७, १२ । मार्क० पु० ७५, ४१ ।

दित्यर्थः । एव मुत्तरत्रापि योज्यम् । हे ‘ब्राह्मणाः’ विप्राः ! विप्रक्षत्रियाद्याः ! सर्वे यूयं सुखहेतुत्वात् पुत्र मिच्छध्वम् । ‘स वै’ स एव पुत्रः ‘अवदावदो लोकः’ वदितु मयोग्यानि निन्दावाक्यान्यवदाः, तैर्वाक्यैर्नोच्यते न कथ्यत इत्यवदावदः; एवं प्रशस्तेन तेन कथ्यत इति ‘अवदावदः’ दोषराहित्यात् निन्दानर्ह इत्यर्थः । तादृशो ‘लोकः’ भोगहेतुः पुत्रः । तस्मादाश्रमेभ्योऽप्याधिक्येन पुत्रेच्छा कर्त्तव्या । यद्यपि हरिश्चन्द्र एवात्र प्रष्टा, तथापि तेन सह ऋषीणां बहूनां सभाया मवस्थानात् ब्राह्मणा इति सम्बोधनम् ॥

पञ्चमीं गाथा माह — “अन्नं ह प्राणः, शरणं ह वासो, रूपं हिरण्यं, पशवो विवाहाः; सखा ह जाया कृपणं ह दुहिता, ज्योतिर्ह पुत्रः, परमे व्योमन्”–इति । अन्नादयो लोके सुखहेतुत्वेन प्रसिद्धाः । तथा हि शरीरे प्राणावस्थितहेतुत्वादन्न मेव प्राणः । वासः शीतोपद्रवाद्रक्षकत्वेन ‘शरणं’ गृहसमानम् । ‘हिरण्यं’ कर्णाभरणादिकं दृष्टिप्रियत्वाद् रूपसम्पादकम् । ‘पशवः’ गवाश्वादयः विवाहविशेषेण निर्वाहकाः । जाया भोगे सहकारित्वात् ‘सखा ह’ सखिस्वरूपैव । एव मेते सुखहेतुत्वेन प्रसिद्धा अपि तात्कालिक मल्प मेव सुखं प्रयच्छन्ति । ‘दुहिता ह’ पुत्री इति तु ‘कृपणं’ केवलदुःखकारित्वाद् दैन्यहेतुः । तथा च स्मर्यते —

“भवे स्वजनदुःखकारिका सम्प्रदानसमये ऽर्थहारिका ।
यौवनेऽपि बहुदोषकारिका दारिका हृदयदारिका पितुः॥”–

इति । ‘पुत्रो ह’ पुत्रस्तु ज्योतिःस्वरूपम्; तमोनिवारकत्वेन प्रकाशरूपत्वेन । स हि पितरं ‘परमे व्योमन्’ उत्कृष्टे आकाशे परब्रह्मस्वरूपे अवस्थापयति । “आकाशस्तल्लिङ्गात्”–इत्यनेन (१. २. २२.) व्याससूत्रेण आकाशव्योमादिशब्दानां ब्रह्मपरत्वं

निर्णीतम् * । पुत्रस्य च ब्रह्मज्ञानहेतुत्वं पूर्वमेवामृतत्वञ्च गच्छतीत्यत्र प्रतिपादितम् (६१पृ० १८पं०) ॥

षष्ठीं गाथा माह— "पतिर्जायां प्रविशति, गर्भो भूत्वा स मातरम् ; तस्यां पुनर्नवो भूत्वा, दशमे मासि जायते"–इति । पत्युराकारद्वय मस्ति,— वर्त्तमानपुरुषाकार एकः, रेतोरूपेण गर्भाकारो द्वितीयः । जायाया अपि आकारद्वय मस्ति,— पतिरूप माकारं प्रति जाया भवति, गर्भरूप माकारं प्रति माता भवति । अतः 'सः' तादृशः पतिः, स्वयं रेतोरूपेण गर्भो भूत्वा, पूर्व मवस्थितां जायां भविष्यदाकारेण मातरं सतीं प्रविशति । 'तस्यां' मातरि 'पुनर्नवो भूत्वा' पूर्व मन्यस्यां मातरि उत्पन्नो जरठः, इदानीं पुनर्नूतनबालो भूत्वा 'तस्याम्' इदानीन्तन्या मस्यां मातरि गर्भपाके सति दशमे मासि उत्पद्यते । तस्मात् पुत्रः स्वस्मात् अन्यो न भवति ॥

सप्तमीं गाथा माह—"तज्जाया जाया भवति, यदस्यां जायते पुनः ; आभूतिरेषा भूतिर्बीज मेतन्निधीयते"–इति । 'यद्' यस्मात् कारणात् 'अस्यां' गर्भधारिण्याम् 'अयं' पिता पुत्ररूपेण पुनर्जायते, 'तत्' तस्मात् कारणात् लोकप्रसिद्धा या जायास्ति, सा जायते ऽस्या मिति व्युत्पत्त्या जायाशब्दवाच्या भवति । किञ्च एषा भूत्याभूतिशब्दाभ्या मभिधीयते । भवत्यस्यां पुत्ररूपेण पतिरित्येषा 'भूति'-शब्दवाच्या ; रेतोरूपेणागत्य अस्यां पुत्ररूपेण भवतीति

---

* "आकाश इति जीवाचेत्यत्र च ब्रह्म वाऽत्र खम् ।
शब्दस्य तत्र रूढत्वात् , वाय्वादेः सर्जनादपि ॥
साकाशजगदुत्पत्तिहेतुत्वाच्छीतबाधितः ।
एवकाराद्धिता प्राप्ते ब्रह्मैवाकाशशब्दितम् ॥"–इति तत्राष्टमाधिकरणम् ।

'आभूति'-शब्दवाच्या । 'एतत्' एतस्यां स्त्रियां 'बीजं' रेतोरूपं 'निधीयते' प्रक्षिप्यते । तस्मादुक्ताः शब्दा उपपद्यन्ते ॥

अष्टमीं गाथा माह— "देवाश्चैता मृषयश्च, तेजः समभरन्महत् ; देवा मनुष्यानब्रुवन्नेषा वो जननी पुनः"-इति । 'एताम्' एतस्यां योषिति देवाश्च महर्षयश्च स्वकीयं 'महत् तेजः' रेतोरूपं सारं 'समभरन्' पुत्रोत्पादनाय सम्पादितवन्तः । स्वय मेव सम्पाद्य ततो मनुष्यानित्यब्रुवन् । हे मनुष्याः ! सेय मिदानीं जायारूपेण वर्त्तते, सेयं पुनः 'वः' युष्माकं पुत्ररूपे जन्मनि जननी भवति ॥

नवमीं गाथा माह— "नापुत्रस्य लोकोऽस्तीति, तत् सर्वे पशवो विदुः ; तस्मात् तु पुत्रो मातरं, स्वसारं चाधिरोहति"-इति । 'लोकः' लोकजन्यं सुखम्, अपुत्रस्य नास्ति ; न हि पुत्रदर्शनेन यत् सुखं, तदन्यदर्शनेन क्वचिदपि दृश्यते । 'इति' यदस्ति, तत् 'सर्वे' गोमहिष्यादयो जानन्ति यस्मात्, तस्मादेव कारणात् पशुजातः 'पुत्रः' वत्सः स्वकीयां मातरं भगिनीं वा पुत्रोत्पादनार्थ मधिरोहति ॥

दशमीं गाथा माह— "एष पन्था उरुगायः सुशेवो, यं पुत्रिण आक्रमन्ते विशोकाः ; तं पश्यन्ति पशवो वयांसि च, तस्मात्ते मात्रापि मिथुनीभवन्ति"-इति । 'पुत्रिणः' पुत्रवन्तो देवमनुष्यादयो 'विशोकाः' शोकरहिताः सन्तो 'यं' पन्थानं सुखानुभवरूपं मार्गम् 'आक्रमन्ते' प्राप्नुवन्ति, 'एष पन्थाः' पुत्रसुखानुभवरूपो मार्गः 'उरुगायः' उरुभिर्महद्भिः शास्त्रैः राजामात्यादिभिश्च गीयते । तथा 'सुशेवः' सुष्ठु सेवितुं योग्यः ; सुखाधिक्यस्य विद्यमानत्वात् । 'तं' पुत्रसुखानुभवरूपं 'पशवः' गवादयो 'वयांसि' पक्षिणः 'पश्यन्ति' जानन्ति । तस्मात् 'ते' पशुपक्ष्यादयः पुत्रसुखार्थं

'मात्रा' सहापि मिथुनीभवन्ति, कि मुत अन्यया स्त्रिया सहेत्यर्थः ॥

नारदेनोक्तां दशगाथां निगमयति — "इति ह स्मा आख्याय" —इति । 'इति ह' अनेनैव प्रकारेण ('स्मै') 'अस्मै' तस्मै हरिश्चन्द्राय 'आख्याय' उत्तर मभिधायावस्थित इति शेषः ॥ १ (१३)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां तृतीयाध्याये
(त्रयस्त्रिंशाध्याये) प्रथमः खण्डः ॥ १ (१३) ॥

॥ अथ द्वितीयः खण्डः ॥

अथैन मुवाच॑ वरुणं राजान मुपधाव॑ पुत्रो मे जा॑यतां तेन त्वा यजा इति॑ तथेति॑ स वरुणं राजान मुपससार॑ पुत्रो मे जायतां॑ तेन त्वा यजा इति॑ तथेति॑ तस्य ह पुत्रो जज्ञे॑ रोहितो नाम॑ तं होवाचाजनि वै ते पुत्रो॑ यजस्व मानेनेति॑ स होवाच॑ यदा वै पशुर्निर्दशो भव॑त्यथ स मेध्यो भवति॑ निर्दशो न्वस्त्वथ त्वा यजा इति॑ तथेति॑ स ह निर्दश आस॑ तं होवाच॑ निर्दशो न्वभूद्य॑जस्व मानेनेति॑ स होवाच॑ यदा वै पशोर्दन्ता जायन्ते॑ऽथ स मेध्यो भवति॑ दन्ता न्वस्य जायन्तां॑ मथ त्वा यजा इति॑ तथेति॑ तस्य ह

दन्ता जज्ञिरे तं होवाचाज्ञत वा अस्य दन्ता यजस्व मानेनेति स होवाच यदा वै पशोर्दन्ताः पद्यन्तेऽथ स मेध्यो भवति दन्ता न्वस्य पद्यन्ता मथ त्वा यजा इति तथेति तस्य ह दन्ताः पेदिरे तं होवाचापत्सत वा अस्य दन्ता यजस्व मानेनेति स होवाच यदा वै पशोर्दन्ताः पुनर्जायन्तेऽथ स मेध्यो भवति दन्ता न्वस्य पुनर्जायन्ता मथ त्वा यजा इति तथेति तस्य ह दन्ताः पुनर्जज्ञिरे तं होवाचाज्ञत वा अस्य पुनर्दन्ता यजस्व मानेनेति स होवाच यदा वै क्षत्रियः सान्नाहुको भवत्यथ स मेध्यो भवति सन्नाहं नु प्राप्नोत्वथ त्वा यजा इति तथेति स ह सन्नाहं प्रापत्तं होवाच सन्नाहं नु प्राप्नोद्यजस्व मानेनेति स तथेत्युक्त्वा पुत्र मामन्त्रयामास ततायं वै मह्यं त्वा मददाद्धन्त त्वयाहमिमं यजा इति स ह नेत्युक्त्वा धनुरादायारण्य मपातस्थौ स संवत्सर मरण्ये चचार ॥ २ (१४) ॥

पुत्रनिमित्तलाभप्रतिपादिका नारदोक्ता दश गाथा उदाहृत्य, पुत्रजन्मोपायोपदेशपरं नारदवाक्य मवतारयति— "अथैन मुवाच,— वरुणं राजान मुपधाव, पुत्रो मे जायतां तेन त्वा यजा इति"–इति । 'अथ' पुत्रेच्छानिमित्तकथनानन्तरम् 'एनं' पुत्रार्थिनं हरिश्चन्द्रं नारद उवाच । हे हरिश्चन्द्र ! वरुणं राजानम् 'उपधाव' प्रार्थयस्व । येन प्रकारेण प्रार्थनीयः, सोऽभिधीयते—

हे वरुण ! त्वत्प्रसादात् मे पुत्रो जायतां , ततस्तेन पुत्रेण ‘त्वां यजे’ त्वा मुद्दिश्य यज्ञं करवाणीति ॥

प्रार्थनप्रकारं नारदोपदेश मुक्त्वा हरिश्चन्द्रवृत्तान्तं दर्शयति— “तथेति ; स वरुणं राजान मुपससार, पुत्रो मे जायतां तेन त्वा यजा इति ; तथेति ; तस्य ह पुत्रो जज्ञे रोहितो नाम”–इति । नारदोपदेश मङ्गीकृत्य हरिश्चन्द्रो वरुणम् ‘उपससार’ प्रार्थयामास । ‘सः’ वरुणोऽपि तथास्त्विति तदीयपुत्रोत्पत्त्यै वरं दत्तवान् । तेन च वरेणोत्पन्नस्य ‘रोहितः’–इत्येतन्नामाभूत् ॥

अथ बहुभिः पर्यायैर्वरुणस्योक्तिर्हरिश्चन्द्रस्य प्रत्युक्तिश्चेत्युभयं प्रतिपाद्यते ; तत्र प्रथमं पर्यायं दर्शयति— “तं होवाचाजनि वै ते पुत्रो यजस्व मानेनेति ; स होवाच , यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति, निर्दशो न्वस्त्वथ त्वा यजा इति ; तथेति”–इति । ‘तं’ हरिश्चन्द्रं वरुण उवाच । हे हरिश्चन्द्र ! ते पुत्रः ‘अजनि वै’ उत्पन्न एव, अनेन पुत्रेण मा मुद्दिश्य यागं कुर्विति । एवं वरुणेनोक्ते हरिश्चन्द्रः पुनः प्रत्युवाच । यागार्थः पशुर्यदा निर्दशो भवति, तदा स पशुः ‘मेध्यः’ यागयोग्यो भवति । निर्गतानि अशौचदिनानि दशसङ्ख्याकानि यस्मात् पशोः सोऽयं ‘निर्दशः’ । तस्मादयं ‘नु’ क्षिप्रं निर्दशोऽस्तु , ‘अथ’ अनन्तरं त्वां प्रति अहं ‘यजे’ इत्येतद्वाक्यम् । वरुणः ‘तथा अस्तु’ इति अङ्गीचकार ॥

द्वितीय मुक्तिप्रत्युक्तिपर्यायं दर्शयति— “स ह निर्दश आस ; तं होवाच, निर्दशो न्वभूद्यजस्व मानेनेति ; स होवाच, यदा वै पशोर्दन्ता जायन्तेऽथ स मेध्यो भवति ; दन्ता न्वस्य जायन्ता मथ त्वा यजा इति ; तथेति”–इति । दशदिनाशौचापगमे अव-

त्वात् यथा यागयोग्यत्वं , तथा दन्तोत्पन्नत्वादवयवसम्पूर्त्त्या यागयोग्यत्व मित्यभिप्रायः । स्पष्ट मन्यत् ॥

तृतीयं पर्यायं दर्शयति—“तस्य ह दन्ता जज्ञिरे ; तं होवाचाज्ञत वा अस्य दन्ता यजस्व मानेनेति ; स होवाच, यदा वै पशोर्दन्ताः पद्यन्ते ऽथ स मेध्यो भवति ; दन्ता न्वस्य पद्यन्ता मथ त्वा यजा इति ; तथेति”–इति । ‘अज्ञत वै’ जाता एव ‘पद्यन्ते’ पतन्ति । प्रथमोत्पन्नानां दन्ताना मस्थायित्वेन मुख्यपश्ववयवत्वाभावात् । तथात्वे सति पशोर्मेध्यत्वम् ॥

चतुर्थं पर्यायं दर्शयति — “तस्य ह दन्ताः पेदिरे; तं होवाचापत्सत वा अस्य दन्ता, यजस्व मानेनेति ; स होवाच, यदा वै पशोर्दन्ताः पुनर्जायन्ते ऽथ स मेध्यो भवति ; दन्ता न्वस्य पुनर्जायन्ता मथ त्वा यजा इति ; तथेति”–इति । ‘अपत्सत वै’ पतिताः । पुनरुत्पन्नानां दन्तानां स्थिरत्वेन सम्पूर्णावयवत्वात् पशोर्मेध्यत्वम् ॥

पञ्चमं पर्यायं दर्शयति— “तस्य ह दन्ताः पुनर्जज्ञिरे ; तं होवाचाज्ञत वा अस्य पुनर्दन्ता यजस्व मानेनेति ; स होवाच , यदा वै क्षत्रियः सान्नाहुको भवत्यथ स मेध्यो भवति ; सन्नाहं नु प्राप्नोत्वथ त्वा यजा इति ; तथेति”–इति । ‘अज्ञत वै’ जाता एव । पञ्चत्सरस्य पुनर्दन्तोत्पत्तिमात्रेण मेध्यत्वेऽपि अस्य पशोः क्षत्रियत्वात् स्वजात्युचितधनुर्बाणकवचादिसन्नाहयोगित्वे सति जात्युचितव्यापारसम्पूर्त्तौ मेध्यत्वम् ; तस्मात् ‘नु’ क्षिप्र मेवासौ सन्नाहं प्राप्नोतु, अनन्तर मेव यजा इत्युत्तरं वरुणोऽङ्गीचकार ॥

षष्ठं पर्यायं दर्शयति— “स ह सन्नाहं प्रापत् ; तं होवाच, सन्नाहं नु प्राप्नोद्यजस्व मानेनेति ; स तथेत्युक्त्वा पुत्र मामन्त्रया-

माह ; ततायं वै मह्यं त्वा मददाद्धन्त त्वयाह मिमं यजा इति"–इति । सन्नाहप्राप्तेरूर्ध्वं 'सः' हरिश्चन्द्रो वरुणोक्तिं मङ्गीकृत्य पुत्र मामन्त्र्यैव मुवाच । उपलालनार्थं पुत्रे पितृवाचि तत-शब्द-प्रयोगः । हे 'तत' पुत्र ! 'अयम्' एव वरुणो मह्यं 'त्वां' पुत्रं वरेण दत्तवान् ; 'हन्त' दुष्टः अहम् 'इमं' वरुणं यत् 'त्वया' पुत्रेण 'यजै' यागरूपां पूजां करवाणीति हरिश्चन्द्रस्योक्तिः ॥

अथ रोहितनाम्नः पुत्रस्य कृत्यं दर्शयति— "स ह नेत्युक्त्वा धनुरादायारण्य मपातस्थौ ; स संवत्सर मरण्ये चचार"–इति । 'स ह' स खलु रोहिताख्यः पुत्रः पितुर्वाक्यं निषिध्य, स्वरक्षणार्थं धनुः स्वीकृत्य अरण्यं प्रत्युपगतोऽभूत् । कस्मिंश्चिदरण्ये नैरन्तर्येण 'सः' रोहितः संवत्सरं चचार ॥ २ (१४) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां तृतीयाध्याये
(त्रयस्त्रिंशाध्याये) द्वितीयः खण्डः ॥ २ (१४) ॥

॥ अथ तृतीयः खण्डः ॥

अथ हैक्ष्वाकं वरुणो जग्राह॑ तस्य होदरं जज्ञे॑ तदु ह रोहितः शुश्राव॑ सोऽरण्याद् ग्राम मेयाय त॑मिन्द्रः पुरुषरूपेण पर्येत्योवाच॑ नाना श्रान्ताय श्रीरस्तीति॑ रोहित शुश्रुम॑ पापो* नृषद्वरो जन॑ इन्द्र इच-

---

* "शुश्रुमापापी" ख, घ।

रतः सखा चरैवेति चरैवेति वै * मा ब्राह्मणोऽवोचदिति ह द्वितीयं संवत्सर मरण्ये चचार सो ऽरण्याद् ग्राम मेयाय त मिन्द्रः पुरुषरूपेण पर्येत्योवाच पुष्पिण्यौ चरतो जङ्घे भूष्णुरात्मा फलग्रहिः शेरे ऽस्य सर्वे पाप्मानः श्रमेण प्रपथे हताश्चरैवेति चरैवेति वै मा ब्राह्मणो ऽवोचदिति ह तृतीयं संवत्सर मरण्ये चचार सो ऽरण्याद् ग्राम मेयाय त मिन्द्रः पुरुषरूपेण पर्येत्योवाच आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः शेते निपद्यमानस्य चराति चरतो भगश्चरैवेति चरैवेति वै मा ब्राह्मणो ऽवोचदिति ह चतुर्थं संवत्सर मरण्ये चचार सो ऽरण्याद् ग्राम मेयाय त मिन्द्रः पुरुषरूपेण पर्येत्योवाच कलिः शयानो भवति सञ्जिहानस्तु द्वापरः उत्तिष्ठंस्त्रेता भवति कृतं सम्पद्यते चरंश्चरैवेति चरैवेति वै मा ब्राह्मणो ऽवोचदिति ह पञ्चमं संवत्सर मरण्ये चचार सोऽरण्याद् ग्राम मेयाय त मिन्द्रः पुरुषरूपेण पर्येत्योवाच चरन्वै मधु विन्दति चरन्स्वादु मुदुम्बरं सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति चरैवेति वै मा ब्राह्मणो ऽवोचदिति ह षष्ठं संवत्सर मरण्ये चचार सोऽजीगर्त्तं सौयवसि मृषि मशनया परीत मरण्य उपेयाय तस्य ह त्रयः

---

* "चरैवेति वै"—इति क, ग। एव मितोऽनन्तरमपि चिह्नस्थानपार्थक्यम्।

पुत्रा आसुः शुनःपुच्छः शुनःशेपः शुनोलाङ्गूल इति तं होवाच ऋषे ऽहं ते शतं ददाम्यह मेषां मेकेनात्मानं निष्क्रीणा इति स ज्येष्ठं पुत्रं निगृह्णान उवाच न न्विम मिति नो एवेम मिति कनिष्ठं माता तौ ह मध्यमे सम्पादयाञ्चक्रतुः शुनःशेपे तस्य ह शतं दत्त्वा स त मादाय सो ऽरण्याद् ग्राम मेयाय स पितर मेत्योवाच तत हन्ताह मनेनात्मानं निष्क्रीणा इति स वरुणं राजान मुपससारानेन त्वा यजा इति तथेति भूयान् वै ब्राह्मणः क्षत्रियादिति वरुण उवाच तस्मा एतं राजसूयं यज्ञक्रतुं प्रोवाच त मेत मभिषेचनीये पुरुषं पशु मालेभे ॥ ३ (१५) ॥

रोहितस्यारण्ये संवत्सरचरणानन्तरभाविनं हरिश्चन्द्रादीनां वृत्तान्तं दर्शयति — "अथ हैक्ष्वाकं वरुणो जग्राह , तस्य होदरं जज्ञे ; तदु ह रोहितः शुश्राव ; सो ऽरण्याद् ग्राम मेयाय ; तं मिन्द्रः पुरुषरूपेण पर्येत्योवाच, नाना श्रान्ताय श्रीरस्तीति रोहित शुश्रुम , पापो नृषद्वरो जन , इन्द्र इच्चरतः सखा, चरैवेति" —इति । 'अथ' रोहितस्यारण्ये संवत्सरवासानन्तर मेव 'ऐक्ष्वाकं' इक्ष्वाकुवंशोत्पन्नं हरिश्चन्द्रं 'वरुणः' देवो रोगरूपेण जग्राह । वरुणेन गृहीतस्य हरिश्चन्द्रस्य 'उदरं जज्ञे' जलेन पूरित मुच्छूनं महोदरनामकं रोगस्वरूप मुत्पन्नम् । 'तदु ह' तदपि सर्वं मरण्ये स्थितो 'रोहितः' पुत्रो मनुष्यमुखाच्छुश्राव । 'श्रुत्वा च 'सः' रोहितः पितरं द्रष्टु मरण्याद् ग्रामं प्रत्याजगाम । आगच्छन्तं

रोहितं मार्गमध्ये इन्द्रः केन चिद् ब्राह्मणरूपेण प्राप्य इद मुक्तवान्,—आ समन्ताच्छ्रान्त आश्रान्तः, सर्वत्र पर्यटनेन श्रान्तिं प्राप्तः, तद्विपरीतो ऽनाश्रान्तः एकत्रैव निवासशीलः, तादृशाय ; तथाविधस्य पुरुषस्य 'श्रीः' बहुविधा सम्पन्नास्ति । यद्वा, नानेति पदच्छेदः । 'श्रान्ताय' सर्वत्र पर्यटनेन श्रान्तस्य 'नाना श्रीः' बहुविधा सम्पदस्ति । 'इति' अनेन प्रकारेण रोहित ! वयं नीतिकुशलानां पुरुषाणां मुखात् शुश्रुम । 'वरो जनः' विद्यादिभिः श्रेष्ठो ऽपि पुरुषः 'नृषत् पापः' नृषु मनुष्येषु सीदतीति 'नृषत्' श्रेष्ठोऽपि बन्धुगृहेषु सर्वदावस्थितः नैरवज्ञातः 'पापः' तुच्छो भवेत् । अतस्तव पितृगृहे वासो न युक्तः । न च अरण्ये चरतो मम सहायो नास्तीति शङ्कनीयम् । 'इन्द्र एव' परमेश्वर एव 'चरतः' तव सखा भविष्यति । तस्मात् 'चरैव' सर्वथा अरण्ये चरस्वेति । एव मुवाच । एवं बहुष्वपि पर्यायेषु द्रष्टव्यम् ॥

तत्रेन्द्ररोहितयोः संवादे द्वितीयं पर्यायं दर्शयति— "चरैवेति वै मा ब्राह्मणो ऽवोचदिति ह द्वितीयं संवत्सर मरण्ये चचार ; सो ऽरण्याद् ग्राम मेयाय ; त मिन्द्रः पुरुषरूपेण पर्येत्योवाच, पुष्पिण्यौ चरतो जङ्घे, भूष्णुरात्मा फलग्रहिः, शेरे ऽस्य सर्वे पाप्मानः, श्रमेण प्रपथे हताश्चरैवेति"–इति । ब्राह्मणरूपस्येन्द्रस्य वाक्यं श्रुत्वा ब्राह्मणोऽय मरण्ये चरैवेत्येवं मा मुक्तवानिति मनसि ब्राह्मणवाक्ये महान्त मादरं कृत्वा पुनरप्येकं संवत्सर मरण्ये चरित्वा पश्चात् पितरं द्रष्टुं ग्रामे त मागच्छन्तं पुनरपि इन्द्रो ब्राह्मणरूपेण आगत्य एव मुवाच । 'चरतः' पर्यटनं कुर्वतः पुरुषस्य 'जङ्घे' 'पुष्पिण्यौ' भवतः । यथा पुष्पयुक्ता वृक्षशाखा लता वा, सुगन्धोपेता सेव्या भवति , एवं चरतो जङ्घे श्रमजयेन सेव्ये

भवतः। तथैव 'आत्मा' मध्यदेहः 'भूष्णुः' वर्द्धिष्णुः 'फलग्रहिः' आरोग्यरूपं फलं गृह्णाति। तथैव 'अस्य' चरतः पुरुषस्य 'सर्वे पाप्मानः' सर्वपापानि 'प्रपथे' प्रकृष्टे तीर्थक्षेत्रादिमार्गे 'श्रमेण' तत्तद्देवतादिदर्शने तीर्थयात्रादिप्रयासेन 'हताः' विनाशिताः सन्तः 'शेरे' शेरते, शयाना इव भवन्ति। यथा शयानाः पुरुषाः स्वकार्यं कृषिवाणिज्यादिकं कर्त्तुमशक्ताः, एवं पुण्येन विनष्टाः पाप्मानो नरकं दातुमसमर्था इत्यर्थः। तस्मात् सर्वथा अरण्ये चर, न पितुर्गृहे ऽवतिष्ठस्व॥

तृतीयं पर्यायं दर्शयति— "चरैवेति वै मा ब्राह्मणो ऽवोचदिति ह तृतीयं संवत्सर मरण्ये चचार; सोऽरण्याद् ग्राम मेयाय; तमिन्द्रः पुरुषरूपेण पर्येत्योवाच, आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः, शेते निपद्यमानस्य चराति चरतो भगश्चरैवेति" -इति। 'भगः' सौभाग्यम्। 'आसीनस्य' उपविष्टस्य 'आस्ते' तथैव तिष्ठति, न तु वर्द्धते; अभिवृद्धिहेतोरुद्योगस्याभावात्। 'तिष्ठतः' उपवेशनं परित्यज्योत्थानं कुर्वतः पुरुषस्य भगः 'ऊर्ध्वः' अभिवृद्ध्युन्मुखस्तिष्ठति; कृषिवाणिज्याद्युद्योगस्य सम्भावितत्वात्। 'निपद्यमानस्य' भूमौ शयानस्य भगः 'शेते' निद्रां करोति; विद्यमानधनरक्षादिचिन्ताया अप्यभावात् सर्वथैव विनश्यति। 'चरतः' तेषु-तेषु देशेषु अर्जनार्थं पर्यटनं कुर्वतः पुरुषस्य 'भगः' सौभाग्यं 'चराति' दिने-दिने वर्द्धते। तस्मात् त्वं चरैवेति, मा त्वेकत्र तिष्ठ॥

चतुर्थं पर्यायं दर्शयति—"चरैवेति वै मा ब्राह्मणो ऽवोचदिति ह चतुर्थं संवत्सर मरण्ये चचार; सो ऽरण्याद् ग्राम मेयाय; तमिन्द्रः पुरुषरूपेण पर्येत्योवाच, कलिः शयानो भवति, सञ्जि-

हानस्तु द्वापरः, उत्तिष्ठंस्त्रेता भवति, कृतं सम्पद्यते चरंश्चरैवेति"-इति। चतस्रः पुरुषस्यावस्थाः। निद्रा, तत्परित्यागः, उत्थानं, सञ्चरणं चेति। ताश्चोत्तरोत्तरश्रेष्ठत्वात् कलि-द्वापर-त्रेता-कृत-युगैः समानाः। ततश्च सञ्चरणस्य सर्वोत्तमत्वाच्चरैवेति॥

पञ्चमं पर्यायं दर्शयति—"चरैवेति वै मा ब्राह्मणो ऽवोचदिति ह पञ्चमं संवत्सर मरण्ये चचार; सो ऽरण्याद् ग्राम मेयाय, त मिन्द्रः पुरुषरूपेण पर्येत्योवाच, चरन् वै मधु विन्दति, चरन्स्वादु मुदुम्बरं, सूर्यस्य पश्य श्रेमाणं, यो न तन्द्रयते चरंश्चरैवेति"-इति। 'चरन्' एव पुरुषः कश्चिद् वृक्षाग्रे 'मधु' माक्षिकं लभते, क्वचित् 'स्वादुं' मधुर मुदुम्बरादिफलविशेषं लभते। एतदुभय मुपलक्षणम्। तत्र तत्र विद्यमानं भोगविशेषं लभते। तत्र सूर्यो दृष्टान्तः। 'यः' सूर्यः सर्वत्र चरन्नपि 'न तन्द्रयते' कदाचिदप्यलसो न भवति, तस्य सूर्यस्य 'श्रेमाणं' श्रेष्ठत्वं जगद्वन्द्यत्वं पश्य। तस्माच्चरैव॥

इत्थ मिन्द्रकृतेनोपदेशेन चरतो रोहितस्य स्वजीवने पितुरारोग्ये च कारणभूतं श्रेयोलाभं दर्शयति—"चरैवेति वै मा ब्राह्मणो ऽवोचदिति ह षष्ठं संवत्सर मरण्ये चचार; सो ऽजीगर्तं सौयवसि मृषि मशनया परीत मरण्य उपेयाय"-इति। षष्ठे संवत्सरे पूर्ववदरण्यसञ्चारी 'स ह' रोहितः कञ्चिदृषिं तस्मिन्नरण्ये 'उपेयाय' प्राप्तवान्। कीदृशं मृषिम्? अजीगर्तनामकं, सूयवसस्य पुत्रम्, 'अशनया परीतम्' अन्नालाभेन क्षुत्पीडितम्॥

अथाजीगर्तरोहितयोः संवादं दर्शयति—"तस्य ह त्रयः पुत्रा आसुः,—शुनःपुच्छः शुनःशेपः शुनोलाङ्गूल इति; तं होवाच, ऋषे ऽहं ते शतं ददाम्यहमेषा मेकेनात्मानं निष्क्रीणा

इति; स ज्येष्ठं पुत्रं निगृह्णान उवाच, न न्विम मिति; नो एवेम मिति कनिष्ठं माता; तौ ह मध्यमे सम्पादयाञ्चक्रतुः शुनःशेपे; तस्य ह शतं दत्त्वा स त मादाय सोऽरण्याद् ग्राम मेयाय"—इति। 'तस्य' अजीगर्तस्य शुनःपुच्छादिनामकास्त्रयः पुत्रा आसुः। 'तं' पुत्रवन्त मृषिं रोहितः उवाच। हे ऋषे! 'ते' तुभ्य महं गवां शतं ददामि। 'ज्येष्ठं पुत्रं' शुनःपुच्छनामकं हस्तेन 'निगृह्णानः' स्वसमीपे समाकर्षन् रोहितं प्रत्येव मुवाच,— तुभ्य मेकः पुत्रो दीयते, 'इमं नु' शुनःपुच्छन्तु 'न' ददामि; मम प्रियत्वादिति। ततो माता कनिष्ठं हस्तेन गृहीत्वैव मुवाच—'इमं' शुनोलाङ्गूलं तु मम प्रियं 'नो एव' सर्वथा न ददामीति। ततः 'तौ' उभौ मातापितरौ 'मध्यमे' पुत्रे शुनःशेपे दानं 'सम्पादयाञ्चक्रतुः' अङ्गीकृतवन्तौ। ततः 'तस्य' अजीगर्तस्य 'सः' रोहितो गवां शतं दत्त्वा 'तं' शुनःशेपम् आदायावस्थितः*। ततः 'सः' रोहितः तेन शुनःशेपेन सहारण्यात् स्वकीयं ग्रामं प्रत्याजगाम॥

तदागमनादूर्ध्वकालीनं वृत्तान्तं दर्शयति— "स पितर मेत्योवाच,— तत हन्ताह मनेनात्मानं निष्क्रीणा इति; स वरुणं राजान मुपससारानेन त्वा यजा इति; तथेति, भूयान् वै ब्राह्मणः क्षत्रियादिति वरुण उवाच; तस्मा एतं राजसूयं यज्ञक्रतुं प्रोवाच,

---

* "षष्ठ्या आक्रोशे"—इति पा० ६. ३. २१। "शेपपुच्छलाङ्गूलेषु शुनः"—तत्रैव वा०५। "उभे वनस्पत्यादिषु युगपत्"—इति पा० ६. २. १४०। शुनःशेपम्। शुनःशेफ इति पाठोऽपि मन्त्रभागस्थो (१२. २. ६.)। शेपः इति, वैतसः इति च द्वे पदे निघण्टुसमाम्नाये पठिते। "शेपो वैतस इति पुंस्प्रजननस्य। शेपः शपतेः स्पृशतिकर्मणो, वैतसो वितस्तं भवति"—इति निरु० ३. ४. ४। "स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते, न पुंसः; पुंसोऽपीत्येके, शौनःशेपे दर्शनात्"—इति चाह यास्कः (३. १. ४.)।

त मेत मभिषेचनीये पुरुषं पशु मालेभे"–इति । 'सः' रोहितः पितर मागत्यैव मुवाच । हे 'तत' पितः ! 'हन्त' आवयोः हर्षः सम्पन्नः । अहम् 'अनेन' शुनःशेपरूपेण मूल्येन 'आत्मानं' मदीयं वरुणात् 'निष्क्रयै' मूल्यं दत्त्वा आत्मानं मोचयामीत्यर्थः । तथोक्ते 'सः' हरिश्चन्द्रो वरुण मुपेत्य 'अनेन' शुनःशेपेन ब्राह्मणेन 'त्वा' त्वां यक्ष्यामीत्युक्तवान् । 'सः' वरुणो ऽपि तथेत्यङ्गीकृत्यैव मुवाच—'क्षत्रियात्' तव पुत्रात् रोहितादप्ययं ब्राह्मणो 'भूयान्' अभ्यधिक एव, मम प्रियः ; इत्युक्त्वा 'तस्मै' हरिश्चन्द्राय कर्त्तव्यत्वेन राजसूय मुपदिदेश च । 'सः' हरिश्चन्द्रो राजसूयं प्रक्रम्य तस्य मध्ये यो ऽभिषेचनीयाख्यः * एकाहः सोमयागः, तस्मिन् 'त मेतं' शुनःशेपं पुरुषं पशुम् 'आलेभे' सवनीयपशुत्वेनालब्धुं निश्चितवान् ॥ ३ (१५) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां तृतीयाध्याये
(त्रयस्त्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (१५) ॥

---

* "संवत्सरान्ते समानपक्षे ऽभिषेचनीय-दशपेयौ, उक्थ्यौ दशत्पृष्ठ उभयत्रासामाभिषेचनीये"–इति आश्व० श्रौ० ९, ३, ७, ८ । तत्रापि अभिषेकार्थानां मपां ग्रहणं भवति । अभिषेकास्तु कात्या० श्रौ० १५, ४, २१–५, ६, सूत्रेषु द्रष्टव्यानि । "राजानौ भविष्यन्त्यभिषेचनीयाः०—०त्रिवृदभिषेचनीयाः"–इति च शत० ब्रा० १३, ४, २, १७ ।

॥ अथ चतुर्थः खण्डः ॥

तस्य ह विश्वामित्रो होतासीज्जमदग्निरध्वर्युर्वसिष्ठो ब्रह्मा ऽयास्य उद्गाता तस्मा उपाकृताय नियोक्तारं न विविदुः स होवाचाजीगर्त्तः सौयवसिर्मह्य मपरं शतं दत्ताह मेनं नियोक्ष्यामीति तस्मा अपरं शतं ददुस्तं स निनियोज तस्मा उपाकृताय नियुक्तायाप्रीताय पर्यग्निकृताय विशसितारं न विविदुः स होवाचाजीगर्त्तः सौयवसिर्मह्य मपरं शतं दत्ताह मेनं विशसिष्यामीति तस्मा अपरं शतं ददुः सोऽसिं निःशान एयायाथ ह शुनःशेप ईक्षांचक्रे ऽमानुष मिव वै मा विशसिष्यन्ति हन्ताहं देवता उपधावामीति स प्रजापति मेव प्रथमं देवताना मुपससार कस्य नूनं कतमस्यामृताना मित्येतयर्चा तं प्रजापतिरुवाचाग्निर्वै देवानां नेदिष्ठस्त मेवोपधावेति सोऽग्नि मुपससाराग्नेर्वयं प्रथमस्यामृताना मित्येतयर्चा त मग्निरुवाच सविता वै प्रसवाना मीशे त मेवोपधावेति स सवितार मुपससाराभि त्वा देव सवितरित्येतेन तृचेन तं सवितोवाच वरुणाय वै राज्ञे नियुक्तोऽसीति त मेवोपधावेति स वरुणं राजान मुपससारात उत्तराभिरेकत्रिंशता तं वरुण उवाचाग्निर्वै देवानां मुखं

सुहृदयतमस्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति सोऽग्निं
तुष्टावात उत्तराभिर्द्वाविंशत्या त मग्निरुवाच विश्वान्
नु देवान् स्तुह्यथ * त्वोत्स्रक्ष्याम इति स विश्वान्
देवांस्तुष्टाव नमो महद्भ्यो नमो अर्भकेभ्य इत्येत-
यर्चा तं विश्वेदेवा ऊचुरिन्द्रो वै देवाना मोजिष्ठो
बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमस्तं नु स्तुह्यथ
त्वोत्स्रक्ष्याम इति स इन्द्रं तुष्टाव यच्चिद्धि सत्य
सोमपा इति चैतेन सूक्तेनोत्तरस्य च पञ्चदशभिस्तस्मा
इन्द्र † स्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ
त मेतया प्रतीयाय शश्वदिन्द्र इति त मिन्द्र उवाचा-
श्विनौ नु स्तुह्यथ त्वोत्स्रक्ष्याम इति सोऽश्विनौ
तुष्टावात उत्तरेण तृचेन त मश्विना ऊचतुरुषसं नु
स्तुह्यथ त्वोत्स्रक्ष्याम इति स उषसं तुष्टावात उत्त-
रेण तृचेन तस्य ह स्मर्च्यृच्युक्तायां वि पाशो मुमुचे
कनीय ऐक्ष्वाकस्योदरं भवत्युत्तमस्या मेवर्च्युक्तायां
वि पाशो मुमुचेऽगद ऐक्ष्वाक आस ॥ ४ (१६) ॥

हरिश्चन्द्रस्य राजसूयानुष्ठानं दर्शयति— “तस्य ह विश्वामित्रो होतासीज्जमदग्निरध्वर्युर्वसिष्ठो ब्रह्मा ऽयास्य उद्गाता; तस्मा उपाकृताय नियोक्तारं न विविदुः; स होवाचाजीगर्त्तः सौयवसिर्मह्य मपरं शतं दत्ताह मेनं नियोक्ष्यामीति; तस्मा अपरं शतं

---

* “देवान्त्स्तुह्यथ” च।

† “इन्द्रः” क, च, ञ।

हत्वा स निर्नियोज"–इति। विश्वामित्रादयो महर्षयः ‘तस्य’ हरिश्चन्द्रस्य यागे राजसूये होत्रादयश्चत्वारो मह‍र्त्विज आसन्। तत्र जमदग्निरध्वर्युरभिषेचनीये सोमयागे ‘तं’ शुनःशेपं सवनीयपशुत्वेनोपाकृतवान्। बर्हिर्युक्तया शाखया मन्त्रपुरस्सरं समुपस्पृश्य स्वीकारः ‘उपाकरणम्’। तत ऊर्ध्वं यूपबन्धनं ‘नियोजनम्’। तच्च क्रूरकर्मत्वादध्वर्युः नियोजने ऽप्रवृत्तः। ततः ‘उपाकृताय तस्मै’* उपाकरणेन संस्कृतस्य शौनःशेपस्य ‘नियोक्तारं’ यूपे बन्धनकर्त्तारं कञ्चिदपि पुरुषं ‘न विविदुः’ न लेभिरे। तदानीं सूयवसस्य पुत्रः, शुनःशेपस्य पिता, ‘सः’ अजीगर्त्तः मह्यं पूर्वस्माच्छतादपेतम् ‘अपरं’ गोशतं हे यजमानर्त्विजः! दत्त, अहम् ‘एनं’ शुनःशेपं यूपे ‘नियोक्ष्यामि’ रशनया कट्यां शिरसि पादयोश्च बद्ध्वा रशनायास्य यूपे बन्धनं ‘नियोजनम्’ तदहं करिष्यामीति। ‘तस्मै’ अजीगर्त्ताय अपरं गोशतं ददुः; ‘तं’ च शुनःशेपं ‘सः’ अजीगर्त्तो निनियोज। धातोर्द्विर्भावं परित्यज्योपसर्गस्य द्विर्भावश्छान्दसः॥

अथ विशसनप्रवृत्तिं दर्शयति— "तस्मा उपाकृताय नियुक्तायाप्रीताय पर्यग्निकृताय विशसितारं न विविदुः; स होवाचाजीगर्त्तः सौयवसिर्मह्य मपरं शतं दत्ताह मेनं विशसिष्यामीति; तस्मा अपरं शतं ददुः, सोऽसिं निःशान एयाय"–इति। उपाकरण-नियोजने पूर्वमुक्ते। आप्रीसञ्ज्ञिताभिरेकादशभिः प्रयाजयाज्याभिः यद् यजनं तद् ‘आप्रीणनम्’। दर्भरूपेणोल्मुकेन त्रिः प्रदक्षिणीकरणं तत् ‘पर्यग्निकरणम्’। तथाविधसंस्कारचतुष्टययुक्ताय† ‘तस्मै’‡ तस्य शुनःशेपस्य ‘विशसितारं’ हिंसितारं शूरा-

---

*, ‡ "षष्ठ्यर्थेति चतुर्थीति वाच्यम्"–इति पा० २. ३. ६२ वा०।

† तदेतच्चतुष्टयविध्यादिकम् १भा० २१३–२१४ पृष्ठेषु द्रष्टव्यम्।

स्नानं कश्चिदपि पुरुषं न लेभिरे । ततोऽजीगर्त्तः पूर्ववदपरं गोशतं गृहीत्वा मारयितुम् 'असिं' खड्गं 'निःशानः' निशितं तीक्ष्णं कुर्वन्नेव 'एयाय' आजगाम ॥

पितुरजीगर्त्तस्य पुत्रमारणोद्योगानन्तरं वृत्तान्तं दर्शयति— "अथ ह शुनःशेप ईक्षाञ्चक्रेऽमानुष मिव वै मा विशसिष्यन्ति, हन्ताहं देवता उपधावामीति; स प्रजापति मेव प्रथमं देवताना मुपससार, कस्य नूनं कतमस्यामृताना मित्येतयर्चा"–इति । 'अथ' पितुः पुत्रमारणोद्योगानन्तरं 'शुनःशेपः' पुत्रो मनस्येवं 'ईक्षाञ्चक्रे' विचारितवान् । "अन्यत्र पर्यग्निकृतं पुरुष मारण्यांश्चोत्सृजन्ति अहिंसायै"–इतिश्रुतेः पर्यग्निकरणादूर्ध्वं मनुष्यं परित्यजन्ति । एते तु 'मा' माम् 'अमानुष मिव' मनुष्यव्यतिरिक्त मजादिपशु मिव 'विशसिष्यन्ति' मारयिष्यन्ति । 'हन्त' हा कष्ट मेतत् सम्पन्नम् । अहं मितः परं रक्षार्थं देवताः 'उपधावामि' भजामि । 'इति' एतद् विचार्य देवानां मध्ये 'प्रथमं' मुख्यं प्रजापति मेव "कस्य नूनम्"–इत्यृचा (ऋ० सं० १. २४. १.) 'उपससार' सेवितवान् ॥

तस्य प्रजापतेः सहकारित्वेनाग्नेः सेवां दर्शयति— "तं प्रजापतिरुवाचाग्निर्वै देवानां नेदिष्ठस्त मेवोपधावेति सोऽग्नि मुपससाराग्नेर्वयं प्रथमस्यामृताना मित्येतयर्चा"–इति । 'तं' सेवकं शुनःशेपं प्रजापतिरेव मुक्तवान् । अग्निः सर्वेषां देवानां 'नेदिष्ठः' हविर्वहनेनातिसमीपवर्त्ती, अतस्त मेवोपास्स्वेत्युक्तः 'सः' शुनःशेपः "अग्नेर्वयम्"–इत्यृचा (ऋ०सं०१.२४.२.) अग्नि मुपासितवान् ॥

तस्य चाग्नेः सहकारित्वेन सवितुरुपासनं दर्शयति— "त मग्निरुवाच, सविता वै प्रसवाना मीशे, त मेवोपधावेति; स

सवितार मुपससाराभि त्वा देव सवितरित्येतेन तृचेन”–इति । ‘प्रसवानां’ सर्वेषु कार्येषु प्रेरणारूपाणा मनुज्ञानात् सविता ‘ईशे’ स्वामी भवति । तस्मात् त मेवोपधावेत्यग्निनोपदिष्टः “अभि त्वा” -इति (ऋ०सं०१.२४.३-५.) तृचेन सवितार मुपासितवान् ॥

तस्य च सवितुः सहकारित्वेन वरुणस्योपासनं दर्शयति—“तं सवितोवाच, वरुणाय वै राज्ञे नियुक्तो ऽसीति, त मेवोपधावेति ; स वरुणं राजान मुपससारात उत्तराभिरेकत्रिंशता”–इति । हे शुनःशेप ! वरुणार्थं त्वं यूपे बद्धोऽसि, अतो वरुण मुपास्स्वेति सवित्रोक्तः, पूर्वस्मात् सवितृविषयात् तृचात् उत्तराभिरेकत्रिंशत्सङ्ख्याकाभिरृग्भिर्वरुण मुपासितवान् । “न हि ते क्षत्रम्”–इत्याद्याः सूक्तशेषभूता दशर्चः (ऋ० सं० १. २४. ६-१५.), “यच्चिद्धि ते विशः”–इत्यादिक मेकविंशत्यृचं सूक्तम् (ऋ० सं० १. २५.), इत्येवं एकत्रिंशत् सङ्ख्या द्रष्टव्या ॥

तस्य च वरुणस्य सहकारित्वेन पुनरप्यग्नेरुपासनं दर्शयति—“तं वरुण उवाचाग्निर्वै देवानां मुखं सुहृदयतमस्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति ; सोऽग्निं तुष्टावात उत्तराभिर्द्वाविंशत्या”–इति । अत्र अग्निः सर्वेषां देवानां ‘मुखं’ मुखस्थानीयः ; अग्निद्वारेणैव सर्वैर्देवैर्हविस्स्वीकारात् । अत एव प्रीत्या हविर्वहनादतिशयेन सुहृदयः ‘सुहृदयतमः’ । ‘तम्’ अग्निं ‘नु’ क्षिप्रं स्तुहीति वरुणेनोक्तः पूर्वोक्ताभ्यः ऋग्भ्यः उत्तराभिर्द्वाविंशतिसङ्ख्याकाभिरृग्भिरग्निं तुष्टाव । “वसिष्वा हि”–इत्यादिकं दशर्चं सूक्तम् (ऋ० सं० १. २६.), “अश्वं न त्वा”–इत्यादिकं त्रयोदशर्चं सूक्तम् (ऋ०सं०१.२७.), तत्रान्त्यां परित्यज्य वसिष्वादिसूक्तद्वयगता ऋचो द्वाविंशतिसङ्ख्याकाः ॥

अग्नेः सहकारित्वेन विश्वेषां देवाना मुपासनं दर्शयति— "त मग्निरुवाच, विश्वान् नु देवान् स्तुह्यथ त्वोत्स्रक्ष्याम इति; स विश्वान् देवांस्तुष्टाव, नमो महद्भ्यो नमो अर्भकेभ्य इत्येतयर्चा"—इति। यद्यपि वरुणपाशेन बद्धत्वात् वरुण एव शुनःशेप मुत्स्रष्टुं समर्थः, तथाप्यग्न्यादीनां सहकारित्ववचनं दार्ढ्यार्थं द्रष्टव्यम्। विश्वे देवा गणरूपा न भवन्ति, किन्तु सर्वे देवाः, तान् "नमो महद्भ्यः"—इत्येतयर्चा (ऋ० सं० १. २७. १३.) उपासितवान् ॥

तेषां च विश्वेषां देवानां सहकारित्वेनेन्द्रस्योपासनं दर्शयति— "तं विश्वे देवा ऊचुरिन्द्रो वै देवाना मोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमस्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति; स इन्द्रं तुष्टाव, यच्चिद्धि सत्य सोमपा इति चैतेन सूक्तेनोत्तरस्य च पञ्चदशभिः"—इति। ओजोबलादिशब्दाः पूर्वाचार्यैरेवं व्याख्याताः—

"ओजो दीप्तिर्बलं दार्ढ्यं, प्रसह्यकरणी सहः।
सुजनः सन्, पारयिष्णुरुपक्रान्तसमाप्तिकृत्"—इति।

इष्ठप्रत्यय-तमप्प्रत्ययाभ्यां तत्र तत्रातिशय उच्यते। तादृश मिन्द्रं "यच्चिद्धि सत्य सोमपाः"—इत्यनेन सप्तर्चेन सूक्तेन (ऋ० सं० १.२९.), उत्तरस्मिन्नपि "आ व इन्द्रम्"—इत्यादिके द्वाविंशत्यृचे सूक्ते (ऋ० सं० १. ३०.) पञ्चदशभिर्ऋग्भिश्च तुष्टाव ॥

पूर्व मप्यनुग्रहेण चरैवेत्येव मिन्द्रो रोहितं प्रत्युपदिदेश; तस्योपदेशस्य फलपर्यवसायित्व मनुस्मरतः तस्येन्द्रस्य शुनःशेपस्तुतौ प्रीत्यतिशयं दर्शयति— "तस्मा इन्द्र स्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ, त मेतया प्रतीयाय शश्वदिन्द्र इति"—इति। शुनःशेपेनेन्द्रः स्तूयमानः प्रीतो भूत्वा 'तस्मै' शुनःशेपाय सुवर्णमयं दिव्यं रथ मारोहणार्थं स्वकीयेन मनसैव ददौ। शुनःशेपोऽपि

तदीय मनुग्रह मवगत्य पूर्वोक्ताभ्यः पञ्चदशभ्यः 'उत्तरया' "शश्वदिन्द्रः"-इत्येतया (ऋ० सं०१.३०.१६.) ऋचा 'तं' रथं 'प्रतीयाय' मनसैव प्रतिजगाम * ॥

इन्द्रस्य सहकारित्वेनाश्विनोरुपासनं दर्शयति—"त मिन्द्र उवाचाश्विनौ नु स्तुह्यथ त्वोत्स्रक्ष्याम इति ; सोऽश्विनौ तुष्टावात उत्तरेण तृचेन"-इति । पूर्वोक्तायाः शश्वदिन्द्र इत्यस्याः 'उत्तरेण' "आश्विनावश्वावत्या"-इति (ऋ० सं० १. ३०. १७-१९.) तृचेनाश्विनौ स्तुतवान् ॥

अश्विनोः सहकारित्वेनोषस उपास्तिं दर्शयति— "त मश्विना ऊचतुरुषसं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति ; स उषसं तुष्टावात उत्तरेण तृचेन"-इति । "कस्त उषः"-इत्यादिः (ऋ० सं० १. ३०. २०-२२.) उत्तरस्तृचः ॥

अथोक्तानां सर्वासां देवताना मनुग्रहेण शुनःशेपस्य बन्धमोक्षं हरिश्चन्द्रस्यारोग्यं च दर्शयति— "तस्य ह स्मर्च्यृच्युक्तायां वि पाशो मुमुचे, कनीय ऐक्ष्वाकस्योदरं भवत्युत्तमस्या मेवर्च्युक्तायां वि पाशो मुमुचे ऽगद ऐक्ष्वाक आस"-इति । 'तस्य' पूर्वोक्तस्य तृचस्य सम्बन्धिन्याम् 'ऋचि-ऋचि' एकैकस्या मृच्युक्तायां क्रमेण शुनःशेपस्य पाशो 'विमुमुचे' विशेषेण मुक्तोऽभूत् † । 'ऐक्ष्वाकस्य' हरिश्चन्द्रस्य यत् महोदरं, तदपि क्रमेण 'कनीयः' अत्यल्पं भवति । उत्त-

---

* "स्तूयमानः शश्वदिति प्रीतस्तु मनसा ददौ ।
शुनःशेपाय दिव्यं तु रथं सर्वं हिरण्मयम् ॥"-इति बृ० दे० ३. १०१ ।

† "शुनःशेप माजीगर्तिं वरुणोऽगृह्णात्, स एतां वारुणी मपश्यत्, तया वै स आत्मानं वरुणपाशादमुञ्चत्"-इति तै० सं० ५. २. २. ३ । "शौनःशेप माख्यापयते, वरुणपाशादेवैनं मुञ्चति"-इति तै० ब्रा० १. ७. १०. ६ ।

मस्या मृत्युमायां पाशो विमुमुचे, एवं सर्वात्मना मुक्तोऽभूत्, ऐक्ष्वाकोऽपि 'अगदः' निःशेषेण रोगरहित आस * ॥ ४ (१६) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां तृतीयाध्याये
(त्रयस्त्रिंशाध्याये) चतुर्थः खण्डः ॥ ४ (१६) ॥

॥ अथ पञ्चमः खण्डः ॥

त ऋत्विज ऊचुस्त्व मेव नो ऽस्याह्नः संस्था मधिगच्छेत्यथ हैतं शुनःशेपो ऽञ्जःसवं ददर्श त मेताभिश्चतसृभिरभिसुषाव यच्चिद्धि त्वं गृहे गृह इत्यथैनं द्रोणकलश मभ्यवनिनायोच्छिष्टं चम्वोर्भरेत्येतयर्चा ऽथ हास्मिन्नन्वारब्धे पूर्वाभिश्चतसृभिः सस्वाहाकाराभिर्जुहवाञ्चकाराथैन मवभृथ मभ्यवनिनाय त्वं नो अग्ने वरुणस्य विद्वानित्येताभ्या मथैन मत ऊर्ध्व मग्नि माहवनीय मुपस्थापयाञ्चकार शुनश्चिच्छेपं निदितं सहस्रादित्यथ ह शुनःशेपो विश्वामित्रस्याङ्क माससाद स होवाचाजीगर्त्तः सौयवसिर्ऋषे पुनर्मे पुत्रं देहीति

---

* इद मेवाख्यानं रामायणेऽपि बहु व्यतिक्रम्याख्यातम् १. ६१, ६२ सर्गयोः । भागवतेऽप्येतदुपाख्यानम् ९. ७, १६ अध्याययोः । तथा महाभारतेऽपि १२. ३. ६–८ । हरिवंशेऽपि २७. ५७–६० ।

मेति होवाच विश्वामित्रो देवा वा इमं मह्य मरासतेति स ह देवरातो वैश्वामित्र आस तस्यैते कापिलेय-बाभ्रवाः स होवाचाजीगर्त्तः सौयवसिस्त्वं वेहि विह्वयावहा इति स होवाचाजीगर्त्तः सौयवसिराङ्गिरसो जन्मनास्याजीगर्त्तिः श्रुतः कविः ऋषे पैतामहात् तन्तोर्मा ऽपगाः पुनरेहि मा मिति स होवाच शुनःशेपो ऽदर्शुस्त्वा शासहस्तं न यच्छूद्रेष्वलप्सत गवां त्रीणि शतानि त्व मवृणीथा मदङ्गिर इति स होवाचाजीगर्त्तः सौयवसिस्तद्वै मा तात तपति पापं कर्म मया कृतं तदहं निह्नुवे तुभ्यं प्रतियन्तु शता गवामिति स होवाच शुनःशेपो यः सकृत्पापकं कुर्यात् कुर्यादेनत्ततो ऽपरं नापागाः शौद्रान्याया*दसन्धेयं त्वया कृत मित्यसन्धेय मिति ह विश्वामित्र उपपपाद स होवाच विश्वामित्रो भीम एव सौयवसिः शासेन विशिशासिषुः अस्थान् मैतस्य पुत्रो भूर्ममैवोपेहि पुत्रता मिति स होवाच शुनःशेपः स वै यथा नो ज्ञपया राजपुत्र तथा वद यथैवाङ्गिरसः सन्नुपेयां तव पुत्रता मिति स होवाच विश्वामित्रो ज्येष्ठो मे त्वं पुत्राणां स्यास्तव श्रेष्ठा प्रजा स्यात् उपेयादैवं मे दायं तेन वै त्वोपमन्त्रय इति स होवाच शुनःशेपः सञ्ज्ञानानेषु

---

* “शौद्राम्याया”—इति ज, अ ।

वै ब्रूयात्सौहार्द्याय मे श्रियै यथा ऽहं भरत ऋषभोपेयां तव पुत्रता मित्यथ ह विश्वामित्रः पुत्रानामन्त्रयामास मधुच्छन्दाः शृणोतन ऋषभो रेणुरष्टकः ये के च भ्रातरः स्थ नास्मै ज्यैष्ठ्याय कल्पध्व मिति ॥ (५) १७ ॥

बन्धनात् मुक्तस्य शुनःशेपस्योत्तरकालीनं वृत्तान्तं दर्शयति — “त मृत्विज ऊचुस्त्व मेव नो ऽस्याह्नः संस्था मधिगच्छेत्यथ हैतं शुनःशेपो ऽञ्जःसवं ददर्श ; त मेताभिश्चतसृभिरभिसुषाव, यच्चिद्धि त्वं गृहे गृह इत्यथैनं द्रोणकलश मभ्यवनिनायोच्छिष्टं चम्वोर्भरेत्येतयर्चा ; ऽथ हास्मिन्नन्वारब्धे पूर्वाभिश्चतसृभिः सस्वाहाकाराभिर्जुहवाञ्चकाराथैन मवभृथ मभ्यवनिनाय, त्वं नो अग्ने वरुणस्य विद्वानित्येताभ्या मथैन मत ऊर्ध्व मग्नि माहवनीय मुपस्थापयाञ्चकार, शुनश्चिच्छेपं निदितं सहस्रादिति”–इति। देवतानुग्रहयुक्तं ‘तं’ शुनःशेपं विश्वामित्रादयः सर्वे ‘ऋत्विजः’ एव मूचुः,— हे शुनःशेप! त्व मेव ‘नः’ अस्माकम् ‘अस्याह्नः’ अभिषेचनीयाख्यस्य ‘संस्थां’ समाप्तिम् ‘अधिगच्छ’ प्राप्नुहि, अनुष्ठापयेत्यर्थः। तैरेव मुक्ते सत्यनन्तरं शुनःशेप ‘एतम्’ अभिषेचनीयाख्यं सोमयागम् ‘अञ्जःसवं’ ददर्श। ‘अञ्जसा’ ऋजुमार्गेण ‘सवः’ सोमाभिषवो यस्मिन् यागे सोऽञ्जःसवः, तादृशं प्रयोगप्रकारं निश्चितवान्। निश्चित्य च ‘तं’ सोमं “यच्चिद्धि”–इत्यादिभिः चतसृभिः (ऋ० सं० १. २८. ५–२८.) ऋग्भिरभिषुतं कृतवान्। अथ ‘एनम्’ अभिषुतं सोमम् ‘एतया’ “उच्छिष्टं चम्वोः”–इत्यृचा (ऋ० सं० १.२८.९.) द्रोणकलशम् अभिलक्ष्य ‘अवनिनाय’ द्रोणकलशे प्रक्षिप्तवान्। ‘अथ’ अनन्तरम् ‘अस्मिन्’ हरिश्चन्द्रे ‘अन्वारब्धे’

शुनःशेपदेव मुपसृष्टवति सत्युक्ताभ्य ऋग्भ्यः 'पूर्वाभिः' "यत्र ग्रावा"-इत्यादिभिश्चतसृभिर्ऋग्भिः (ऋ० सं० १. २८. १-४.) स्वाहाकारसहिताभिः सोमं जुहवाञ्चकार। "यत्र ग्रावा"-इत्यादिकं सूक्तं नवर्चम्; तत्र यच्चिद्धीति पञ्चमी, ता मारभ्य चतसृभिः ऋग्भिरभिषवः; "उच्छिष्टम्"-इत्यादिका नवमी, तया द्रोणकलशे प्रक्षेपः; "यत्र ग्रावा"-इत्यादिभिश्चतसृभिर्होमः; इत्येवं कृत्स्नस्य सूक्तस्य विनियोगः। 'अथ' होमानन्तर मेव कर्त्तव्यम् अवभृथम् 'अभि'लक्ष्य 'अवनिनाय' सर्वं मवभृथसाधनं तद्देश नीत्वा, "त्वं नो अग्ने"-इत्यादिकाभ्याम् (ऋ० सं० ४.१.४,५.) आस्यवभृथयागं कृतवान्। 'अथ' तथा कृत्वा, तत ऊर्ध्वम् 'एनम्' आहवनीय मग्निं "शुनश्चित्"-इत्यादिना 'उपस्थापयाञ्चकार' हरिश्चन्द्र मुपस्थाने प्रेरयामास। सोऽय मञ्जःसवः; इष्टिपशुसाङ्कर्य्यं मन्तरेण 'अञ्जसा' ऋजुमार्गेणानुष्ठितत्वात्॥

विश्वामित्राजीगर्त्तयोः कञ्चित् संवादं दर्शयति — "अथ ह शुनःशेपो विश्वामित्रस्याङ्क माससाद; स होवाचाजीगर्त्तः सौयवसिर्ऋषे पुनर्मे पुत्रं देहीति; नेति होवाच विश्वामित्रो, देवा वा इमं मह्य मरासतेति, स ह देवरातो वैश्वामित्र आस, तस्यैते कापिलेय-बाभ्रवाः"-इति। 'अथ' अभिषेचनीयसमाप्त्यनन्तरं हरिश्चन्द्रसहितेष्वृत्विक्षु विस्मितेषु, स शुनःशेपः इत ऊर्ध्वं कस्य पुत्रोऽस्त्विति विचारे सति तदीयेच्छैव नियामिकेति महर्षीणां वचनं श्रुत्वा शुनःशेपः स्वेच्छया विश्वामित्रपुत्रत्व मङ्गीकृत्य सहसा तदीय मङ्क माससाद; पुत्रो हि सर्वत्र पितुरङ्के निषीदति। तदानीं सूयवसपुत्रो ऽजीगर्त्तो विश्वामित्रं प्रत्येव मुवाच। हे महर्षे! मदीयं पुत्र मेनं पुनरपि मह्यं देहीति। स विश्वामित्रो

मीति निराकृत्यैव मुवाच। प्राजापत्यादयो 'देवाः' एव 'इमं' शुनःशेपं मह्यम् 'अरासत' दत्तवन्तः; तस्मात् तुभ्यं न दास्यामीति। 'सः' च शुनःशेपो देवैर्दत्तत्वाद् 'देवरातः'–इति–नामधारी विश्वामित्रपुत्र एवास। 'तस्य' च देवरातस्य 'एते' कपिलगोत्रोत्पन्नाः बभ्रुगोत्रोत्पन्नाश्च बन्धवो ऽभवन् ॥

अथ शुनःशेपाजीगर्त्तयोः संवादं दर्शयति— "स होवाचाजीगर्त्तः सौयवसिस्त्वं वेहि विह्वयावहा इति; स होवाचाजीगर्त्तः सौयवसिराङ्गिरसो जन्मनास्याजीगर्त्तिः श्रुतः कविः, ऋषे पैतामहात् तन्तोर्मा ऽपगाः पुनरेहि मा मिति; स होवाच शुनःशेपो ऽदर्शुस्त्वा शासहस्तं न यच्छूद्रेष्वलप्सत, गवां त्रीणि शतानि त्वमवृणीथा मदङ्गिर इति"–इति। विश्वामित्रेण निराकृतः सो ऽजीगर्त्तः शुनःशेपं प्रत्येव मुवाच। हे पुत्र! 'त्वं वा' त्व मेव विश्वामित्रादपगतः सन् 'एहि' अस्मद्‌गृहे गच्छ। त्वदीयमाता चाहञ्चोभावावां 'विह्वयावहै' विशेषेण तवाह्वानं करवावहै;— इत्युक्त्वा तूष्णी मवस्थितं तं शुनःशेपं प्रति पुनरपि कया चिद्गाथयैव मुवाच,— हे शुनःशेप! 'त्वं' जन्मना 'आङ्गिरसः' अङ्गिरोगोत्रोत्पन्नः, अजीगर्त्तस्य पुत्रः, 'कविः' विद्वान्, 'श्रुतः' इत्येवं सर्वत्र प्रसिद्धः; अतो हे 'ऋषे' शुनःशेप! 'पैतामहात्' पितामहेन प्रजापतिना सम्पादितात् 'तन्तोः' सन्तानात् अङ्गिरोवंशात् 'मा अपगाः' अपगतो मा भव; तस्मात् पुनरपि 'मा मेहि' मद्‌गृहे समागच्छ। इत्युक्तः शुनःशेपः स्वय मपि गाथया प्रत्युत्तरं ददौ। शासो विशसनहेतुः खड्गः; हे अजीगर्त्त! मद्वधाय 'शासहस्तं' त्वां सर्वेऽपि 'अदर्शुः' दृष्टवन्तः। 'यत्' क्रूरं कर्म शूद्रेषु अत्यन्तनीचेष्वपि 'नालप्सत' न लब्धवन्तो लौकिका जनाः, तादृशं क्रौर्यं

त्वया कृतम् । हे 'अङ्गिरः' आङ्गिरसगोत्रोत्पन्न ! अजीगर्त ! 'मत्' मां निमित्तीकृत्य त्वं गवां शतानि त्रीणि 'अवृणीथाः' वृतवानसि, तदिद मत्यन्तकष्टम् 'इति' उक्तवान् ॥

पुनरप्यजीगर्त्तशुनःशेपयोरुक्तिप्रत्युक्ती दर्शयति— "स होवाचाजीगर्त्तः सौयवसिस्तद्वै मा तात तपति, पापं कर्म मया कृतं; तदहं निह्नवे तुभ्यं प्रतियन्तु शता गवा मिति ; स होवाच शुनःशेपो यः सकृत्पापकं कुर्यात्, कुर्यादेनत्ततो ऽपरं ; नापागाः शौद्रान्न्यायादसन्धेयं त्वया कृत मिति"-इति । शुनःशेपेनोपालब्धो ऽजीगर्त्तः स्वकीय मनुतापं दर्शयितुं काञ्चिद्गाथा मेव मुवाच,— हे 'तात' पितृवदुपलालनीय शुनःशेप ! मया यत्पापं कृतं, 'तद्वै मा तपति' तदेव मां मनसि सन्तप्तं करोति ; अहं 'तत्' पापं 'निह्नवे' परिहरामि ; 'गवां शतानि' पूर्वं मया स्वीकृतानि त्रीणि यानि, तानि 'तुभ्यं' त्वदर्थं 'प्रतियन्तु' प्रत्येक मेव प्राप्नुवन्तु ; इतरयोः पुत्रयोर्गावो मा भूवन्, तवैव सर्वाः सन्त्विति । ततः 'सः' शुनःशेपो गाथया प्रत्युत्तरं ददौ । 'यः' पुमान् धर्मशास्त्रभीतिरहितः सकृत्पापकं कुर्यात्, स पुमान् ततः पापादन्यत् 'एनत्' पापं तदभ्यासवशात् कुर्यादेव ; त्वं तु 'शौद्रात् न्यायात्' नीचजातिसम्बन्धिनः क्रूरादाचरणात् 'नापागाः' अपगतो न भवसि ; 'असन्धेयं' प्रतिसमाधानरहितं पापं त्वया कृतम् 'इति' एषा शुनःशेपस्य प्रत्युक्तिः ॥

अथ विश्वामित्रस्य वाक्यं दर्शयति— "असन्धेय मिति ह विश्वामित्र उपपपाद ; स होवाच विश्वामित्रो भीम एव सौयवसिः शासेन विशिशासिषुः अस्थान्, मैतस्य पुत्रो भूर्ममैवोपेहि पुत्रता मिति"-इति । 'असन्धेयम्' अप्रतिसमाधेयं पाप मिति

शुनःशेपेन यदीरितम्, तदेतदप्रतिसमाधेयत्वं विश्वमित्रः 'उपपपाद' युक्तिभिरुपपादितवान्। तदुपपादनार्थं मेव विश्वामित्र इमां गाथा मुवाच। सूयवसस्य पुत्रो ऽजीगर्त्तः 'भीम एव' भयहेतुरेव सन् 'शासेन' हस्तगतखड्गेन सः 'विशिशासिषुरस्थात्' विशसनं कर्त्तुं मिच्छुरवस्थितवान्। अतो हे शुनःशेप! 'एतस्य' पापिष्ठस्य पुत्रो मा भूः, किन्तु ममैव पुत्रता मुपेहि॥

अथ शुनःशेपविश्वामित्रयोरुक्तिप्रत्युक्ती दर्शयति— "स होवाच शुनःशेपः, स वै यथा नो ज्ञपया राजपुत्र तथा वद, यथैवाङ्गिरसः सन्नुपेयां तव पुत्रता मिति; स होवाच विश्वामित्रो ज्येष्ठो मे त्वं पुत्राणां स्यास्, तव श्रेष्ठा प्रजा स्यात्, उपेया दैवं मे दायं, तेन वै त्वोपमन्त्रय इति"-इति। विश्वामित्रेणैवम्बोधितः शुनःशेपः पुनरपि गाथया विश्वामित्रं प्रत्येव मुवाच। अयं विश्वामित्रो जन्मना क्षत्रियः सन् स्वकीयेन तपोमहिम्ना ब्राह्मण्यं प्राप्तवानित्येवं तद्वृत्तान्तं सूचयितुं हे राजपुत्रेति सम्बोधितवान्। 'स वै' तथाविधो राजजातीय एव सन् 'यथा' येन प्रकारेण 'नः' अस्माभिः सर्वैः 'आ' समन्तात् 'ज्ञपय' ब्राह्मणत्वेन ज्ञायसे, तथैवास्मद्विषये अपि त्वं वद। कथं वदितव्य मिति तदुच्यते — अह मिदानी मङ्गिरोगोत्रः सन्, तत्परित्यागेन तव पुत्रत्वं येनैव प्रकारेणोपेयाम्, तथैवानुगृहाणेति शेषः। एतद्वाक्याभिप्रायः पूर्वैः सङ्क्षिप्य दर्शितः—

"पुरात्मानं नृपं विप्रं तपसा कृतवानसि।
एव माङ्गिरसं मा त्वं वैश्वामित्र नृपे कुरु"-इति।

ततो विश्वामित्रो गाथया प्रत्युत्तर मुक्तवान्। हे शुनःशेप! त्वं मे पुत्राणां मध्ये 'ज्येष्ठः स्याः' ज्येष्ठो भव, तव पुत्रादिरूपा

'प्रजा' अपीतरस्याः श्रेष्ठा स्यात् । 'मे' मह्यं विश्वामित्राय 'दैवं' देवैः प्रसन्नैर्दत्तं 'दायं' पुत्रत्वरूपलाभम् 'उपेयाः' प्राप्नुहि; 'तेन वै' तेनैव कारणेन 'त्वोपमन्त्रये' त्वां पुत्रत्वेन व्यवहरामि ॥

पुनरपि शुनःशेपविश्वामित्रयोर्वृत्तान्तं दर्शयति— "स होवाच शुनःशेपः, सञ्ज्ञानानेषु वै ब्रूयात्, सौहार्द्याय मे श्रियै, यथा ऽहं भरत ऋषभोपेयां तव पुत्रता मित्यथ ह विश्वामित्रः पुत्रानामन्त्रयामास,— मधुच्छन्दाः शृणोतन, ऋषभो रेणुरष्टकः, ये के च भ्रातरः स्थ, नास्मै ज्यैष्ठ्याय कल्पध्व मिति"—इति । विश्वामित्रेण प्रलोभितः शुनःशेपः स्वकार्यदार्ढ्यार्थं गाथयैव मुवाच । 'सञ्ज्ञानानेषु' मद्विषयैकमत्यं प्राप्तेषु त्वदीयपुत्रेषु 'वै' अपि मां ब्रूयात्, ज्येष्ठभ्रातृत्वेन व्यवहरतु ; तच्च 'मे' मम 'सौहार्द्याय' भ्रातृभिरितरैः स्नेहातिशयाय 'श्रियै' धनलाभाय च सम्पद्यते । हे 'भरतर्षभ' भरतवंशश्रेष्ठ विश्वामित्र ! 'अहं' तव पुत्रतां यथोपेयां, तथैवैतेषां पुत्राणां मध्ये अनुगृहाणेति शेषः । ततो विश्वामित्र इतरान् पुत्रानाहूय गाथयैव माज्ञापितवान्,— यो मधुच्छन्दो नाम *, यश्चर्षभः, योऽपि रेणुः, योऽप्यष्टकः, एते मुख्याः † हे पुत्रकाः ! 'शृणोतन' मदीया माज्ञां शृणुत ; ये केचिद् यूयं

---

* "अथाग्निमीळ इत्यादि प्रथमं मण्डलं प्रति ।
शतर्चिनस्तु विज्ञेया ऋषयः सुखसिद्धये ॥
तेषां पूर्वो मधुच्छन्दा, मेधातिथिरनन्तरः ।
शुनःशेपस्तृतीयोऽयं, हिरण्यस्तूप उत्तरः ॥"—इत्यादि आर्षानु० १, २, ३ ।

† ऋक्संहिता-सूक्तेषु केषाञ्चिद् द्रष्टारोऽष्टौ वैश्वामित्राः श्रूयन्ते आर्षानुक्रमण्यादितः । तत्र मधुच्छन्दसः १. १–१० ; ९. १ । ऋषभस्य ३. १३ ; १४ ; ९. ७१ । रेणोः ९.७० ; १०. ८९ । अष्टकस्य १०. १०४ । प्रजापतेः ३. ३८ ; ५४–५६ । पूरणस्य १०. १६० । कतस्य ३. १७ ; १८ । देवरातस्य (शुनःशेपस्य) १, २४–३० ।

सर्वे भ्रातरः स्थ, ते सर्वेऽपि 'मह्यं' शुनःशेपादस्मादपि 'ज्येष्ठाय न कल्पध्वं' ज्येष्ठत्वाभिमानं मा कुरुत, किं त्वसावेव युष्माकं मध्ये ज्येष्ठो भूत्वावतिष्ठता मिति ॥ ५ (१७) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां तृतीयाध्याये
(त्रयस्त्रिंशाध्याये) पञ्चमः खण्डः ॥ ५ (१७) ॥

॥ अथ षष्ठः खण्डः ॥

तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः पञ्चाशदेव ज्यायांसो मधुच्छन्दसः पञ्चाशत् कनीयासस्तद्ये ज्यायांसो न ते कुशलं मेनिरे ताननु व्याजहारान्तान्वः प्रजा भक्षीष्टेति त एतेऽन्ध्राः पुण्ड्राः शबराः * पुलिन्दा मूतिबा इत्युदन्त्या बहवो भवन्ति वैश्वामित्रा दस्यूनां भूयिष्ठाः स होवाच मधुच्छन्दाः पञ्चशता सार्धं यन्नः पिता सञ्जानीते तस्मिंस्तिष्ठामहे वयं पुर-

---

* "शवराः" ख।

स्वा सर्वे कुमहे त्वा मन्वञ्चो वयं स्मसीत्यथ ह विश्वामित्रः प्रतीतः पुत्रांस्तुष्टाव ते वै पुत्राः पशुमन्तो वीरवन्तो भविष्यथ ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त मा पुर एत्रा वीरवन्तो देवरातेन गाथिनाः सर्वे राध्या * स्थ पुत्रा एष वः सद्विवाचनम् एष वः कुशिका वीरो देवरातस्तमन्वित युष्मांश्च दायं म उपेता विद्यां या मु च विद्मसि ते सम्यञ्चो वैश्वामित्राः सर्वे साकं सरातयः देवराताय तस्थिरे धृत्यै श्रैष्ठ्याय गाथिनाः अधीयत देवरातो रिक्थयोरुभयोरृषिः जह्नूनाञ्चाधिपत्ये दैवे वेदे च गाथिनां तदेतत्परऋक् शतगाथं† शौनःशेपमाख्यानं तद्धोता राज्ञेऽभिषिक्तायाचष्टे हिरण्यकशिपावासीन आचष्टे हिरण्यकशिपावासीनः प्रतिगृणाति यशो वै हिरण्यं यशसैवैनं तत् समर्द्धयत्योमित्यृचः प्रतिगर एवं तथेति गाथायां ओमिति वै दैवं तथेति मानुषं दैवेन चैवैनं तन् मानुषेण च पापादेनसः प्रमुञ्चति तस्माद्यो राजा विजिती स्यादप्ययजमान आख्यापयेतैवैतच्छौनःशेपमाख्यानं न हास्मिन्नल्पं च नैनः परिशिष्यते सहस्रमाख्यात्रे दद्याच्छतं प्रतिगरित्र एते चैवासने श्वेतश्चाश्वतरीरथो होतुः पुत्रकामा हा‡प्याख्यापयेरन्

---

* "राध्याः" क, ज। † "शतगाथं" ख, घ। ‡ "चा" म।

लभन्ते * ह पुत्रान् लभन्ते † ह पुत्रान् ॥ ६ (१८) ॥

इत्यैतरेयब्राह्मणे सप्तमपञ्चिकायां तृतीयोऽध्यायः॥३॥

अथ विश्वामित्रपुत्राणां वृत्तान्त माह— "तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः, पञ्चाशदेव ज्यायांसो मधुच्छन्दसः, पञ्चाशत् कनीयांसः"—इति। मधुच्छन्दोनामकः कश्चित् पुत्रो मध्यमः; ततोऽपि ज्येष्ठाः कनिष्ठाश्च प्रत्येकं पञ्चाशत्सङ्ख्याका इत्येवम् 'एकशतं' तस्य पुत्राः ॥

तेषां मध्ये ज्येष्ठानां वृत्तान्त माह— "तद्ये ज्यायांसो न ते कुशलं मेनिरे; ताननु व्याजहारान्तान्वः प्रजा भक्षीष्टेति; त एतेऽन्ध्राः पुण्ड्राः शबराः पुलिन्दा मूतिबा इत्युदन्त्या बहवो भवन्ति वैश्वामित्रा दस्यूनां भूयिष्ठाः"—इति। 'तत्' तेषु एकशतसङ्ख्याकेषु पुत्रेषु मध्ये 'ये' मधुच्छन्दसो ज्येष्ठाः पञ्चाशत्सङ्ख्याकाः सन्ति, 'ते' शुनःशेपस्य विश्वामित्रपुत्रत्वं 'कुशलं न मेनिरे' इदं समीची[illegible]मित्येवं नाङ्गीकृतवन्तः। 'तान्' ज्येष्ठान् पञ्चाशत्सङ्ख्याकान् 'अनु'-लक्ष्य विश्वामित्रो 'व्याजहार' व्याहरणं शापरूपं वाक्य मुक्तवान्। हे ज्येष्ठपुत्राः! युष्माकं मदीयाज्ञातिलङ्घिनां 'प्रजाः' पुत्रादिकाः 'अन्तान् भक्षीष्ट' चण्डालादिरूपान् नीचजातिविशेषान् भजता मिति। 'त एते' शप्ताः सन्तोऽन्ध्रादिपञ्चविधनीचजातिविशेषा भवन्ति। 'इति'-शब्दस्य तत्प्रदर्शनत्वादन्येऽपि नीचजातिविशेषाः सर्वे विवक्षिताः। उद्गतोऽन्तः 'उदन्तः' अत्यन्तनीचजातिः, तत्र भवाः 'उदन्त्याः'। ते 'बहवः' अनेकविधाः वैश्वामित्रसन्ततिजाः

---

* "०रंलभन्त" क, ख, घ, च, "०रंह्लभन्त" ङ।

† "पुत्रां लभन्त" ख, "पुत्रान्लभन्त" ङ, "पुत्राल्लभन्त" च।

'दस्यूनां' तस्कराणां मध्ये 'भूयिष्ठाः' अत्यधिकाः ॥ ज्येष्ठानां वृत्तान्तमुक्त्वा मधुच्छन्दसः तत्कनिष्ठानाञ्च वृत्तान्तं गाथया दर्शयति— "स होवाच मधुच्छन्दाः पञ्चाशता सार्धं, यन्नः पिता सञ्जानीते तस्मिंस्तिष्ठामहे वयं, पुरस्त्वा सर्वे कुर्महे, त्वा मन्वञ्चो वयं स्मसीति"–इति । कनिष्ठपुत्राणां पञ्चाशता सह मधुच्छन्दोनामकः 'सः' मध्यमः पुत्रः, शुनःशेपं प्रत्येव मुवाच— हे शुनःशेप ! 'नः' अस्माकं 'पिता' विश्वामित्रो 'यत्' कार्यं त्वदीयज्येष्ठपुत्रत्वरूपं 'सञ्जानीते' सम्यक् जानाति, अङ्गीकरोति ; 'तस्मिन्' कार्ये वयं 'तिष्ठामहे' तत् कार्यं मङ्गीकुर्मः । 'सर्वे' वयं 'त्वा' शुनःशेपनामानं त्वां 'पुरस्कुर्महे' पुरस्कृत्य ज्येष्ठं कृत्वा वर्त्तामहे । 'त्वा मन्वञ्चः' शुनःशेप मनु गच्छन्तः 'स्मसि' भवाम इत्युक्तवान् ॥

विश्वामित्रवृत्तान्तं दर्शयति— "अथ ह विश्वामित्रः प्रतीतः पुत्रांस्तुष्टाव"–इति । 'अथ' मधुच्छन्दःसहितानां पञ्चाशत्कनिष्ठपुत्राणां शुनःशेपविषयज्येष्ठपुत्रत्वाङ्गीकारानन्तरं स विश्वामित्रः 'प्रतीतः' तेषु प्रत्ययं मदनुकूला इति विश्वासं प्राप्तः प्रीत्या पुत्रान् गाथाभिस्तुष्टाव ॥

तत्र प्रथमां गाथा माह— "ते वै पुत्राः पशुमन्तो वीरवन्तो भविष्यथ, ये मानं मेऽनुगृह्णन्तो वीरवन्त मकर्त्त मा"–इति । हे मधुच्छन्दःप्रमुखाः कनिष्ठपुत्राः! 'ये' यूयं 'मे मानं' मदीयं मतम् 'अनुगृह्णन्तः' आनुकूल्येन स्वीकुर्वन्तो 'मां' विश्वामित्रं 'वीरवन्तं' स्वधर्मधुरपुत्रयुक्तम् 'अकर्त्त' कृतवन्तः, 'ते वै' तादृशा यूयं बहुविधपशुपुत्रयुक्ताश्च भविष्यथ ॥

द्वितीयां गाथा माह— "पुर एता वीरवन्तो देवरातेन गाथिनाः, सर्वे राध्याः स्थ पुत्रा एष वः सद्विवाचनम्"–इति ।

गाथिनशब्दो विश्वामित्रस्य पितरमाचष्टे । हे 'गाथिनाः' गाथिनपौत्राः * 'पुर एता' युष्माकं पुरतो एता, मुख्येन देवरातेन सह यूयं सर्वे 'वीरवन्तः' श्रेष्ठपुत्रयुक्ताः 'राध्याः स्थ' सर्वैः पुरुषैराराधनीयाः पूज्या भवथ ; हे 'पुत्राः' मधुच्छन्दःप्रभृतयः ! 'एषः' देवरातो 'वः' युष्माकं 'सद्विवाचनम्' सन्मार्गस्य विशेषतोऽध्यापकं, करिष्यतीति शेषः ॥

तृतीयां गाथामाह— "एष वः कुशिका वीरो देवरातस्तमन्वित, युष्मांश्च दायं म उपेता विद्यां यामु च विद्मसि"—इति । हे 'कुशिकाः' कुशिकनाम्नो मत्पितामहस्य सम्बन्धिनो मधुच्छन्दःप्रभृतयः! 'एषः' देवरातः 'वः' युष्माकं, ज्येष्ठभ्रातेति शेषः । 'तं' देवरातं यूयम् 'अन्वित' अनुगता भव । मे 'मदीयं' 'दायं' धनं युष्मांश्च 'उपेता' प्राप्स्यति ; चकाराद् देवरातञ्च । 'या मु च' यामपि काञ्चिद् वेदशास्त्रादिरूपां 'विद्यां' 'विद्मसि' वयं जानीमः; सापि युष्मान् 'उपेता' प्राप्स्यति ॥

चतुर्थीं गाथामाह— "ते सम्यञ्चो वैश्वामित्राः सर्वे साकं सरातयः, देवराताय तस्थिरे धृत्यै श्रैष्ठ्याय गाथिनाः"—इति । हे 'वैश्वामित्राः' विश्वामित्रस्य मम पुत्राः ! ये 'गाथिनाः' गाथिनगोत्राः, 'ते' यूयं सर्वेऽपि 'सम्यञ्चः' समीचीनबुद्धयः, ये 'साकं' देवरातेन सार्धं 'सरातयः' रातिर्धनसम्पत्तिस्तया युक्ताः सन्तो 'देवराताय' मदीयश्रेष्ठपुत्रस्य देवरातस्य 'धृत्यै' धारणं युष्मत्पोषणम् ; 'श्रैष्ठ्याय' युष्माकं मध्ये श्रेष्ठत्वञ्च 'तस्थिरे' अङ्गीकृतवन्तः ॥

पञ्चमीं गाथामाह— "अधीयत देवरातो रिक्थयोरुभयोर्ऋषिः, जह्नूनाञ्चाधिपत्ये दैवे वेदे च गाथिनाम्"—इति । "इक्

---

* "रेणूनां वैश्वामित्रगाथिनरैणवेति"—इति आश्व० श्रौ० १२. १४. ९ ।

अरथि"–इति धातुः । 'अधीयत' स्मृतिकारैर्महर्षिभिः स्मर्यते । कथ मिति तदुच्यते— अयं देवरातो ह्यामुष्यायणत्वाद् 'उभयोः' अजीगर्तविश्वामित्रयोः सम्बन्धिनी ये 'रिक्थे' धने, तयोः 'ऋषिः' द्रष्टा, तदुभय मर्हतीत्यर्थः । अजीगर्तस्य कूटस्थ ऋषिर्जह्नुसञ्ज्ञकः ; तस्य वंशे जाताः सर्वे जह्नवः ; तेषां च 'आधिपत्ये' स्वामित्वे देवरातो योग्यः । तथा 'दैवे' देवसम्बन्धिनि यागादिकर्मणि, 'वेदे' च मन्त्ररूपे समर्थः । 'गाथिनाम्' अस्मत्पितृवंशोत्पन्नानाञ्च सर्वेषा माधिपत्ये योग्यः ॥

उक्त मुपाख्यान मुपसंहरति— "तदेतत्परऋक्शतगाथं शौनःशेप माख्यानम्"–इति । "कस्य नूनं ०—० नि धारय"–इत्यन्ताः सप्ताधिकनवतिसङ्ख्याका ऋचः *, "त्वं नः"–"स त्वम्"–इत्यादिकास्तिस्र ऋचः †, एव मृचां शतम् ; 'परः'शब्दोऽधिकवाची ; पूर्वोक्तादृक्शतात् 'परः' अधिका एकत्रिंशत्सङ्ख्याकाः "यन्त्विमम्" –इत्याद्या गाथाः ‡ यस्मिन्नाख्याने तदेतत् 'परऋक्शतगाथं' । शुनःशेपेन दृष्टाः सप्ताधिकनवतिसङ्ख्यायुक्ता ऋचो याः सन्ति, अन्येन दृष्टास्तिस्र ऋचो याः सन्ति, ब्राह्मणे प्रोक्ता एकत्रिंश-

---

* ऋक्संहितायां शुनःशेपेन दृष्टानि अष्टौ सूक्तान्याम्नातानि । तत्र प्रथममण्डलस्थ षष्ठानुवाकात्मकानि सप्त, नवममण्डलीयतृतीयञ्चैकम् । इह प्रथममण्डलीयानां ग्रहण मिष्टम् ; तेषा मेवात्र प्रतीकग्रहणादितः समुल्लेखात् । तदत्र कस्य नून मिति प्रथमसूक्ताद्यभागः नि धारयेति तु सप्तमसूक्तान्तभाग इति बोध्यम् । तदेवं १सू० १५ऋ०, २सू० २१ऋ०, ३सू० १०ऋ, ४सू० १२ऋ०, ५सू० ९ऋ०, ६सू० ७ऋ०, ७सू० २२ऋ० । सङ्कलनया ९७ ऋचो भवन्ति ।

† तत्र त्वं न इत्यस्याः (ऋ० सं० ४. १. ४.), स त्व मिति तदुत्तरस्याश्च वामदेवऋषिः तृतीयस्याः शुनश्चिच्छेप मित्यस्याः (५. २, ७.) कुमारो वृशो वोभौ वा ऋषी ।

‡ यन्त्विमं पुत्र मिच्छन्तीति ५९पृ० ७पं० द्रष्टव्यम् ।

शाखाविशेषा याः सन्ति, तैः सर्वैरुपेतं “हरिश्चन्द्रो ह वैधसः”-इत्यादिकं (५८पृ० ५पं०) सर्वं शुनःशेपविषय माख्यानम् ॥

तस्याख्यानस्य राजसूयक्रतौ विनियोगं दर्शयति— “तद्धोता राज्ञेऽभिषिक्तायाचष्टे”-इति । राजसूयक्रतावभिषेचनीयाख्ये कर्मणि यदा राजा अभिषिक्तो भवति, तदानीं तस्मै ‘राज्ञे’ ‘तत्’ आख्यानं होता कथयेत् * ॥

तत्रेतिकर्त्तव्यं दर्शयति— “हिरण्यकशिपावासीन आचष्टे ; हिरण्यकशिपावासीनः प्रतिगृणाति ; यशो वै हिरण्यं, यशसैवैनं तत् समर्द्धयति”-इति † । होता यदा उपाख्यानं कथयति, तदानीं ‘हिरण्यकशिपौ’ सुवर्णनिर्मितसूत्रैर्निष्पादिते कशिपौ स होतोपविशेत् । तदाख्यानमध्ये अध्वर्युश्च हिरण्यकशिपावासीनो वक्ष्यमाणं ‘प्रतिगरं’ ब्रूयात् । हिरण्यस्य यशोहेतुत्वात् यशस्त्वम् ; तथा सति ‘एनं’ यशसैव समृद्धं करोति ॥

अध्वर्युणा प्रयोक्तव्यं प्रतिगरविशेषं दर्शयति— “ओ मित्यृचः प्रतिगर, एवं तथेति गाथाया ; ओ मिति वै दैवं, तथेति मानुषं ; दैवेन चैवैनं तन् मानुषेण च पापादेनसः प्रमुञ्चति”-इति ‡ । होत्रा प्रयुक्ताया एकैकस्या ऋचोऽन्ते “अध्वर्योरोम्”-इत्येतादृशः प्रतिगरो भवति । ओ मित्येतच्छन्दोरूपं ‘दैवं’ देवैरङ्गीकारार्थं प्रयुज्यते ; तत् तथेत्यन्तं ‘मानुषं’ मनुष्या अङ्गीकारे तथेति शब्दं

---

* “अथ राजसूयाः”-इति प्रक्रम्य प्रोक्त माश्वलायनेन— “संस्थिते मरुत्वतीये दक्षिणत आहवनीयस्य हिरण्यकशिपावासीनो ऽभिषिक्ताय पुत्रामात्यपरिवृताय राज्ञे शौनःशेप माख्यापयीत”-इति श्रौ० ९, ३, ९ ।

† एष एव पाठः समाम्नात आश्वलायनेन । श्रौ० ९. ३. १० ।

‡ उद्धृतश्चैष पाठ आश्व० श्रौ० ९. ३. ११, १२ ।

प्रमुच्यते । 'तत्' तेन प्रतिगरणेन दैवेन मानुषेण चाध्वर्युः 'एनं' राजानं 'पापात्' ऐहिकादपकीर्त्तिरूपात्, 'एनसः' नरकहेतोश्च 'प्रमुञ्चति' प्रमुक्तं करोति ॥

क्रत्वर्थत्वेनोपाख्यानं विधाय क्रतुनिरपेक्षपुरुषार्थत्वेन विधत्ते—“तस्माद्यो राजा विजिती स्यादप्ययजमान आख्यापयेतैवैतच्छौनःशेप माख्यानं ; न हास्मिन्नल्पञ्चनैनः परिशिष्यते”–इति * । यस्मादुपाख्यानं पापप्रशमनहेतुः, 'तस्माद्' 'अयजमानः अपि' राजसूयक्रतुरहितोऽपि राजा 'विजिती' यदि विजयोपेतः स्यात्, तदानी मेतच्छौनःशेप माख्यानम् 'आख्यापयेत्' तस्य राज्ञो यः कश्चिद् ब्राह्मण उपाख्यानं ब्रूयात् । तथा सति 'तस्मिन्' राजनि 'अल्पञ्चन' किञ्चिदपि 'एनः' पापं 'न ह वै परिशिष्यते' सर्वं पापं नश्यतीत्यर्थः ॥

आख्यानप्रयुक्तां दक्षिणां विधत्ते— “सहस्र माख्यात्रे दद्याच्छतं प्रतिगरित्र, एते चैवासने श्वेतश्चाश्वतरीरथो होतुः”–इति † । योऽय माख्याता होता, तस्मै क्रत्वर्थदक्षिणा मन्तरेण उपाख्यानप्रयुक्तां दक्षिणां गोसहस्ररूपां दद्यात् । 'प्रतिगरित्रे' अध्वर्यवे गोशतं दद्यात् । ये हिरण्यकशिपुरूपे द्वे 'आसने' स्तः, एते अपि ताभ्या मेव दद्यात् । अश्वतरीभ्यां सङ्कीर्णजातियुक्ताभ्यां अधिकाश्वाभ्यां युक्तो रथः 'अश्वतरीरथः', स च रजतेनालङ्कृतत्वात् श्वेतः, सोऽपि तादृशो होतुर्देयः ॥

पूर्वं मयज्ञसंयुक्तः कल्पो विजयिनो राज्ञो अभिहितः, इदानीं पुत्रकामाना मपि सर्वेषां विधत्ते— “पुत्रकामा आ-

---

* पाठ एष एवोद्धृतः आश्व॰ श्रौ॰ ९. ३. १२ ।

† “सहस्रमाख्यात्रे दद्याच्छतं प्रतिगरित्रे यथाख्यमासने”–इति आश्व॰ श्रौ॰ ९.३.१४–१५ ।

प्याख्यापयेरन् ; लभन्ते ह पुत्रान् , लभन्ते ह पुत्रान्"-इति । ये पुत्रकामाः सन्ति, ते 'ह' प्रसिद्ध मेतदुपाख्यानम् 'आख्यापयेरन्' ब्राह्मणमुखाच्छृणुयुरित्यर्थः । ते पुत्रान् लभन्ते । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ६ (१८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां तृतीयाध्याये
(त्रयस्त्रिंशाध्याये) षष्ठः खण्डः ॥ ६ (१८) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'-नामभाष्ये
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायाः तृतीयोऽध्यायः ॥

॥ अथ चतुर्थाध्यायः ॥

(३५)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ प्रजापतिर्यज्ञ मसृजत यज्ञं सृष्ट मनु ब्रह्मक्षत्रे असृज्येतां ब्रह्मक्षत्रे अनु द्वय्यः प्रजा असृज्यन्त हुतादश्चाहुतादश्च ब्रह्मैवानु हुतादः क्षत्र मन्वहुताद एता वै प्रजा हुतादो यद् ब्राह्मणा अथैता अहुतादो यद्राजन्यो वैश्यः शूद्रस्ताभ्यो यज्ञ उदक्रामत्तं ब्रह्मक्षत्रे अन्वैतां यान्येव ब्रह्मण आयुधानि तैर्ब्रह्मान्वैद् यानि क्षत्रस्य तैः क्षत्र मेतानि वै ब्रह्मण आयुधानि यद्यज्ञायुधान्यथैतानि क्षत्रस्यायुधानि यदश्वरथः कवच इषुधन्व तं क्षत्र मनन्वाप्य न्यवर्त्ततायुधेभ्यो ह स्मास्य विजमानः पराङेवैत्यथैनं ब्रह्मान्वैत्त माप्नोत्त माप्त्वा परस्तान्निरुध्यातिष्ठत् स आप्तः परस्तान्निरुद्धस्तिष्ठञ्ज्ञात्वा स्वान्यायुधानि ब्रह्मोपावर्त्तत तस्माद्धाप्येतर्हि यज्ञो ब्रह्मण्येव ब्राह्मणेषु प्रतिष्ठितोऽथैनत् क्षत्र मन्वागच्छत्तदब्रवीदुप माऽस्मिन् यज्ञे ह्वयस्वेति तत् तथेत्यब्रवीत् तद्वै निधाय स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा

यज्ञ मुपावर्त्तस्वेति॑ तथेति॑ तत्क्षत्रं निधाय स्वान्यायुधानि॑ ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण॑ ब्रह्म भूत्वा यज्ञ मुपावर्त्तत॑ तस्माद्धाप्येतर्हि॑ क्षत्रियो यजमानो॑ निधायैव स्वान्यायुधानि॑ ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण॑ ब्रह्म भूत्वा यज्ञ मुपावर्त्तते॑ ॥ १ (१९) ॥

॥ श्रीगणेशायनमः ॥

शौनःशेपप्रसङ्गेन याः क्रिया राजकर्त्तृकाः ।
तद्विशेषविधानार्थ मध्यायोऽत्र प्रवक्ष्यते ॥ १ ॥

अत्रादौ किञ्चिदुपाख्यान माह— "प्रजापतिर्यज्ञ मसृजत ; यज्ञं सृष्ट मनु ब्रह्मक्षत्रे असृज्येतां ; ब्रह्मक्षत्रे अनु द्वय्यः प्रजा असृज्यन्त, हुतादश्चाहुतादश्च ; ब्रह्मैवानु हुताद ; एता वै प्रजा हुतादो यद् ब्राह्मणा, अथैता अहुतादो यद्राजन्यो वैश्यः शूद्रः"–इति । पुरा प्रजापतिर्ज्योतिष्टोमाख्यं यज्ञं सृष्ट्वा तदनन्तरं ब्राह्मणक्षत्रियजातिद्वयम् ; तत ऊर्द्ध्वं हुतादश्चाहुतादश्चेत्युभयविधाः प्रजा असृज्यन्त । तत्र ब्राह्मणजाति मेवानु तद्व्यक्तिभूता हुतादः सृष्टाः , क्षत्रियजाति मनु तद्व्यक्तिसजातीया अहुतादः प्रजाः सृष्टाः । ये ब्राह्मणाः सन्ति , 'एताः' प्रजा आर्त्विज्यसद्भावाद्धुतशेष मदन्ति भक्षयन्तीति 'हुतादः' , ये राजन्य–वैश्य–शूद्राः 'एताः' प्रजाः आर्त्विज्याभावात् हुतशेषं न भक्षयन्तीति 'अहुतादः' । इत्थं यज्ञं चतुरो वर्णान् च प्रजापतिः सृष्टवान् ॥

अथ सृष्टस्य यज्ञस्य वृत्तान्त माह— "ताभ्यो यज्ञ उदक्रामत् , ब्रह्मक्षत्रे अन्वैतां ; यान्येव ब्रह्मण आयुधानि तैर्ब्रह्मान्वैद् , यानि क्षत्रस्य तं क्षत्रम् ; एतानि वै ब्रह्मण आयुधानि यज्ञा-

युधान्यथैतानि क्षत्रस्यायुधानि यदश्वरथः कवच इषुधन्व"-इति । स यज्ञः 'ताभ्यः' प्रजाभ्यो ऽपचक्राम उत्क्रम्य दूरं ऽगच्छत् । तं 'गच्छन्तं' यज्ञं ब्राह्मणजाति-क्षत्रियजाती द्वे 'अन्वैतां' पश्चाद् गच्छताम् । ब्राह्मणस्य योग्यानि यान्यायुधानि, तैः सह ब्राह्मणजातिर्यज्ञमन्वगच्छत् ; क्षत्रियस्य योग्यानि यान्यायुधानि, तैः सह क्षत्रियजातिर्यज्ञमन्वगच्छत् । यानि यज्ञायुधत्वेन शाखान्तरे श्रूयन्ते "स्फ्यश्च कपालानि चाग्निहोत्रहवणी च शूर्पञ्च कृष्णाजिनञ्च शम्या चोलूखलञ्च मुसलञ्च दृषच्चोपला चैतानि वै दश यज्ञायुधानि"-इति (तै० सं० १.६.८.२,३.), तान्येव ब्राह्मणजातेरुचितान्यायुधानि । योऽयमश्वयुक्तो रथो यश्च कवचः यदपि बाणयुक्तं धनुः, एतान्यपि क्षत्रियजातेरुचितान्यायुधानि ॥

यज्ञमनुगच्छन्त्योर्ब्राह्मणक्षत्रियजात्योर्मध्ये ब्राह्मणजातेर्यज्ञप्राप्तिं दर्शयति—"तं क्षत्रमनन्वाप्य न्यवर्त्ततायुधेभ्यो ह स्मास्य विजमानः पराङेवैत्यथैनं ब्रह्मान्वैत्, तमाप्नोत्, तमाप्त्वा परस्तान्निरुध्यातिष्ठत्, स आप्तः परस्तान्निरुद्धस्तिष्ठञ्ज्ञात्वा स्वान्यायुधानि ब्रह्मोपावर्त्तत ; तस्माद्धाप्येतर्हि यज्ञो ब्रह्मण्येव ब्राह्मणेषु प्रतिष्ठितः"-इति । 'क्षत्रं' क्षत्रियजातिः, 'तं' यज्ञम् 'अनन्वाप्य' अनुगमनेन अलब्ध्वा, तस्मादनुगमनात् न्यवर्त्तत । यज्ञस्तु क्षत्रियस्यायुधेभ्यो धनुरादिभ्यो 'विजमानः' भीतिं प्राप्नुवन् 'पराङेव' पुनरावृत्तिरहित एव 'एति स्म' पलाय्य दूरं गतः । 'अथ' अनन्तरम् 'एनं' यज्ञं 'ब्रह्म' ब्राह्मणजातिः 'अन्वैत्' अन्वगच्छत्, अनुगम्य च 'तं' यज्ञमाप्नोति स्म । आप्त्वा च 'तं' यज्ञमतिक्रम्य 'परस्तात्' परभागे 'निरुध्य' यज्ञगमनं प्रतिबध्यातिष्ठत् । अथ यज्ञ आप्तः, तथा ब्राह्मणजात्या प्राप्तः, 'परस्तात्' परभागे 'निरुद्धः'

गमनात् प्रतिबद्धः । तत्रैव तिष्ठन् ब्राह्मणस्य हस्ते स्फ्यकपालादीनि स्वकीयान्यायुधानि ज्ञात्वा ब्राह्मणजातिं प्रति 'उपावर्त्तत' समीप मागच्छत् । यस्मादेवं तस्मादिदानी मपि यज्ञो 'ब्राह्मणेष्वेव' आर्त्विज्ययोग्यायां ब्राह्मणजातावेव, तत्रापि प्रयोगकुशलेषु 'ब्राह्मणेषु' प्रतिष्ठितो वर्त्तते ॥

अथ क्षत्रियस्य यज्ञप्राप्तिं दर्शयति— "अथैनत् क्षत्र मन्वागच्छत्तदब्रवीदुप माऽस्मिन् यज्ञे ह्वयस्वेति ; तत् तथेत्यब्रवीत् ; तद्वै निधाय स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञ मुपावर्त्तस्वेति, तथेति; तत्क्षत्रं निधाय स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञ मुपावर्त्तत; तस्माद्धाप्येतर्हि क्षत्रियो यजमानो निधायैव स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञ मुपावर्त्तते"–इति *। 'अथ' ब्राह्मणस्य यज्ञप्राप्तेरनन्तरम्, 'एनत्' ब्रह्म ब्राह्मणजातिं 'क्षत्रं' क्षत्रियजातिम् 'अन्वागच्छत्'। आगत्य च 'तद्' ब्रह्म प्रत्येव मब्रवीत्। हे ब्राह्मण! मां क्षत्रिय मस्मिन् यज्ञे 'उपह्वयस्व' अनुजानीहि, मा माहूय यज्ञेन संयोजयेत्यर्थः । 'तत्' उक्तं कार्यं तथैवास्त्विति ब्राह्मणोऽब्रवीत् । उक्त्वा च क्षत्रियायैवं बुद्धिप्रदानं कृतवान्— हे क्षत्रिय ! 'तद्वै' तथा सति तव यज्ञप्राप्तौ अपेक्षायां सत्यां स्वकीयानि धनुरादीनि 'आयुधानि' क्वचित् स्थापनीयानि ; तान्यवस्थाप्य ब्राह्मणस्यैव योग्यैः स्फ्यकपालाद्यायुधैर्ब्राह्मणस्य योगेन शान्तिश्रद्धालुत्वयुक्तेन 'रूपेण' वेषेण च युक्तो 'ब्रह्म भूत्वा' ब्राह्मणसदृशो भूत्वा यज्ञं प्रत्युपावर्त्तस्वेति । 'तत् क्षत्रम्' स च क्षत्रियः 'तथेति' अङ्गीकृत्य स्वकीयानि धनुरादीन्यायुधानि 'निधाय'

---

* अतएवैव माम्नातम्— "स एष यज्ञायुधी यजमानः"–इति शत०ब्रा० १२,५,२,८ ।

परित्यज्य, शान्तवेषेण यज्ञं प्राप्तवान्। यस्मादादिसृष्टौ एवं सम्पन्नं, तस्मादिदानी मपि क्षत्रियो ब्राह्मणवेषेण धनुरादिरहितेन यज्ञ मनुतिष्ठति ॥ १ (१९) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) प्रथमः खण्डः ॥ १ (१९) ॥

॥ अथ द्वितीयः खण्डः ॥

अथातो देवयजनस्यैव याच्ञा-*-स्तदाहुर्यद् ब्राह्मणो राजन्यो वैश्यो दीक्षिष्यमाणः क्षत्रियं देवयजनं याचति कं क्षत्रियो याचेदिति दैवं क्षत्रं याचेदित्याहुरादित्यो वै दैवं क्षत्र मादित्य एषां भूताना मधिपतिः स यदहर्दीक्षिष्यमाणो भवति तदहः पूर्वाह्ण एवोद्यन्त मादित्य मुपतिष्ठेतेदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं देव सवितर्देवयजनं मे देहि देवयज्याया इति देवयजनं याचति स यत् तत्र याचित उत्तरां सर्पत्यों तथा ददामीति हैव तदाह तस्य ह न काचन रिष्टि†र्भवति देवेन सवित्रा प्रसूतस्योत्तरोत्तरिणीं ह श्रिय मश्नुतेऽश्नुते ह प्रजाना मैश्वर्यं

---

* "या ञ्च" क, ङ, "याच्ञ" च। † "ऋष्टि" ङ।

माधिपत्यं॑ य एव मुपस्थाय॑ याचित्वा देवयजन मध्यवसाय॑ दी॑क्षते क्षत्रियः सन्॑ ॥ २ (२०) ॥

क्षत्रियस्य यज्ञप्राप्ति मुक्त्वा देवयजनलाभं वक्तुं प्रश्न मुद्भावयति—"अथातो देवयजनस्यैव याच्ञायास्तदाहुर्यद् ब्राह्मणो राजन्यो वैश्यो दीक्षिष्यमाणः क्षत्रियं देवयजनं याचति ; कं क्षत्रियो याचेदिति"–इति । 'अथ' क्षत्रियस्य यज्ञेच्छानन्तरम्, यतो देवयजन मपेक्षितम्, 'अतः' कारणाद् 'देवयजनस्यैव' देवा इज्यन्ते यस्मिन् देशे स देवयजनस्तस्यैव 'याच्ञायाः' * याचन मभिधीयत इति शेषः । 'तत्' तत्र देवयजने ब्रह्मवादिनः प्रश्न माहुः । 'यद्' यस्मात् कारणाद् ब्राह्मणादयस्त्रयो वर्णाः 'क्षत्रियम्' अभिषिक्तं राजानं प्रति देवयजनं याचति ; तस्माद्राज्ञोऽपि देवयजनो याचितव्यः । 'क्षत्रियः' राजा 'कम्' अन्यं स्वामिनं याचेदिति प्रश्नः ॥

तस्योत्तर माह—"दैवं क्षत्रं याचेदित्याहुरादित्यो वै दैवं क्षत्र मादित्य एषां भूताना मधिपतिः"–इति । राज्ञो मनुष्येषु मध्ये स्वाम्यन्तराभावे ऽपि देवसम्बन्धिक्षत्रियजातेः स्वामित्वात् तत्रैव याचन मुचित मित्युत्तर माहुः । योऽय मादित्योऽस्ति, असावेव 'दैवं' देवसम्बन्धि 'क्षत्रं' क्षत्रियजातिः । अय मादित्य एषां प्राणिनां तमोनिवारणेनाधिष्ठाता पालयिता ; ततः स्वामित्वात् तत्समीपे याचन मुचितम् ॥

तस्य प्रकारं दर्शयति— "स यदहर्दीक्षिष्यमाणो भवति, तदहः पूर्वाह्ण एवोद्यन्त मादित्य मुपतिष्ठेतेदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमम्, देव सवितर्देवयजनं मे देहि देवयज्याया इति

---

* "याच्ञाय जायते"–इति अथ॰सं॰ १२.४.१०। "याच्ञा" शत॰ब्रा॰ ९, १. ४. ४।

देवयजनं याचति"-इति । 'सः' राजा यस्मिन्नेवाहनि दीक्षितु मुद्युक्तः, तस्याह्नः पूर्वाह्णकाले एव 'उद्यन्तम्' ऊर्ध्वं गच्छन्त मादित्य मृग्यजुर्भ्या मुपतिष्ठेत् । "इदं श्रेष्ठम्"-इत्यृचः प्रतीकम्, "देव सवितः"-इत्यादिकं यजुषः । हे देव सवितः ! 'देवयज्यायै' देवसम्बन्धियागार्थं 'मे' मह्यं 'देवयजनं' देवोचितयागदेशं देहि, 'इति' अनेन प्रकारेण देवं याचेत् । ऋचोपस्थानं, यजुषा याचन मिति व्यवस्थया द्रष्टव्यम् ॥

राज्ञा याचितस्यादित्यस्य प्रत्युत्तरं सम्पादयति— "स यत् तत्र याचित उत्तरां सर्पत्यों तथा ददामीति हैव तदाह"-इति । आदित्यो 'यद्' यदि 'तत्र' तदानीं मनेन राज्ञा याचितः सन् 'उत्तरां' यत्र स्वयं तिष्ठति तस्मादनन्तरभाविनीं दिशं प्रति 'सर्पति' गच्छेत्, तदानीं 'तत्' तेन सर्पणेन 'ॐ तथा ददामि' इत्येव मुत्तरम् 'आह' ब्रूते । लोकेऽपि पृष्टः पुरुषो वाचा वा हस्तशिरश्चालनादिना वोत्तरं प्रयच्छति, तद्वदत्रापि सर्पण मेवोत्तर मस्तु । सर्पणस्याभिप्रायः ॐ तथा ददामीत्यनेन कथितः । 'ॐ' त्वदुक्त मङ्गीकरोमि, 'तथा' तेनैव प्रकारेण देवयजनं ददामि ॥

ता मेतां देवयजनयाच्ञां प्रशंसति— "तस्य ह न काचन रिष्टिर्भवति, देवेन सवित्रा प्रसूतस्योत्तरोत्तरिणीं ह श्रिय मश्नुते; ऽश्नुते ह प्रजाना मैश्वर्यं माधिपत्यं य एव मुपस्थाय याचित्वा देवयजन मध्यवसाय दीक्षते क्षत्रियः सन्"-इति । 'यः' पुमान् 'क्षत्रियः' स्वयं राजा सन्, 'एवम्' ऋचादित्य मुपस्थाय, यजुषा याचित्वा, ततो देवयजनं निश्चित्य, 'दीक्षते' दीक्षां प्राप्नोति ; 'तस्य' राज्ञः सवित्रा देवेन 'प्रसूतस्य' अनुज्ञातस्य 'रिष्टिः' हिंसा 'काचन' काचिदपि न भवति । न केवलं हिंसाराहित्यं, किन्तु 'उत्तरो-

त्तरिणीं' दिने दिने वर्द्धमानां श्रियम् 'अश्नुते' प्राप्नोति ; किञ्च 'प्रजानां' सर्वासाम् 'ऐश्वर्यम्' ईश्वरत्वं नियमनसामर्थ्यम्, 'आधिपत्यम्' अधिष्ठाय पालयितृत्वम् , तत्तद्योगक्षेमसम्पादनम् 'अश्नुते' प्राप्नोति ॥ २ (२०) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) द्वितीयः खण्डः ॥ २ (२०) ॥

॥ अथ तृतीयः खण्डः ॥

अथात इष्टापूर्त्तस्यापरिज्यानिः क्षत्रियस्य यजमानस्य स पुरस्ताद् दीक्षाया आहुतिं जुहुयाच्चतुर्गृहीत माज्य माहवनीय इष्टापूर्त्तस्यापरिज्यान्यै पुनर्न इन्द्रो मघवा ददातु ब्रह्म पुनरिष्टं पूर्त्तं दात् स्वाहेत्यथानुबन्ध्यायै समिष्टयजुषा मुपरिष्टात् पुनर्नो अग्निर्जातवेदा ददातु क्षत्रं पुनरिष्टं पूर्त्तं दात्स्वाहेति सैषेष्टापूर्त्तस्यापरिज्यानिः क्षत्रियस्य यजमानस्य यदेते आहुती तस्मादेते होतव्ये ॥ ३ (२१) ॥

तस्यैव क्षत्रियस्य होमं विधत्ते— "अथात इष्टापूर्त्तस्यापरिज्यानिः क्षत्रियस्य यजमानस्य ; स पुरस्ताद् दीक्षाया आहुतिं जुहुयाच्चतुर्गृहीत माज्य माहवनीय इष्टापूर्त्तस्यापरिज्यान्यै"—

इति । 'अथ' देवयजननिश्चयानन्तरम्, यस्मादनुष्ठेयस्य इष्टापूर्त्तस्य 'अपरिज्यानिः' विनाशाभावोऽपेक्षितः, 'अतः' कारणात् यजमानस्य 'क्षत्रियस्य' राज्ञः इष्टापूर्त्तापरिज्यानिसञ्ज्ञको होमः, अभिधीयते इति शेषः । इष्टापूर्त्तशब्दार्थः पूर्वाचार्यैर्दर्शितः—

"वर्णाश्रमान्वयी धर्म इष्टम्, पूर्त्त मथेतरत् ।
प्रपा-तटाकादिरूपं तच्च सर्वत्र दृश्यते ।
स्मार्त्तं पूर्त्तं श्रौत मिष्ट मिति केचिदिहोचिरे"-इति ।

'सः' राजा दीक्षायाः पूर्वं माहुतिं जुहुयात् । 'चतुर्गृहीत माज्यं' द्रव्यम्; 'आहवनीयः' होमस्थानम्; अनुष्ठेयस्येष्टापूर्त्तस्य फलपर्यवसायित्वलक्षणो विनाशाभावः प्रयोजनम् ॥

होमे मन्त्रं दर्शयति— "पुनर्न इन्द्रो मघवा ददातु, ब्रह्म पुनरिष्टं पूर्त्तं दात् स्वाहेति"-इति । "पुनर्नः"-इत्यादिक मृचः प्रतीकम्, "ब्रह्म"-इत्यादिकं यजुः । 'ब्रह्म' वेदरूपो मन्त्रः, 'इष्टं पूर्त्तं' यथोक्तलक्षणे 'पुनर्दात्' भूयो ददातु । तदर्थ मिदं 'स्वाहा' स्वाहुत मस्तु ॥

दीक्षणीयेष्टेः पूर्वकालीनं होमं विधायानुबन्ध्याख्यपशोरुत्तरकालीनं होमं विधत्ते— "अथानूबन्ध्यायै समिष्टयजुषा मुपरिष्टात् पुनर्नो अग्निर्जातवेदा ददातु क्षत्रं पुनरिष्टं पूर्त्तं दात् स्वाहेति"-इति । 'अथ' प्राचीनहोमकथनानन्तरम्, उच्यत इति शेषः । 'अनूबन्ध्यायै' अनुबन्ध्याख्यपशोः सम्बन्धीनि यानि त्रीणि समिष्टयजूंषि सन्ति, तेषा मुपरिष्टात् जुहुयादिति शेषः * ।

---

* "१भा० ८७पृ० १७पं०, ३९५पृ० २०पं०, २भा० २३९ पृ० द्र० । "संस्थितायां मैत्रावरुण्यनूबन्ध्या"-इति आश्व० श्रौ० ६.१४.७ । "अथ प्रातः ०—० "मैत्रावरुणीं वशा मनूबन्ध्या मालभते"-इति शत० ब्रा० २.४.४.१४ ।

'पुनर्नः'—इत्यृचः प्रतीकम्; इयं, पूर्वोक्ता चेत्यृग्द्वयं शाखान्तरगतम्। 'क्षत्रं' क्षत्रियजातिविशिष्टं पूर्त्तं च 'पुनर्ददात्' भूयो ददातु। तदर्थं स्वाहुत मिद मस्तु ॥

पूर्वोत्तरकालीन माहुतिद्वयं प्रशंसयति— "सैषेष्टापूर्त्तस्यापरिज्यानिः क्षत्रियस्य यजमानस्य, यदेते आहुती; तस्मादेते होतव्ये"—इति। योऽयं क्षत्रियो राजा यजमानः, तस्य 'एते' पूर्वोत्तरकालीने आहुती विद्येते; 'सा एषा' आहुतिक्रिया इष्टस्य पूर्तस्य च 'अपरिज्यानिः' अविनाशहेतुः; तस्मात् कारणात् 'एते' उभे आहुती होतव्ये ॥ ३ (२१) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (२१) ॥

॥ अथ चतुर्थः खण्डः ॥

तदु ह स्माह सौजात आराळ्हिर॑जीतपुनर्व॑ण्यं वा एत॑द्यदेते आहुती इति॑ यथा ह कामये॑त तथैते कुर्या॑द्य इष्टो ऽनुशासनं कुर्या॑दितीमे त्वेव जुहु॑याद्ब्रह्म प्रपद्ये ब्रह्म मा क्षत्राद्गोपायतु ॑ब्रह्मणे स्वाहे॑ति तत्तदितीँ३॑* ब्रह्म वा एष प्रपद्य॑ते यो यज्ञं

---

* "तत्तदितीं१" ख, ग, घ ।

प्रपद्यते॑ ब्रह्म वै यज्ञो यज्ञादु ह वा॑ एष पुनर्जायते यो दीक्षते॑ तं ब्रह्म प्रपन्नं क्षत्रं न परिजिनाति॑ ब्रह्म मा क्षत्राद्गोपायत्वित्याह॑ यथैनं ब्रह्म क्षत्राद्गोपाये॑द् ब्रह्मणे स्वाहेति॑ तदेनत्प्रीणाति॑ तदेनत्प्रीतं॑ क्षत्राद्गोपायत्य॑थानूबन्ध्यायै॑ समिष्टयजुषा मुपरिष्टात्॑ क्षत्रं प्रपद्ये क्षत्रं मा ब्रह्मणो गोपायतु॑ क्षत्राय स्वाहेति॑ तत्तदि॑तीँ३* क्षत्रं वा एष प्रपद्यते॑ यो राष्ट्रं प्रपद्यते॑ क्षत्रं हि राष्ट्रं॑ तं क्षत्रं प्रपन्नं ब्रह्म न परिजिनाति॑ क्षत्रं मा ब्रह्मणो गोपायत्वित्याह॑ यथैनं क्षत्रं ब्रह्मणो गोपायेत्॑ क्षत्राय स्वाहेति॑ तदेनत्प्रीणाति॑ तदेनत्प्रीतं॑ ब्रह्मणो गोपायति॑ सैषेष्टापूर्त्तस्यैवापरिज्यानिः॑ क्षत्रियस्य यजमानस्य॑ यदेते आहुती॑ तस्मादेते एव होतव्ये॑ ॥ ४ (२२) ॥

अथ प्रकारान्तरेणाहुतिद्वयं विधत्ते — "तदु ह स्माह सौजात आराळ्हिरजीतपुनर्वण्यं वा एतद् यदेते आहुती इति ; यथा ह कामयेत तथैते कुर्याद् , य इतो ऽनुशासनं कुर्यादितीमे त्वेव जुहुयाद्"–इति । 'तदु ह' तत्रैव पूर्वोक्तहोमस्थाने, सौजातनामकः कश्चिदृषिः , स आराळ्हनामकस्य पुत्रः , एव मुवाच । कथ मिति तदुच्यते — 'एते' वक्ष्यमाणे आहुती 'इति' यदस्ति , तदेतद् 'अजीतपुनर्वण्यं वै' नष्ट मप्राप्तं वा यद्वस्तु तदेतदजीतं ,

---

* "तत्तदितीम्३" ख ।

तस्य पुनरपि वनसाधनं प्राप्तिकारण मजीतपुनर्वण्यम्, वक्ष्यमाण माहुतिद्वय मेतन्नामक मित्यर्थः । 'इति' यदेतत्सौजातस्य मतं, तदेव यथेत्यादिना प्रशस्यते । 'यः' पुमान् 'इतः' सौजातवाक्याद् 'अनुशासनम्' उपदिष्ट मनुष्ठानं कुर्यात्, स पुमान् 'यथा' येनैव प्रकारेण कामयेत, 'तथा' तेनैव प्रकारेण सिद्धं फल मुद्दिश्य 'एते कुर्यात्' एतदनुष्ठानेन काम्यमानं फलं सिध्यति; तस्मात् कारणात् 'इमे' एवाहुती जुहुयात्; न तु पूर्वे ॥

तत्र दीक्षणीयेष्टेः प्राचीनं होममन्त्रं दर्शयति— "ब्रह्म प्रपद्ये, ब्रह्म मा क्षत्राद् गोपायतु, ब्रह्मणे स्वाहेति"–इति । 'ब्रह्म' ब्राह्मणजातिं 'प्रपद्ये' रक्षकतया प्राप्नोमि । 'ब्रह्म मा' ब्राह्मणजातिर्मां 'क्षत्रात्' क्षत्रियजातेः 'गोपायतु' पालयतु । 'ब्रह्मणे' ब्राह्मणजातये स्वाहुत मिद मस्तु । अनेन मन्त्रेण आहवनीये चतुर्गृहीत माज्यं जुहुयात् ॥

अस्याहुतेः पूज्यतां दर्शयति— "तत्तदितीँ३"–इति । सर्वेऽपि याज्ञिकाः, पूज्यहोमप्रसङ्गे तदा तदा 'तत्तत् इति' एवम् एतदेव अनुष्ठान मुदाहरन्ति । पूजार्था सानुनासिकप्लुतिः ॥

अथ मन्त्रतात्पर्यं दर्शयति— "ब्रह्म वा एष प्रपद्यते, यो यज्ञं प्रपद्यते; ब्रह्म वै यज्ञो, यज्ञादु ह वा एष पुनर्जायते, यो दीक्षते; तं ब्रह्म प्रपन्नं क्षत्रं न परिजिनाति; ब्रह्म मा क्षत्राद्गोपायत्वित्याह, यथैनं ब्रह्म क्षत्राद्गोपायेद्; ब्रह्मणे स्वाहेति तदेनत्प्रीणाति, तदेनत् प्रीतं क्षत्राद्गोपायति"–इति । 'यः' पुमान् 'यज्ञं' 'प्रपद्यते' प्रारभते, एष पुमान् 'ब्रह्म वै' ब्राह्मणजाति मेव प्रारभते । 'ब्रह्म वै' ब्राह्मणजातिरेव यज्ञः; तया जात्या साध्यत्वात् । एवं सति 'यः' पुमान् 'दीक्षते' दीक्षां प्राप्नोति, 'एषः' पुमान् पूर्वं जातोऽपि

‘यस्माद् ह वै’ अनुष्ठीयमानात् यस्मादेव पुनरपि जायते । ‘ब्रह्म प्रपन्नं’ यस्योपक्रमेण यज्ञरूपब्राह्मणजातिं प्रपन्नं ‘तं’ यजमानं ‘क्षत्रं’ क्षत्रियजातिः ‘न परिजिनाति’ नैव छिनत्ति । एतावता “ब्रह्म प्रपद्ये”-इत्यस्य मन्त्रपादस्य तात्पर्यं दर्शितम् । यस्तु मध्यमो मन्त्रभागो “ब्रह्म मा क्षत्राद् गोपायतु”-इत्येवं ब्रूते, तस्मिन् भागे ब्राह्मणजातिः ‘एनं’ यजमानं क्षत्रियजातेर्यथा ‘गोपायेत्’ रक्षेत्, तथा स मध्यमभागो ब्रूते । “ब्रह्मणे स्वाहा”-इत्येतादृशो यस्तृतीयभागः, ‘तत्’ तेन भागेन ‘ब्रह्म’ ब्राह्मणजातिः ‘प्रीणाति’ तर्पयति । ‘तदेनद्’ ब्रह्म प्रीतं सत् यजमानं क्षत्रियजातेः ‘गोपायति’ रक्षति ॥

पूर्वकालीनं होमं विधायोत्तरकालीनं होमं विधत्ते— “अथानूबन्ध्यायै समिष्टयजुषा मुपरिष्टात्”-इति । पूर्ववद् व्याख्येयम् (१११पृ०) ॥

तस्मिन् होमे मन्त्रं तदीयतात्पर्यञ्च दर्शयति— “क्षत्रं प्रपद्ये, क्षत्रं मा ब्रह्मणो गोपायतु, क्षत्राय स्वाहेति; तत्तदितीँ २; क्षत्रं वा एष प्रपद्यते, यो राष्ट्रं प्रपद्यते ; क्षत्रं हि राष्ट्रं , तं क्षत्रं प्रपन्नं ब्रह्म न परिजिनाति ; क्षत्रं मा ब्रह्मणो गोपायत्वित्याह, यथैनं क्षत्रं ब्रह्मणो गोपायेत् ; क्षत्राय स्वाहेति तदेनत्प्रीणाति ; तदेनत्प्रीतं ब्रह्मणो गोपायति”-इति । पालनीयो देशो ‘राष्ट्रं’ तच्च क्षत्रियेण पालनीयत्वात् क्षत्रस्वरूपम् । अन्यत्सर्वं ब्रह्मवाक्यवद् व्याख्येयम् (११४पृ०) ॥

तदेतदाहुतिद्वयं प्रशंसति — “सैषेष्टापूर्त्तस्यैवापरिज्यानिः, क्षत्रियस्य यजमानस्य यदेते आहुती ; तस्मादेते एव होतव्ये”-इति । पूर्वोक्ताहुतिद्वयविषयवाक्यवद् (११२पृ०) व्याख्येयम् ।

एवकारः पूर्वोक्ताहुतिद्वयव्यावृत्त्यर्थः । एतदेव सौजाताख्यस्य महर्षेर्मतं प्रशस्तम् ॥ ४ (२२) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) चतुर्थः खण्डः ॥ ४ (२२) ॥

॥ अथ पञ्चमः खण्डः ॥

अथैन्द्रो वै देवतया क्षत्रियो भवति' त्रैष्टुभश्छन्दसा' पञ्चदश स्तोमेन' सोमो राज्येन' राजन्यो बन्धुना' स ह दीक्षमाण एव' ब्राह्मणता मभ्युपैति' यत्कृष्णाजिन मध्यूहति' यद्दीक्षितव्रतं चरति' यदेनं ब्राह्मणा अभि सङ्गच्छन्ते' तस्य ह दीक्षमाणस्येन्द्र एवेन्द्रिय मादत्ते' त्रिष्टुब् वीर्यं' पञ्चदशस्तोम आयुः' सोमो राज्यं' पितरो यशस्कीर्ति' मन्यो वा अय मस्मद्भवति' ब्रह्म वा अयं भवति' ब्रह्म वा अय मुपावर्त्तत इति वदन्तः' स पुरस्ताद्दीक्षाया आहुतिं हुत्वा' ऽऽहवनीय मुपतिष्ठेत' नेन्द्राद्देवताया एमि' न त्रिष्टुभश्छन्दसो' न पञ्चदशात्स्तोमान्न सोमाद्राज्ञो' न पित्र्याद् बन्धोर्मा' म इन्द्र इन्द्रिय मादित' मा त्रिष्टुब् वीर्यं' मा पञ्चदशस्तोम आयुर्मा

सोमो राज्यं मा पितरो यशस्कीर्तिं स हेन्द्रियेण वीर्येणायुषा राज्येन यशसा बन्धुनाग्निं देवता मुपैमि गायत्रीच्छन्दस्त्रिवृतं स्तोमं सोमं राजानं ब्रह्म प्रपद्ये ब्राह्मणो भवामीति तस्य ह नेन्द्र इन्द्रिय मादत्ते न त्रिष्टुब् वीर्यं न पञ्चदशस्तोम आयुर्न सोमो राज्यं न पितरो यशस्कीर्तिं य एव मेता माहुतिं हुत्वाऽऽहवनीय मुपस्थाय दीक्षते क्षत्रियः सन् ॥ ५ (२३) ॥

क्षत्रियस्याहवनीयोपस्थानं विधातुं प्रस्तौति — "अथैन्द्रो वै देवतया क्षत्रियो भवति, त्रैष्टुभश्छन्दसा, पञ्चदश स्तोमेन, सोम्यो राज्येन, राजन्यो बन्धुना ; स ह दीक्षमाण एव ब्राह्मणता मभ्युपैति,— यत् कृष्णाजिन मध्यूहति, यद् दीक्षितव्रतं चरति, यदेनं ब्राह्मणा अभि सङ्गच्छन्ते ; तस्य ह दीक्षमाणस्येन्द्र एवेन्द्रिय मादत्ते, त्रिष्टुब् वीर्यं, पञ्चदशस्तोम आयुः, मोमो राज्यं, पितरो यशस्कीर्तिं, अन्यो वा अय मस्माद्भवति, ब्रह्म वा अयं भवति, ब्रह्म वा अय मुपावर्त्तत इति वदन्तः"—इति । 'अथ' होमकथनानन्तरम्, उपस्थान मुच्यत इति शेषः । योऽयं क्षत्रियोऽस्ति, सोऽयं देवतया 'ऐन्द्रो वै' इन्द्रसम्बन्धी एव भवति ; देवतानां मध्ये इन्द्रः क्षत्रियस्याभिमानी देवतेत्यर्थः । तथा 'छन्दसा त्रैष्टुभः' छन्दसां मध्ये त्रिष्टुप् एतदभिमानिनी । स्तोमानां मध्ये 'पञ्चदशः' एतदभिमानी । राज्येन निमित्तेनायं सोमरूपः, सोम एव तदीयराज्याभिमानी । 'बन्धुना' पितृपितामहादिबन्धुवर्गेण

‘राजन्यो’ राजजातीयः । एवं सति ‘स ह’ स खलु क्षत्रियो ‘दीक्षमाण एव’ दीक्षां स्वीकुर्वन्नेव ब्राह्मणत्वजातिं प्राप्नोति । कथ मिति तदुच्यते— ब्राह्मणयजमानवत् कृष्णाजिनम् ‘अध्यूहति’ आच्छादयतीति यदस्ति, तथा ‘दीक्षितव्रतं’ मुष्टिबन्धनवाङ्नियमादिकं चरतीति यदस्ति, तथा ‘ब्राह्मणाः’ ऋत्विजो भूत्वा ‘एनं’ क्षत्रिय मभितः ‘सङ्गच्छन्ते’ सङ्गता भवन्तीति यदस्ति, तेन सर्वेण संस्कारेणायं क्षत्रियो ब्राह्मण्यं प्राप्नोति । ‘तस्य ह’ तादृशस्यैव क्षत्रियस्य ‘दीक्षमाणस्य’ दीक्षां प्राप्नुवतः ‘इन्द्रियं’ चक्षुरादिपाटवं इन्द्र एव ‘आदत्ते’ अपहरति, तथा ‘वीर्यं’ युद्धादिसामर्थ्यं त्रिष्टुप् अपहरति, पञ्चदशस्तोम आयुरपहरति, सोमो राज्य मपहरति । पितरो यशः कीर्त्तिं मपहरन्ति । ऐहिकं युद्धादिविषयकं यशः, आमुष्मिकी यज्ञदानविषया कीर्त्तिः । एव मपहरता मिन्द्रत्रिष्टुबादीनां कोऽभिप्रायः ? सोऽभिधीयते— ‘अयं’ क्षत्रियः ‘अस्मत्’ इन्द्रादिभ्यः ‘अन्यो वै’ स्वतन्त्र एव भवति । पूर्व मस्मदधीनः सन्, इदानीं यागं कुर्वन् ‘ब्रह्म वै’ ब्राह्मण एव अयं भवति । कथ मिति तदुच्यते— ‘अयं’ क्षत्रियो ‘ब्रह्म वै’ ब्राह्मणजाति मेव कृष्णाजिनाच्छादनादिभिरुपेत्य वर्त्तते ; तथा सत्यस्मदपेक्षा मन्तरेणैव सर्वपुरुषार्थसाधनसमर्थत्वात्, अस्मदधीनतां परित्यज्यान्य एव स्वतन्त्रो भवतीति स्वाभिप्रायं परस्परं वदन्तः सर्वं मप्येतदीय मपहरन्ति ॥

तस्योपद्रवस्य शान्त्यर्थ मुपस्थानं विधत्ते— “स पुरस्ताद् दीक्षाया आहुतिं हुत्वाऽऽहवनीय मुपतिष्ठेत”—इति । दीक्षणीयेष्टेः पूर्वोक्ता माहुतिं हुत्वा, तत आहवनीयं वक्ष्यमाणेन मन्त्रेणोपतिष्ठेत् ॥

तं मन्त्रं दर्शयति—“नेन्द्राद् देवताया एमि, न त्रिष्टुभश्छन्दसो, न पञ्चदशात् स्तोमान्न सोमाद्राज्ञो, न पित्र्याद् बन्धोर्मा म इन्द्र इन्द्रिय मादित, मा त्रिष्टुब् वीर्यं, मा पञ्चदशस्तोम आयुर्, मा सोमो राज्यं, मा पितरो यशस्कीर्त्तिं ; स हेन्द्रियेण वीर्येणायुषा राज्येन यशसा बन्धुनाग्निं देवता मुपैमि ; गायत्रीच्छन्दस्त्रिवृतं स्तोमं सोमं राजानं ब्रह्म प्रपद्ये, ब्राह्मणो भवामीति”—इति । क्षत्रियोऽहं इन्द्ररूपायाः मदीयदेवतायाः ‘नैमि’ पृथग्भूतो न गच्छामि, तथा मय्यभिमानिभ्यः छन्दस्तोमराजबन्धुभ्यो नापगच्छामि ; अय मिन्द्रो मदीय मिन्द्रियम् ‘मा आदित’ मा अपहरतु, तथा त्रिष्टुबादयो वीर्यादीन् मापहरन्तु ; तेषा मिन्द्रादीना मनुग्रहादह मिन्द्रियादिभिः सहावस्थितो भूत्वा तत्पालनसमर्थ मग्निं देवता मुपैति ; तथा गायत्री-त्रिवृत्स्तोम-ब्राह्मणजातीः ‘प्रपद्ये’ प्राप्नोमि ; तेषा मग्न्यादीना मनुग्रहात् ब्राह्मणो भवामि ॥

अनेन मन्त्रेण यदुपस्थानं, तत् प्रशंसति— “तस्य ह नेन्द्र इन्द्रिय मादत्ते, न त्रिष्टुब् वीर्यं, न पञ्चदशस्तोम आयुर्, न सोमो राज्यं, न पितरो यशस्कीर्तिं, य एव मेता माहुतिं हुत्वाऽऽहवनीय मुपस्थाय दीक्षते क्षत्रियः सन्”—इति । ‘यः’ पुमान् क्षत्रियजातियुक्तः सन् उक्तक्रमेण दीक्षायाः प्राचीना माहुतिं हुत्वा, “नेन्द्रात्”—इत्यादिमन्त्रेण आहवनीय मुपस्थाय, पश्चाद् दीक्षां प्राप्नोति, ‘तस्य’ क्षत्रियस्येन्द्रियादीनिन्द्रादयो नापहरन्ति ॥ ५ (२३) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) पञ्चमः खण्डः ॥ ५ (२३) ॥

॥ अथ षष्ठः खण्डः ॥

अथाग्नेयो वै देवतया॑ क्षत्रियो दीक्षितो भवति॑ गायत्रश्छन्दसा॑ त्रिवृत् स्तोमेन॑ ब्राह्मणो बन्धुना॑ स हैतद्भवन्नेव॑ क्षत्रियता मभ्युपैति॑ तस्य हैतद्भवतो॑ ऽग्निरेव तेज आदत्ते॑ गायत्री वीर्यं॑ त्रिवृत्स्तोम आयुर्ब्राह्मणा ब्रह्म यशस्कीर्ति॑ मन्यो वा अय मस्मद्भवति॑ क्षत्रं वा अयं भवति॑ क्षत्रं वा अय मुपावर्त्तत इति वदन्तः॑ सो ऽनूबन्ध्यायै॑ समिष्टयजुषा मुपरिष्टाद्धुत्वाहुति माहवनीय मुपतिष्ठेत॑ नाग्नेर्देवताया एमि॑ न गायत्र्याश्छन्दसो॑ न त्रिवृतः स्तोमान्न ब्रह्मणो बन्धो॑र्मा मे ऽग्निस्तेज आदित॑ मा गायत्री वीर्यं॑ मा त्रिवृत्स्तोम आयुर्मा॑ ब्राह्मणा यशस्कीर्तिं॑ स ह तेजसा वीर्येणायुषा॑ ब्रह्मणा यशसा॑ कीर्त्येन्द्रं देवता मुपैमि॑ त्रिष्टुभं छन्दः पञ्चदशं स्तोमं॑ सोमं राजानं॑ क्षत्रं प्रपद्ये क्षत्रियो भवामि॑ देवाः पितरः पितरो देवा॑ यो ऽस्मि स सन्यजे॑ स्वं म इद मिष्टं॑ स्वं पूर्त्तं स्वं श्रान्तं॑ स्वं हुतं॑ तस्य मे य मग्निरुपद्रष्टाय॑ वायुरुपश्रोता॑ ऽसावादित्यो ऽनुख्यातेदं मह॑ य एवास्मि सो ऽस्मीति॑ तस्य ह नाग्निस्तेज आदत्ते॑ न गायत्री वीर्यं॑ न त्रिवृत्स्तोम आयुर्न॑ ब्राह्मणा ब्रह्म यशस्कीर्त्तिं॑

य एव मेता माहुतिं हुत्वा ऽऽहवनीय मुपस्थायोदवस्यति क्षत्रियः सन् ॥ ६ (२४) ॥

पूर्वहोमानन्तर मुपस्थानं विधायोत्तरहोमादूर्द्ध मुपस्थानं विधातुं प्रस्तौति — "अथाग्नेयो वै देवतया क्षत्रियो दीक्षितो भवति, गायत्रश्छन्दसा, त्रिवृत् स्तोमेन ब्राह्मणो बन्धुना, स होदवस्यन्नेव क्षत्रियता मभ्युपैति ; तस्य होदवस्यतो ऽग्निरेव तेज आदत्ते, गायत्री वीर्यं, त्रिवृत्स्तोम आयुर्, ब्राह्मणा ब्रह्म यशस्कीर्त्तिम् ; अन्यो वा अय मस्मद्भवति, क्षत्रं वा अय मुपावर्त्तत इति वदन्तः"-इति । 'अथ' पूर्वोपस्थानानन्तरम्, उत्तरोपस्थानं वक्ष्यत इति शेषः । अयं यजमानः पुरा क्षत्रियोऽपि इदानीं दीक्षितः सन् ब्राह्मण्यं प्राप्य देवतया अग्निसम्बन्धी भवति, अग्निरस्य ब्राह्मणस्य स्वामी । एवं गायत्री-त्रिवृद्-ब्राह्मणजाति-सम्बन्धो द्रष्टव्यः । तादृश इदानीं ब्राह्मणः सन् 'उदवस्यन्नेव' उदवसानीयेष्ट्या सोमयागं समापयन् एव * ब्राह्मण्यं परित्यज्य क्षत्रियत्वं प्राप्नोति । तस्माद् उदवसानीयेष्टिं कुर्वतोऽस्य यजमानस्य तेजःप्रभृतीनग्न्यादयो ऽपहरन्ति । 'ब्रह्म' वेदः, तदध्ययन मैहिकं 'यशः', तदनुष्ठाननिमित्ता आमुष्मिकी 'कीर्त्तिः' । अपहरता मग्न्यादीनां कोऽभिप्रायः ? सोऽभिधीयते । 'अयम्' इदानीं ब्राह्मणः सन् 'अस्मदन्यः' स्वतन्त्रो भवति ; अयं 'क्षत्रं वै'

---

* उपरिष्टाद् वक्ष्यति "अवभृथादुदेत्य अनूबन्ध्ययेष्ट्वोदवस्यति"-इति ८. २. १ । "अथो ये दीर्घसत्त्र मासीरन्, संवत्सरं वा भूयो वा०—० । अथोदवसानीययेष्ट्या यजते ०—० अथ यदेवैषोदवसानीयेष्टिः सन्तिष्ठते ऽथ प्राय माहुतिं जुहोति, काल एव प्रातराहुतिम्" -इति शत० ब्रा० ४. ५. १. १२–१६ ।

क्षत्रिय एव भवति । तदपि कथ मिति तत् उच्यते — 'अथ' यागकाले ब्राह्मणः सन्, यागादूर्द्ध्वं ब्राह्मण्यं परित्यज्य स्वकीयां क्षत्रियजाति मेव उपेत्य वर्त्तते ; तस्मादस्यास्मत्तोऽन्यत्व मिति परस्परं वदन्तो ऽग्न्यादयः तेजआदीनपहरन्ति ॥

तच्छान्त्यर्थं मुपस्थानं विधत्ते— "सो ऽनूबन्ध्यायै समिष्टयजुषा मुपरिष्टाद्धुत्वाहुति माहवनीय मुपतिष्ठेत"-इति । पूर्ववद् व्याख्येयम् (१११,११८ पृ०) ॥

तत्रोपस्थाने मन्त्र माह — "नाग्नेर्देवताया एमि, न गायत्र्याश्छन्दसो, न त्रिवृतः स्तोमान्न ब्राह्मणो बन्धोर् ; मा मे ऽग्निस्तेज आदित, मा गायत्री वीर्यं, मा त्रिवृत् स्तोम आयुर्, मा ब्राह्मणा ब्रह्म यशस्कीर्त्तिं ; स ह तेजसा वीर्येणायुषा ब्रह्मणा यशसा कीर्त्त्येन्द्रं देवता मुपैमि, त्रिष्टुभं छन्दः, पञ्चदशं स्तोमं, सोम राजानं, क्षत्रं प्रपद्ये, क्षत्रियो भवामि, देवाः पितरः पितरो देवा यो ऽस्मि स सन् यजे ; स्वं म इद मिष्टं, स्वं पूर्त्तं, स्वं श्रान्तं, स्वं हुतं ; तस्य मे ऽय मग्निरुपद्रष्टायं वायुरुपश्रोता ऽसावादित्यो ऽनुख्यातेद महं य एवास्मि सो ऽस्मीति"-इति । अत्र नाग्नेर्देवताया इत्यादि, क्षत्रियो भवामीत्यन्तं पूर्वमन्त्रवद् (११८ पृ०) व्याख्येयम् । हे 'देवाः' अग्न्यादयः ! 'पितरः' पालकाः ! यूयं, शृणुतेति शेषः । पितरो देवा इति पुनर्वचन मादरार्थम् । भवदनुग्रहात् कृष्णाजिनाच्छादनादिसंस्कारेण 'यः' ब्राह्मणो ऽस्मि यज्ञसमाप्तिपर्यन्तं, स एव ब्राह्मणः सन् 'यजे' यागं कुर्वे । 'मे' मम इदम् 'इष्टं' श्रौतं कर्म 'स्वं' स्वाधीनं जातम् । तथा 'पूर्त्तं' स्मार्त्त मपि कर्म 'स्वं' स्वाधीनं जातम् । तथा 'श्रान्तं' श्रमरूपं तपो ऽपि 'स्वं' स्वाधीनं जातम् । 'हुतम्' अन्यदपि काम्यहोमा

दिकं 'स्वं' स्वाधीनं जातम् । 'तस्य' तादृशस्येष्टापूर्त्तादियुक्तस्य 'मे' मम 'अयं' भूलोकावस्थितोऽग्निः 'उपद्रष्टा' समीपे स्थित्वा साक्षित्वेनावलोकयिता ; 'अयम्' अन्तरिक्षावस्थितो वायुः 'उपश्रोता' तस्याग्नेर्मुखादस्मद्वृत्तान्तं श्रोष्यति ; 'असौ' द्युलोकावस्थित आदित्यः , तम् 'अनु' पश्चात् 'ख्याता' स्वर्गलोके कथयिष्यति— इदं कर्मायं कृतवानिति । एवं फलपर्यन्तकर्मणि समाप्ते सति कर्मोपक्रमात् पूर्वं य एव क्षत्रियोऽस्मि स एवाहं क्षत्रियो भूत्वा तिष्ठामीति ॥

अनेन मन्त्रेण यदुपस्थानं, तत् प्रशंसति— "तस्य ह नाग्निस्तेज आदत्ते, न गायत्री वीर्यं, न त्रिवृत्स्तोम आयुर् , न ब्राह्मणा ब्रह्म यशस्कीर्त्तिं ; य एव मेता माहुतिं हुत्वा ऽऽहवनीय मुपस्थायोदवस्यति क्षत्रियः सन्"-इति । पूर्वं "तस्य ह नेन्द्र इन्द्रियम्"-इत्यादि यद्वाक्य मुक्तम् (११८पृ०), तद्वद् व्याख्येयम् । ६ (२४) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) षष्ठः खण्डः ॥ ६ (२४) ॥

॥ अथ सप्तमः खण्डः ॥

अथातो दीक्षाया आवेदनस्यैव तदाहुर्यद् ब्राह्मणस्य दीक्षितस्य ब्राह्मणो ऽदीक्षिष्टेति दीक्षामावेदयन्ति कथं क्षत्रियस्यावेदयेदिति यथैवैतद् ब्राह्म-

णस्य दीक्षि॑तस्य ब्राह्मणो॑ऽदीक्षिष्टेति॑ दीक्षा मावेद-
य॑न्त्येव मे॑वैतत् क्षत्रियस्यावेदयेत्॑ पुरोहितस्यार्षेये-
णे॑ति तत्त॑दितीँ३॑* निधाय वा एष स्वान्यायुधानि॑
ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण॑ ब्रह्म भूत्वा यज्ञ मुपा-
वर्त्तत॑ तस्मात् तस्य पुरोहितस्यार्षेयेण॑ दीक्षा मावेद-
येयु॑ः पुरोहितस्यार्षेयेण॑ प्रवरं प्रवृणीरन् ॥ ७ (२५) ॥

क्षत्रियस्य दीक्षितत्वावेदनमन्त्रे सन्देहात् प्रश्न मुद्भावयति— “अथातो दीक्षाया आवेदनस्यैव ; तदाहुर्यद् ब्राह्मणस्य दीक्षितस्य ब्राह्मणोऽदीक्षिष्टेति दीक्षा मावेदयन्ति , कथं क्षत्रियस्य आवेदयेदिति”-इति । ‘अथ’ दीक्षानन्तरम् , देवानां मनुष्याणां चाग्रे यत एतदीयदीक्षा कथनीया , ‘अतः’ कारणाद् दीक्षायाः ‘आवेदनस्य’ प्रकटीकरणस्यैव कश्चित् निर्णय उच्यते । ‘तत्’ तस्मिन् आवेदने सन्दिहाना ब्रह्मवादिनः प्रश्न माहुः – ब्राह्मणस्य दीक्षाया ऊर्द्धम् “अदीक्षिष्टाय’ ब्राह्मणः”-इति † मन्त्रेण दीक्षा प्रख्यापनीया । तथा च तैत्तिरीया आमनन्ति— अदीक्षिष्टाय’ ब्राह्मण इति त्रिरुपांश्वाह , देवेभ्य एवैनं प्राह ; त्रिरुच्चैरुभयेभ्य एवैनं देवमनुष्येभ्यः प्राह”-इति (सं० ६. १. ४. ३.) । एवं सति क्षत्रियस्य दीक्षावेदने किं मस्मिन् मन्त्रे ब्राह्मणशब्दः

---

* “तत्तदितीँ३” ख, ग, घ ।

† “अदीक्षिष्टाय’ ब्राह्मणः”–एतन्मात्र मेव मन्त्रस्वरूपम् । न चैष मन्त्रः सांहितिकः, तदुक्तं तैत्तिरीयसंहिताभाष्ये सायणेन “अध्वर्युः कश्चिन्मन्त्र मुत्पाद्य विनियुङ्क्ते अदीक्षिष्टायं ब्राह्मण इति० —० ।”–इति (१. २. १) । एतदेव दीक्षितावेदन मुच्यते ।

क्षत्रियपरत्वेनोहनीयः, आहोस्विदविकृत एव पठनीयः? इति प्रश्नाभिप्रायः ॥

तत्रोत्तर माह— "यथैवैतद् ब्राह्मणस्य दीक्षितस्य ब्राह्मणो ऽदीक्षिष्टेति दीक्षा मावेदयन्त्येव मेवैतत् क्षत्रियस्यावेदयेत् पुरोहितस्यार्षेयेणेति"–इति। अत्र शब्दो नोहितव्यः, अविकृत एव ब्राह्मणशब्दः क्षत्रियदीक्षावेदनेऽपि प्रयोक्तव्यः। यदि ब्राह्मणप्रवरो ऽपेक्षितः, तदानीं 'पुरोहितस्य' ब्राह्मणस्य सम्बन्धिनार्षेयेण प्रयोगः कर्त्तव्यः। तथा चापस्तम्बः क्षत्रियवैश्ययोरपि ब्राह्मणशब्देनैवावेदनं दर्शयति— "अदीक्षिष्टायं ब्राह्मणो ऽसावमुष्यपुत्रो ऽमुष्यपौत्रो ऽमुष्यनप्ता ऽमुष्याः पुत्रो ऽमुष्याः पौत्रो ऽमुष्या नप्तेति; ब्राह्मणो वा एष जायते, यो दीक्षते *; तस्माद्राजन्यवैश्या अपि ब्राह्मण इत्येवावेदयति"–इति (श्रौ० १०. ११. ५, ६. †)॥

ईदृशस्यावेदनस्य पूज्यतां दर्शयति— "तत्तदितीर३ँ"-इति। पूर्ववद् (११४पृ०) व्याख्येयम् ॥

ब्राह्मणत्वेनावेदन मुपपादयति — "निधाय वा एष स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञ मुपावर्त्तत; तस्मात् तस्य पुरोहितस्यार्षेयेण दीक्षा मावेदयेयुः, पुरोहितस्यार्षेयेण प्रवरं प्रवृणीरन्"–इति। 'स्वान्यायुधानि' धनुरादीनि, 'ब्रह्मण आयुधानि' स्फ्यकपालादीनि ‡; यस्मात् स्वायुधपरित्यागपूर्वकं ब्रह्मायुधस्वीकारेण ब्राह्मणो भूत्वा यज्ञं प्राप्तवान्,

---

* 'मातुरग्रेऽधिजननं, द्वितीयं मौञ्जिबन्धने।
तृतीयं यज्ञदीक्षायां, द्विजस्य श्रुतिचोदनात्॥'–इति म० सं० २. १६९।

† "अथैनं त्रिरुपांश्वावेदयति, त्रिरुच्चैः"–इति एतत्पूर्वांशः।

‡ १०२पृ० 'एतानि वै'–इत्यादि अन्वेत्यन्तं द्रष्टव्यम्। १०५पृ० ७प० अपि द्र०।

तस्मात् 'अस्य' यजमानस्य पुरोहितसम्बन्धिना गोत्रेण दीक्षावेदनम्, तथा प्रवरोऽपि विज्ञेयः * ॥ ७ (२५) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थाध्याये
(चतुस्त्रिंशाध्याये) सप्तमः खण्डः । ७ (२५) ॥

॥ अथ अष्टमः खण्डः ॥

अथातो यजमानभागस्यैव तदाहुः प्राश्नीयात् क्षत्रियो यजमानभागाँ३† न प्राश्नीया३त् इति यत् प्राश्नीयादहुताद्धुतं प्राश्य पापीयान्स्याद् यन्न प्राश्नीयाद् यज्ञादात्मानमन्तरियाद् यज्ञो वै यजमानभागः स ब्रह्मणे परिहृत्यः पुरोहितायतनं वा एतत् क्षत्रियस्य यद् ब्रह्मार्द्धात्मो ह वा एष क्षत्रियस्य यत् पुरोहित उपाह परोक्षेणैव प्राशितरूपमाप्नोति नास्य प्रत्यक्षम्भक्षितो भवति यज्ञ उ ह वा एष प्रत्यक्षं यद् ब्रह्मा ब्रह्मणि हि सर्वो यज्ञः प्रतिष्ठितो

---

* वर्त्मानि नोपरिष्टादित्यत्र पञ्चमाध्यायीयपञ्चमखण्डे "पुरोधयेन दीक्षयेन प्रवरेणैव —इति।

† "यजमानभागां३" ख, ग, घ।

यज्ञे यजमानो यज्ञ एव तद् यज्ञ मप्यत्यर्जन्ति यथाऽप्स्वापो यथाऽग्नावग्नि तद्वै नातिरिच्यते तदेनं न हिनस्ति तस्मात् स ब्रह्मणे परिहृत्यो ऽग्नौ हैके जुह्वति प्रजापतेर्विभान्नाम लोकस्तस्मिंस्त्वा दधामि सह यजमानेन स्वाहेति तत्तथा न कुर्याद् यजमानो वै यजमानभागो यजमानं ह सो ऽग्नौ प्रवृणक्ति य एनं तत्र ब्रूयाद् यजमान मग्नौ प्रावार्क्षीः अग्निरस्य प्राणान् धक्ष्यति मरिष्यति यजमान इति शश्वत् तथा स्यात् तस्मात्तस्याशां नेयादाशां नेयात् ॥ ८ (२६) ॥

इत्यैतरेयब्राह्मणे सप्तमपञ्चिकायां चतुर्थोऽध्यायः॥४॥

दर्शपूर्णमासयोः यजमानभागप्राशनं विहितम् *, तदत्र दीक्षणीयादीष्टिषु चोदकप्राप्तम् † ; क्षत्रियस्य तत्प्राशने निर्णयं तत्तु विचार मवतारयति— "अथातो यजमानभागस्यैव; तदाहुः प्राश्नीयात् क्षत्रियो यजमानभागाँ३, न प्राश्नीयात्३ ? इति"— इति । 'अथ' दीक्षावेदननिर्णयानन्तरम्, दीक्षणीयादीष्टयो यतो बुद्धिस्थाः, 'अतः' कारणात्, तत्र यजमानभागस्यैव, प्रकारविशेष

---

* "पश्चात् कुशेषु यजमानभागम्"—इति आश्व० श्रौ० १. ११. ३। "अथ यद् पूर्वार्द्धं पुरोडाशस्य प्रशीर्य पुरस्ताद् ध्रुवायै निदधाति, यजमानो वै ध्रुवा, तद् यजमानस्य प्राशितं भवति"—इति शत० ब्रा० १. ८. १. ११ ।

† "पौर्णमासेनेष्टिपशुसोमा उपदिष्टाः"—इति आश्व० श्रौ० २. १. १।

उच्यत इति शेषः । 'तत्' तस्मिन् भागे ब्रह्मवादिनो विचार माहुः । क्षत्रियो ब्राह्मणवत् किं यजमानभागं प्राश्नीयात्, उत न ? इति । विचारार्थं प्लुतिद्वयम् ॥

पक्षद्वये दोष मुद्भावयति— "यत्प्राश्नीयादहुताद्धुतं प्राश्य पापीयान्त्स्याद्, यन्न प्राश्नीयाद् यज्ञादात्मान मन्तरियाद् ; यज्ञो वै यजमानभागः"-इति । हुत मस्तीति 'हुतात्', तादृशो न भवतीति 'अहुतात्'; "अथैते अहुतादो यद्राजन्यो वैश्यः शूद्रः" -इति पूर्वं सुक्तम् (१०३५०) ; अतोऽयं क्षत्रियः 'अहुतात्' योग्यतारहितो यदि हुतशेषं प्राश्नीयात् , तदानीं 'पापीयान्' अत्यन्तपापयुक्तो भवेत् । अप्राशनपक्षे तु यज्ञादात्मानम् 'अन्तरियाद्' विच्छिन्द्यात् ; यजमानभागस्य यज्ञहेतुत्वेन यज्ञस्वरूपत्वात् तद्भागराहित्ये यज्ञात् स्वयं विच्छिन्नो भवति ॥

उक्तं दोषद्वयं परिहर्त्तुं पक्षान्तर माह— "स ब्रह्मणे परिहृत्यः"-इति । 'सः' यजमानभागः ऋत्विग्विशेषाय 'ब्रह्मणे' 'परिहृत्यः' परितः सर्वात्मना समर्पणीयः ॥

तत्समर्पणे दोषद्वयराहित्यं दर्शयति— "पुरोहितायतनं वा एतत् क्षत्रियस्य, यद् ब्रह्मार्द्धात्मो ह वा एष क्षत्रियस्य ; यत् पुरोहित उपाह परोक्षेणैव प्राशितरूप माप्नोति, नास्य प्रत्यक्षं भक्षितो भवति"-इति । ऋत्विग्रूपो 'ब्रह्मा' इति यदस्ति , एतत् क्षत्रियस्य पुरोहितायतनम् ; पुरोहितो योऽस्ति, एषः क्षत्रियस्य 'अर्द्धात्मो ह वै' अर्द्धदेह एव । उ ह वा इति निपातसमूहो ऽवधारणार्थः । अर्द्धशरीरस्थानीयपुरोहितरूपेण ब्रह्मणा तस्मिन् भागे सति 'परोक्षेणैव' व्यवधानेनैव 'प्राशितरूपं' प्राशितसादृश्यं प्राप्नोत्येव । अहशब्द उपशब्दश्च मिलित्वा अवधारणार्थौ । 'अस्य'

क्षत्रियस्य 'प्रत्यक्षम्' अव्यवधानेन स्वमुखे स भागो भक्षितो न भवति ; एवं सति व्यवधानेन भक्षितत्वाद् यज्ञान्तरायो न भविष्यति, स्वमुखेन भक्षणाभावादयं पापीयानपि न भविष्यति ॥

ब्राह्मणस्तद्भागप्राशनं प्रशंसति— "यज्ञ उ ह वा एष प्रत्यक्षं यद् ब्रह्मा, ब्रह्मणि हि सर्वो यज्ञः प्रतिष्ठितो, यज्ञे यजमानो, यज्ञ एव तद् यज्ञं सम्प्रत्यर्जन्ति ; यथाऽप्स्वापो यथाऽग्नावग्निं, तद्वै नातिरिच्यते तदेनं न हिनस्ति तस्मात् स ब्रह्मणे परिहृत्यः"— इति । यो ब्रह्मास्ति, एष 'प्रत्यक्षम्' अव्यवधानं यथा भवति तथा 'यज्ञ उ ह वै' यज्ञस्वरूप एव तत्साधकत्वात् । किञ्च ब्रह्मण्येव सर्वो यज्ञः प्रतिष्ठितः ; वेदत्रयविहितकर्मपरिज्ञातृत्वेन ब्रह्मणो भिषग्रूपत्वस्योक्तत्वात् *। तस्मिंश्च प्रतिष्ठिते यज्ञे, यजमानोऽपि प्रतिष्ठितः; तत्फलभागित्वात् । एवं सति 'तत्' तेन भागप्राशनेन 'यज्ञ एव' ब्रह्मरूपे भागरूपं 'यज्ञम्' अपि 'प्रत्यर्जन्ति' सम्यक् प्रक्षिपन्ति । तत्र दृष्टान्तः—यथा लोके अप्सु प्रक्षिप्ता आपः एकत्वेन संसृज्यन्ते, यथा चाग्नौ प्रक्षिप्तमग्निमेकीभूतं पश्यामः, 'तद्वै' तथा ब्रह्मणा प्राशितं हविः 'नातिरिच्यते' अतिरिक्तं न भवति किन्तु यज्ञरूपेण ब्रह्मणा सहैकीभूतं हविः 'एनं' क्षत्रियं 'न हिनस्ति' न बाधते । तस्मात् 'सः' यजमानभागो ब्रह्मणे 'परिहृत्यः' समर्पणीयः ।

पक्षान्तरमुपन्यस्य दूषयति— "अग्नौ हैके जुह्वति ; प्रजापतेर्विभान्नाम लोकस्तस्मिंस्त्वा दधामि सह यजमानेन स्वाहेति ; तत्तथा न कुर्याद् ; यजमानो वै यजमानभागो यजमानं ह सोऽग्नौ प्रवृणक्ति ; य एनं तत्र ब्रूयाद् यजमानमग्नौ प्रावार्क्षीः,

---

* ५.५.९.—१भा० २०७पृ० १पं० ८०।

प्राणाग्निः प्राणान् धक्ष्यति,-- मरिष्यति यजमान इति ; शश्वत् तथा स्यात् ; तस्मात्तस्याशां नेयादाशां नेयात्”--इति । ‘एके’ याज्ञिकाः , तं यजमानभागं अग्नौ जुह्वति । तत्र “प्रजापतेः”--इत्यादिको मन्त्रः । प्रजापतेः सम्बन्धी यो लोकः, तस्य “विभान्”--इति तन्नामधेयम् ; विशेषेण भातीति तद्व्युत्पत्तेः । हे यजमानभाग ! यजमानेन सह त्वां तस्मिन् लोके ‘दधामि’ प्रक्षिपामि, तदर्थं मिदं स्वाहुतमस्तु । अनेन मन्त्रेण यत् होमानुष्ठानमस्ति, तत्तथा न कुर्यात् । यजमानभागस्य यजमानस्वरूपत्वेन तस्य भागस्य होमे ‘सः’ होमकर्त्ता यजमानं अग्नौ ‘प्रवृणक्ति’ प्रकर्षेण दग्धं करोतीति । ‘तत्र’ तत्राग्नौ ‘यः’ शत्रुरागत्य ‘एनं’ कर्त्तारं ‘ब्रूयात्’ अनेन । कथमिति तदुच्यते— हे होमकर्त्तस्त्वं यजमानं अग्नौ ‘प्रावाक्षीः’ प्रकर्षेण दग्धवानसि , ‘अस्य’ यजमानस्य प्राणानग्निः प्रकर्षेण धक्ष्यति, यजमानो मरिष्यतीति ; स शापोऽवश्यं तथैव स्यात् । तस्मात् ‘तस्य’ भागस्य ‘आशाम्’ इच्छामपि ‘नेयात्’ न प्राप्नुयात् । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ८(२६) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां चतुर्थोऽध्याये
(चतुस्त्रिंशाध्याये) अष्टमः खण्डः ॥ ८ (२६) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये ‘वेदार्थप्रकाश’--नामभाष्ये
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायाः चतुर्थोऽध्यायः ॥

॥ अथ पञ्चमाध्यायः ॥

(तत्र)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ विश्वन्तरो ह सौषद्मनः श्यापर्णान् परिचक्षाणो विश्यापर्णं यज्ञमाजह्रे तद्धानुबुध्य * श्यापर्णास्तं यज्ञमाजग्मुस्ते ह तदन्तर्वेद्यासांचक्रिरे तान् ह † दृष्ट्वोवाच पापस्य वा इमे कर्मणः कर्तार आसतेऽपूताया वाचो वदितारो यच्छ्यापर्णा इमानुत्थापयतेमे मेऽन्तर्वेदि मासिषतेति तथेति तानुत्थापयाञ्चक्रुस्ते होत्थाप्यमाना रुरुविरे ये तेभ्यो भूतवीरेभ्योऽसितमृगाः कश्यपानां सोमपीथमभिजिग्युः पारिक्षितस्य जनमेजयस्य विकश्यपे यज्ञे तैस्ते तत्र वीरवन्त आसुः कः ‡ स्वित्सोऽस्माकास्ति वीरो य इमं सोमपीथमभिजेष्यतीत्ययमहमस्मि वो वीर इति होवाच रामो मार्गवेयो रामो हास मार्गवेयोऽनूचानः श्यापर्णीयस्तेषां होत्तिष्ठतामुवाचापि नु राजन्नित्थंविदं वेदेरुत्थापयन्तीति यस्त्वं कथं वेत्थ ब्रह्मबन्धविति ॥ १ (२७) ॥

---

* "तद्धानुबुध्य" क, ख, घ, ङ, च, एवं भाष्यधृतः।

† "तान् हा" ख।

‡ "कः"—इति सर्वसंमतः पाठः क पुस्तके।

॥ श्रीगणेशाय नमः ॥

क्षत्रियो यजमानो यस्तस्य होमादि वर्णितम् ।
फलनामा तु चमसस्तस्यैवात्रोपवर्ण्यते ॥ १ ॥

तत्रादौ क्षत्रियस्य सोमभक्षराहित्यप्रदर्शनार्थमुपाख्यानमाह— "विश्वन्तरो ह सौषद्मनः श्यापर्णान् परिचक्षाणो विश्यापर्णं यज्ञमाजह्रे; तद्धानुबुध्य श्यापर्णास्तं यज्ञमाजग्मुस्ते ह तदन्तर्वेद्यासाञ्चक्रिरे; तान् ह दृष्ट्वोवाच,— पापस्य वा इमे कर्मणः कर्त्तार आसते, ऽपूतायै वाचो वदितारो यच्छ्यापर्णा, इमानुत्थापयतेमे मेऽन्तर्वेदि मासिषतेति * ; तथेति, तानुत्थापयाञ्चक्रुः" –इति । शोभनं सद्म राजगृहं यस्य राज्ञः, सोऽयं 'सुषद्मा', तस्य पुत्रः 'सौषद्मनः'। स च 'विश्वन्तर'नामकः। स कदाचिद् यागं चिकीर्षुः 'श्यापर्णान्' तन्नामकान् ब्राह्मणविशेषान् 'परिचक्षाणः' आर्त्विज्ये निराकुर्वन् 'विश्यापर्णं यज्ञमाजह्रे' श्यापर्णनामकब्राह्मणरहित मेव यज्ञ मनुष्ठितवान्। 'तत्' तत्सर्वं श्यापर्णनामका ब्राह्मणाः 'अनुबुध्य' मनुष्यमुखादवगत्य, विश्वन्तरेण राज्ञा तदानी मनाहूता एव तं यज्ञ माजग्मुः। आगत्य 'ते ह' त एव श्यापर्णाः 'तदन्तर्वेदि' तस्य यज्ञस्य वेदिमध्ये 'आसाञ्चक्रिरे' राजानुज्ञा मन्तरेण स्वय मेवोपविष्टवन्तः। राजा 'तान्' उद्दण्डान् श्यापर्णान् दृष्ट्वा, स्वकीयान् वेत्रपाणीन् पुरुषानुवाच। 'यद्' ये श्यापर्णाः सन्ति, इमे 'अपूतायै वाचो वदितारः' अपूतां वाचं मदीयावज्ञारूपां वदन्तः 'पापस्य कर्मणः कर्त्तारः' धौर्त्यरूपं व्यापारं कर्त्तु मुद्यता इहासते; 'इमे' श्यापर्णाः 'मेऽन्तर्वेदि'

---

* 'मा आसिषत' अधर्मेणोपविष्टा मा भवन्त्वित्यर्थ एवात्र ग्राह्यः स्यात्; अन्यथा मूले श्रुतो माशब्दो ऽव्याख्यात एव भवेदिति ध्येयम् ।

मदीयाया वेदेर्मध्ये 'आसिषत' स्वय मेवोपविष्टाः ; इमान् धूर्त्तान् हे वेत्रपाणयः ! उत्थापयत । 'इति' एवं राज्ञोक्ता वेत्रपाणयः 'तथा'--इत्यङ्गीकृत्य 'तान्' श्यापर्णानुत्थापयाञ्चक्रुः ॥

तेषां श्यापर्णानां वृत्तान्त माह— ''ते होत्थाप्यमाना रुरुविरे; ये तेभ्यो भूतवीरेभ्यो ऽसितमृगाः कश्यपानां सोमपीथ मभिजग्युः पारिक्षितस्य जनमेजयस्य विकश्यपे यज्ञे, तैस्ते तत्र वीरवन्त आसुः ; क स्वित्सो ऽस्माकास्ति वीरो य इमं सोमपीथ मभिजेष्यतीति''--इति । वेत्रपाणिभिरुत्थाप्यमानाः 'ते' श्यापर्णा ब्राह्मणाः 'रुरुविरे' रवं शब्दं परस्पर मुच्चैर्ध्वनिं कृतवन्तः । तत्र वृद्धाः केचिद् अन्यान् प्रति काञ्चित्पुरातनीं कथा मूचुः । परिक्षित्पुत्रो जनमेजयाख्यो यो राजा, स कदाचित् कश्यपवंशोत्पन्नान् ब्राह्मणान् विहाय 'विकश्यपं' यज्ञं भूतवीरसञ्ज्ञकैर्ब्राह्मणैरृत्विग्भिः कारयामास । तदानीं कश्यपानां मध्ये 'ये' केचिद् असितमृगनामकाः पुरुषाः 'सोमपीथं' जनमेजयसम्बन्धिनं सोमयागं 'तेभ्यः' भूतवीरसञ्ज्ञकेभ्यो ब्राह्मणेभ्यः बलादाकृष्य स्वयम् 'अभिजिग्युः' अभितो जयं प्राप्ताः, (बहुषु यज्ञप्रयोगेषु विजिगीषुकथां श्रुत्वा) 'तान्' भूतवीरान् ब्राह्मणान् पराजयं प्रापय्य स्वय मसितमृगनामानो जितवन्तः ; 'तैः' असितमृगैः 'ते' कश्यपाः 'अत्र' जनमेजयस्य यज्ञे 'वीरवन्तः' शूरपुरुषोपेता आसुः । एतां कथा मुदाहृत्य श्यापर्णाः स्वकीयानेवं पृच्छन्ति,— 'अस्माकं' राज्ञा तिरस्कृताना मस्माकं मध्ये 'यः' पुमान् 'इमं सोमपीथं' विश्वन्तरस्य राज्ञः सोमयाग मभिजेष्यति, स तादृशो वीरः 'कश्चिदस्ति' यः कोऽपि अस्ति ? 'इति' एव मुच्चैः शब्दं चक्रुः ॥

---

* अस्माकेत्यदन्तशब्दोऽस्मदीयवचनः ; ततो विभक्तेर्लुकि रूपम् (ऋ०सं० १. ९७. ३.) ।

तस्य प्रश्नस्य श्यापर्णानां मध्ये केनचिदुक्त मुत्तरं दर्शयति— “अय मह मस्मि भो वीर इति होवाच रामो मार्गवेयः”—इति। मृगवनाम काचिद् योषित्, तस्याः पुत्रो रामनामा कश्चिद् ब्राह्मण एव मुवाच — हे श्यापर्णाः ‘भो’ युष्माकं मध्ये ‘वीरः’ परकीयान् विजेतुं शूरः ‘अह मय मस्मि’ भवतां पुरतो वर्त्तमानो ऽस्मीति ॥

तस्य रामस्य वृत्तान्त माह — “रामो हास मार्गवेयो ऽनूचानः श्यापर्णीयस्तेषां होत्थितानामुवाचापि नु राजन्नित्थंविदं वेदेरुत्थापयन्तीति; यस्त्वं कथं वेत्थ ब्रह्मबन्धविति”—इति। ‘श्यापर्णीयः’ श्यापर्णानां ब्राह्मणानां मध्ये जातः, मृगवपुत्रो रामः ‘अनूचानः’ साङ्गवेदशास्त्रपारङ्गत आस। तत्रावस्थितानां तेषां श्यापर्णानां वेदेरुत्तिष्ठतां मध्ये ऽवस्थितो रामो विश्वन्तरं प्रत्येव मुवाच,— हे राजन्! ‘इत्थंविदं’ रामसदृश मपर्णादिप्रकाराभिज्ञ मपि त्वदीया वेदपालका ‘अनु’ नियतं वेदेरुत्थापयन्ति, तदे तदयुक्त मिति। तच्छ्रुत्वा विश्वन्तरो राजैव मुवाच — हे ‘ब्रह्मबन्धो’ ब्राह्मणाधम राम! ‘यस्त्वं’ धार्ष्ट्यात् ब्रवीषि स त्वं कथं वेत्थ? इति। अत्र राजोवाचेत्यध्याहर्त्तव्यम् ॥ १ (२७) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) प्रथमः खण्डः ॥ १ (२७) ॥

---

* अस्ति श्यापर्णशब्दो बिदाद्यन्तर्गणोपकादिगणे पठितः (पा० २,४,६९), कार्त्तकौजपादिगणे च पैङ्गश्यापर्णेयाः काप्यश्यापर्णेयाः इति (पा० ६,२,३७)। तदिह श्यापर्णः सायकायन आह”—इति शत० ब्रा० १०,४,१,१० ; एतेषामन्यत्र च ६,२,१,३९,२,५,२,१।

॥ अथ द्वितीयः खण्डः ॥

यत्रेन्द्रं देवताः पर्यवृञ्जन् विश्वरूपं त्वाष्ट्रमभ्यमंस्त वृत्रमस्तृत यतीन्त्सालावृकेभ्यः प्रादादरुर्मघानवधीद् बृहस्पतेः प्रत्यवधीदिति तत्रेन्द्रः सोमपीथेन व्यार्ध्यतेन्द्रस्यानु व्यृद्धिं क्षत्रं सोमपीथेन व्यार्ध्यतापीन्द्रः सोमपीथेऽभवत् त्वष्टुरामुष्य सोमं तद् व्यृद्धमेवाद्यापि क्षत्रं सोमपीथेन स यस्तं भक्षं विद्याद्यः क्षत्रस्य सोमपीथेन व्यृद्धस्य येन क्षत्रं समृध्यते कथं तं वेदेरुत्थापयन्तीति वेत्थ ब्राह्मण त्वं तं भक्षाँ३ं वेद हीति तं वै नो ब्राह्मण ब्रूहीति तस्मै वै ते राजन्निति होवाच ॥ २ (२८) ॥

अथ रामः स्वकीयं वेदनं राज्ञोऽग्रे दर्शयति— "यत्रेन्द्रं देवताः पर्यवृञ्जन्; विश्वरूपं त्वाष्ट्रमभ्यमंस्त, वृत्रमस्तृत, यतीन्त्सालावृकेभ्यः प्रादादरुर्मघानवधीद्, बृहस्पतेः प्रत्यवधीदिति; तत्रेन्द्रः सोमपीथेन व्यार्ध्यतेन्द्रस्यानु व्यृद्धिं क्षत्रं सोमपीथेन व्यार्ध्यतापीन्द्रः सोमपीथेऽभवत् त्वष्टुरामुष्य सोमं; तद् व्यृद्धमेवाद्यापि क्षत्रं सोमपीथेन; स यस्तं भक्षं विद्याद्यः क्षत्रस्य सोमपीथेन व्यृद्धस्य येन क्षत्रं समृध्यते, कथं तं वेदेरुत्थापयन्तीति"—इति । हे विश्वन्तर ! मदीयं वेदनं शृणु । पुरा कदाचिद् देवताः इन्द्रस्योपरि पञ्चापराधान् सम्पाद्य इन्द्रं 'पर्यवृञ्जन्' यज्ञेषु परितो वर्जितवन्तः । 'यत्र' यदा वर्जनं कृतं, तत्र तत्रेन्द्रः 'सोमपीथेन व्यार्ध्यत' सोमपानेन वियुक्तो ऽभूत् । इन्द्रस्य ये ऽपराधास्ते ऽभिधीयन्ते ।

त्वष्टुः पुत्रं विश्वरूपनामानं ब्राह्मणम् 'अभ्यमंस्त' इन्द्रो हिंसितवान्। तथा तेन त्वष्ट्रेत्यादिश्रुतं वृत्रनामानं ब्राह्मणम् 'अस्तृत' हिंसितवान्। एतदुभयं तैत्तिरीयैः "विश्वरूपो वै त्वाष्ट्रः"—"त्वष्टा हतपुत्रः"—इत्यनुवाकद्वये विस्पष्ट माम्नातम् *। तथा यतिवेषधरानसुरान् शस्त्रेण छित्वा 'सालावृकेभ्यः' अरण्यश्वभ्यः प्रादात् †। तथा अन्यानप्यरुर्मघनामकान् ब्राह्मणवेषानसुरान् अवधीत्। तथा स्वगुरोर्बृहस्पतेर्वाक्यं स्वकीयेन वाक्येन प्रत्यवधीत्। सोऽयं प्रतिघातो न युक्तः; तथा चापस्तम्बः स्मरति— "वाक्येन वाक्यस्य प्रतिघात माचार्यस्य वर्जयेच्छ्रेयसां च"—इति। एते पञ्चापराधाः तैर्निमित्तभूतैरिन्द्रस्य सोमपाने निवारिते सति 'व्यृद्धं' तन्निवारणम् अनु 'क्षत्रं' सर्वापि क्षत्रियजातिः 'सोमपीथेन व्यार्ध्यत' सोमपानेन वियुक्ताभूत्। तदूर्ध्वं 'सोमपीथे' सोमपानेऽपि स प्रवृत्तोऽभूत्। कथ मिति तदुच्यते— 'अमुष्य त्वष्टुः सोमं आ', बलादपिबदिति शेषः। तथाच तैत्तिरीया आमनन्ति— "स यज्ञवेशसं कृत्वा प्रासहा सोम मपिबत्"—इति ‡। 'तत्' तथा सति, इन्द्रेण बलात्सोमे पीते सति, क्षत्रियास्तस्य तत्सामर्थ्याभावादिदानी मपि क्षत्रं 'सोमपीथेन व्यृद्ध मेव' सोमपानरहित मेव

---

* तै० सं० २, ५, १, १; २, १।

† "इन्द्रो यतीन्त्सालावृकेभ्यः प्रायच्छत्"—इति तै० सं० ६, २, ७, ५। ता० ब्रा० ८, १, ४। 'वेदविरुद्धनियमोपेतान् यतीन्'—इति तत्र सायणः। ता० ब्रा० १३, ४, १७, 'यतीन्—एतत्संज्ञकान् यज्ञविरोधिजनान्' इति तु तत्र सायणः।

‡ तै० सं० २, ४, १२, १। "इन्द्रो यज्ञवेशसं"—इत्यादिः संहितापाठः। "इन्द्राणी देवी प्रासहा ददाना"—इति तै० ब्रा० २, ४, २, ७। "इन्द्रस्य प्रिया जाया वावाता प्रासहा नाम"—इति पुरस्तादाम्नात मिहैव (८८पृ० २पं०)।

अवतिष्ठते । 'येन' भक्षविशेषेण क्षत्रं समृद्धं भवति, तादृशो योऽन्यो भक्षः, सोमपानेन वियुक्तस्य क्षत्रस्य सम्भवति, तं भक्षं यः पुमान् विद्यात्, 'तं' तादृशं क्षत्रियभक्षविद मस्मदादिपुरुषं कथ मेते सोमपाणयो वेदेरुत्थापयतीति रामस्योपालम्भः ॥

अथ रामविश्वन्तरयोरुक्तिप्रत्युक्ती दर्शयति— "वेत्थ ब्राह्मण त्वं तं भक्षाँ३ ? वेद हीति ; तं वै नो ब्राह्मण ब्रूहीति ; तस्मै वै ते राजन्निति होवाच"–इति । हे 'ब्राह्मण' राम ! त्वं तादृशं भक्षं किं वेत्थ ? इति विश्वन्तरस्य प्रश्नः ; तदर्था श्रुतिः । 'वेद हि' जानाम्येवेति रामोऽब्रवीत् । हे ब्राह्मण ! 'तं वै' त मेव क्षत्रियभक्षं 'नः' अस्माकं ब्रूहीति विश्वन्तरः पप्रच्छ । हे राजन् ! 'तस्मै ते वै' तादृशाय पृच्छते तुभ्य मेव, कथयामीति राम उवाच ॥ (२) २८ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) द्वितीयः खण्डः ॥ २ (२८) ॥

॥ अथ तृतीयः खण्डः ॥

त्रयाणां भक्षाणा मेक माहरिष्यन्ति सोमं वा दधि वाऽपो वा स यदि सोमं ब्राह्मणानां स भक्षो ब्राह्मणांस्तेन भक्षेण जिन्विष्यसि ब्राह्मणकल्पस्ते प्रजाया माजनिष्यत आदाय्यापाय्यावसायी यथा-

कामप्रयाप्यो यदा वै क्षत्रियाय पापं भवति ब्राह्मणकल्पो ऽस्य प्रजाया माजायत ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा ब्राह्मणता मभ्युपैतोः स ब्रह्मबन्धवेन जिज्यूषितो ऽथ यदि दधि वैश्यानां स भक्षो वैश्यांस्तेन भक्षेण जिन्विष्यसि वैश्यकल्पस्ते प्रजाया माजनिष्यते ऽन्यस्य बलिकृदन्यस्याद्यो यथाकामज्येयो यदा वै क्षत्रियाय पापं भवति वैश्यकल्पो ऽस्य प्रजाया माजायत ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा वैश्यता मभ्युपैतोः स वैश्यतया जिज्यूषितो ऽथ यद्यपः शूद्राणां स भक्षः शूद्रांस्तेन भक्षेण जिन्विष्यसि शूद्रकल्पस्ते प्रजाया माजनिष्यते ऽन्यस्य प्रेष्यः कामोत्थाप्यो यथाकामवध्यो यदा वै क्षत्रियाय पापं भवति शूद्रकल्पो ऽस्य प्रजाया माजायत ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा शूद्रता मभ्युपैतोः स शूद्रतया जिज्यूषितः ॥ (३) २९ ॥

क्षत्रियस्य हेया भक्षास्त्रिविधाः, उपादेयो भक्ष एकः ; तत्र हेयान् भक्षान् दर्शयति— "त्रयाणां भक्षाणा मेक माहरिष्यन्ति, सोमं वा दधि वा ऽपो वा"-इति । हेयानां त्रयाणां मध्ये भक्ष मेकं क्षत्रियस्य तव मनभिज्ञा ऋत्विज आहरिष्यन्ति । कं भक्ष मित्याशङ्क्य सोमं वा दधि वा जलं वेत्युक्तम् ॥

तत्र सोमपक्षे दोषं दर्शयति— "स यदि सोमं, ब्राह्मणानां स

भक्षो, ब्राह्मणांस्तेन भक्षेण जिन्विष्यसि ; ब्राह्मणकल्पस्ते प्रजाया माजनिष्यत,— आदाय्यापाय्यावसायी यथाकामप्रयाप्यो ; यदा वै क्षत्रियाय पापं भवति , ब्राह्मणकल्पोऽस्य प्रजाया माजायत , ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा ब्राह्मणता मभ्युपैतोः, स ब्रह्मबन्धवेन जिज्यूषितः”–इति । ‘सः’ अनभिज्ञ ऋत्विग् यदि ते विश्वन्तरस्य क्षत्रियस्य ‘सोमं’ भक्षम् , आहरेदिति शेषः , ‘सः’ सोमो ब्राह्मणानां योग्यो भक्षः , तेन भक्षेण ब्राह्मणान् ‘जिन्विष्यसि’ प्रीणयिष्यसि ; न तु क्षत्रियस्य तव प्रीतिः । तथा सति ‘ते’ तव राज्ञः ‘प्रजायां’ सन्ततौ ‘ब्राह्मणकल्पः’ ईषदसमाप्तो ब्राह्मणः* आजनिष्यते । क्षत्रियधर्मेण शौर्येण रहितत्वात् तस्य ब्राह्मणसदृशत्वम् । स च पुत्रो ब्राह्मणवत् वक्ष्यमाणगुणचतुष्टयोपेतो भवति । आदानं प्रतिग्रहः, तच्छीलः ‘आदायी’ ; प्रतिग्रहश्च ब्राह्मणगुणः । ऋत्विग्भूत्वा सोमम् ‘आ’ समन्तात् पाययतीति ‘आपायी’ ; तदेतद् याजन मपि ब्राह्मणगुणः । अवस मन्नं तस्य सम्बन्धि याचन मावसः , त मावस मेति प्राप्नोति ‘आवसायी’ ; परगृहे सदा भोजनयाचन मपि ब्राह्मणगुणः । काम मिच्छा मनतिक्रम्य यथाकामं, तदनुसारेण ‘प्रयाप्यः’ निर्वासयितुं शक्यः ; क्षत्रियवैश्यादिवत् शौर्यधनाद्यभावात् यः कोऽप्यागत्य दुर्बलं ब्राह्मणं तद्गृहात् तदीयग्रामाद्वा निष्कासयितु मिच्छति, तदानी मयं ब्राह्मणो दुर्बलत्वात् तेन निःसारयितुं शक्यते । एव मेते चत्वारो धर्माः ब्राह्मणगुणाः । सोमं भक्षयतो राज्ञः एतद्गुणकः पुत्रो जायते । किञ्च यदा प्रमादात् ‘क्षत्रियस्य पाप’’ क्षत्रियस्य किञ्चिन्निषिद्धाचरणं भवति , तदानीं तेन पापेन तस्य क्षत्रियस्य

---

* “ईषदसमाप्तौ कल्पब्देश्यदेशीयः”–इति पा० ५, ३, ६७ सू ।

'प्रजायां' सन्ततौ 'ब्राह्मणकल्पः' शौर्यराहित्यादिना ब्राह्मणसदृशः पुत्र आजायते । 'अस्मात्' पापिनः क्षत्रियात् 'द्वितीयो वा तृतीयो वा' पुत्रो वा पौत्रो वा 'ब्राह्मणताम् अभ्युपैतोः' शौर्यादिगुणरहितं ब्राह्मण्यं प्राप्तुमीश्वरः* समर्थो भवति । 'सः' ब्राह्मणसदृशः क्षत्रियपुत्रो 'ब्राह्मणबन्धवेन' ब्राह्मणानां सम्बन्धित्वेन ब्राह्मणोचित याञ्चादिना 'जिज्यूषितः' जीवितुमिच्छुः, नीचरूपदैन्यवृत्त्या जीवितुं प्रवृत्तो भवतीत्यर्थः ॥

सोमस्य भक्षत्वे दोषमुक्त्वा दध्नो भक्षत्वे दोषमाह— 'अथ यदि दधि, वैश्यानां स भक्षो, वैश्यांस्तेन भक्षेण जिन्विष्यसि, वैश्यकल्पस्ते प्रजाया माजनिष्यते,— ऽन्यस्य बलिकृदन्यस्याद्यो यथाकामज्येयो; यदा वै क्षत्रियाय पापं भवति, वैश्यकल्पो ऽस्य प्रजाया माजायत, ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा वैश्यता मभ्युपैतोः, स वैश्यतया जिज्यूषितः"-इति । यद्ययं त्वं दधिरूपं भक्ष माहरेत्, तदा दध्नो वैश्यभक्षत्वात् तेन वैश्यान् प्रीणयिष्यसि । ततस्तव सन्ततौ वैश्यसमानः पुत्र आजनिष्यते । वैश्यश्च वाणिज्यं कुर्वन् 'अन्यस्य' राज्ञो 'बलिकृत्' बलिं पूजां करोति, करं प्रयच्छतीत्यर्थः । अत एव 'अन्यस्य' राज्ञः 'आद्यः' भक्ष्यो ऽधीनो भवतीत्यर्थः । तस्य राज्ञः काम मिच्छा [illegible] तस्य 'ज्येयः' अभिभवनीयो भवति । "ज्यः अभिभवे"-इति धातुः । त एते करप्रदान-पराधीनत्व-नि[illegible]तार्यत्वाख्या वैश्यधर्माः । यदा क्षत्रियस्य किञ्चित् पापं सम्भवति, तदा तस्य सन्ततौ वैश्यसदृशो

---

* "ईश्वरे तोसुन्-कसुनौ"-इति पा० ३. ४. १३ सू० ।

† "चतुर्भिर्धर्मैर्ब्राह्मणं भुनक्ति— अर्चया च, दानेन च, अजेयतया च, अवध्यतया च" -इति शत० ब्रा० ११. ५. ७. १ । 'ज्यानि[illegible]' [illegible] सा० भा० ।

जायते । 'अस्मात्' क्षत्रियात् पापिनोऽन्यः पुत्रः पौत्रो वा वैश्यतां प्राप्तुं समर्थो भवति । स च 'वैश्यतया' वैश्यवृत्त्या करप्रदानादिना जीवितुं प्रवृत्तो भवति ॥

दधिभक्षे दोषमुक्त्वा जलभक्षे दोषमाह—"अथ यद्यपः, शूद्राणां स भक्षः, शूद्रांस्तेन भक्षेण जिन्विष्यसि ; शूद्रकल्पस्ते प्रजाया माजनिष्यते,—अन्यस्य प्रेष्यः कामोत्थाप्यो यथाकामवध्यः ; यदा वै क्षत्रियाय पापं भवति, शूद्रकल्पोऽस्य प्रजाया माजायते, ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा शूद्रता मभ्युपैतोः, स शूद्रतया जिज्यूषितः"–इति । यदि त्वं क्षत्रियस्य ऋत्विक् 'अपः' जलं भक्ष माहरेत्, तदानीं 'सः' जलात्मकः शूद्राणां भक्षः, तेन भक्षेण शूद्रान् प्रीणयिष्यसि । ततस्तव सन्ततौ शूद्रसदृशः पुत्र उत्पद्यते । शूद्रस्य 'अन्यस्य' उत्तमवर्णत्रयस्य 'प्रेष्यः' प्रेषणीयो भृत्यो भवति । तथा 'कामोत्थाप्यः' मध्यरात्रादौ यदा कदाचिद् यदि इच्छा भवति, तदानीमयमुत्थाप्यते । तथा तदीयां 'कामम्' इच्छाम् अनतिक्रम्य 'वध्यः' कुपितेन स्वामिना ताडितो भवति । एते शूद्रगुणाः । क्षत्रियस्य कदाचित् पापे सति शूद्रसमानः पुत्रो जायते । 'अस्मात्' क्षत्रियात् अन्यः पुत्रः पौत्रो वा शूद्रत्वं प्राप्तुं समर्थो भवति । 'सः' पुत्रः शूद्रवृत्त्या दासत्ववृत्त्या जीवितुं प्रवृत्तो भवति ॥ (३) २९ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (२९) ॥

॥ अथ चतुर्थः खण्डः ॥

एते वै ते त्रयो भक्षा॑ राजन्निति होवाच॑ येषा॑माशां नेयात्॑ क्षत्रियो यजमानो॑ ऽथास्यैष स्वो भक्षो॑ न्यग्रोधस्यावरोधांश्च॑ फलानि चौदुम्बराण्याश्वत्थानि॑ प्लाक्षाण्यभिषुणुयात्ता॑नि भक्षयेत्॑ सो ऽस्य स्वो भक्षो॑ यतो वा अधि देवा॑ यज्ञेनेष्ट्वा स्वर्गं लोक मायंस्तत्रैतांश्चमसान् न्युब्जं॑स्ते न्यग्रोधा अभवन्॑ न्युब्जा इति हाप्येनानेतर्ह्याचक्षते॑ कुरुक्षेत्रे॑ ते ह प्रथमजा न्यग्रोधानां॑ तेभ्यो हान्ये ऽधिजाता॑स्ते यन्न्यञ्चो ऽरोहं॑स्तस्मान्न्यङ् रोहति न्यग्रोहो॑ न्यग्रोहो वै नाम॑ तन्न्यग्रोहं सन्तं॑ न्यग्रोध इत्याचक्षते॑ परोक्षेण परोक्षप्रिया इव हि देवाः॑ ॥ (४) ३० ॥

अथ क्षत्रियोचितं भक्षं दर्शयितुं मुक्तानां भक्षाणां क्षत्रियेण हेयतां सङ्गृह्याह— "एते वै ते त्रयो भक्षा राजन्निति होवाच ; येषा माशां नेयात् क्षत्रियो यजमानः"–इति । क्षत्रियो यागं कुर्वन् 'येषां' भक्षाणाम् 'आशाम्' इच्छा मपि 'नेयात्' न प्राप्नुयात् । हे 'राजन्' विश्वन्तर ! ते त्रयोऽपि 'एते' पूर्वं मुक्ताः ॥

उपादेयं भक्षं दर्शयति— "अथास्यैष स्वो भक्षो न्यग्रोधस्यावरोधाश्च फलानि चौदुम्बराण्याश्वत्थानि प्लाक्षाण्यभिषुणुयात् तानि ; भक्षयेत् ; सो ऽस्य स्वो भक्षः"–इति । 'अथ' हेयभक्षकथनानन्तरम् , उपादेयो भक्षः कथ्यत इति शेषः । 'अस्य' राज्ञ एव 'एषः' वक्ष्यमाणः स्वो भक्षः । को ऽसौ ? इति, सोऽभिधीयते — 'न्यग्रोधस्यावरोधाः' शाखाभ्यो ऽवाङ्मुखत्वेन प्ररोहन्तो

आत्मनि क्षत्रं वनस्पतीनां प्रतिष्ठापयति न्यग्रोध इवावरोधैर्भूम्यां प्रति राष्ट्रे तिष्ठत्युग्रं हास्य राष्ट्रमव्यथ्यं भवति य एव मेतं भक्षं भक्षयति क्षत्रियो यजमानः ॥ ५ (३१) ॥

न्यग्रोधवृक्षस्योत्पत्ति मुक्त्वा तदीयाना मवरोधानां फलानां चोत्पत्तिं दर्शयति— "तेषां यच्चमसानां रसो ऽवाङैत्, ते ऽवरोधा अभवन्नथ य ऊर्ध्वस्तानि फलानि"–इति । 'तेषाम्' अधोमुखत्वेनावस्थितानां चमसानां वटवृक्षत्वे सति चमसगतो यो रसः, सः 'अवाङैत्' अधोमुखो ऽगच्छत् । 'ते' रसविशेषाः 'अवरोधाः' अधोमुखत्वेनोत्पन्नाः वटशाखाभ्यो निर्गता मूलविशेषा अभवन् । 'अथ' तद्वैलक्षण्येन यो रस ऊर्ध्वो निरगच्छत्, 'तानि' रसरूपाणि वटफलानि अभवन् ॥

तेषा मेवावरोधानां फलानाञ्च क्षत्रियभक्षत्वेन प्रशंसति— "एष ह वाव क्षत्रियः स्वाद्भक्षान्नैति, यो न्यग्रोधस्यावरोधांश्च फलानि च भक्षयत्युप ह परोक्षेणैव सोमपीथ माप्नोति ; नास्य प्रत्यक्षं भक्षितो भवति ; परोक्ष मिव ह वा एष सोमो राजा यन्न्यग्रोधः, परोक्ष मिवैव ब्रह्मणो रूप मुपनिगच्छति, यत् क्षत्रियः पुरोधयैव दीक्षयैव प्रवरेणैव"–इति । 'यः' पुमान् न्यग्रोधवृक्षस्य 'अवरोधांश्च' अधोमुखानि मूलानि च, तत्फलानि च भक्षयति, एष एव क्षत्रियः स्वोचिताद्भक्षान्नापैति । किञ्चायं क्षत्रियः 'परोक्षेणैव' न्यग्रोधव्यवधानेनैव 'सोमपीथं' सोमपानम् 'उप ह प्राप्नोति' सर्वथा प्राप्नोति । 'अस्य' क्षत्रियस्य 'प्रत्यक्षम्' अव्यवधानं यथा भवति तथा सोमो भक्षितो न भवति ; न्यग्रोधेन व्यव-

हितत्वात् । योऽयं न्यग्रोधः, एष परोक्ष मिव यथा भवति तथा वर्त्तमानः सोमो राजा; योऽयं क्षत्रियोऽस्ति, एषोऽपि ‘परोक्ष मिव’ व्यवधानेनैव ब्राह्मणो भूत्वा ‘रूपं’ तदीयवेषम् उपनिगच्छति ; ‘पुरोधयैव’ पुरोहितद्वारेण, ‘दीक्षयैव’ दीक्षारूपसंस्कारेण च, ‘प्रवरेणैव’ पुरोहितगोत्रेण च, ब्राह्मणस्य सम्पादितत्वादिति शेषः॥

प्रकारान्तरेण न्यग्रोधक्षत्रिययोः साम्य मापाद्य प्रशंसति— “क्षत्रं वा एतद्वनस्पतीनां यन्न्यग्रोधः, क्षत्रं राजन्यो ; नितत इव हीह क्षत्रियो राष्ट्रे वसन् भवति प्रतिष्ठित इव , नितत इव न्यग्रोधो ऽवरोधैर्भूम्यां प्रतिष्ठित इव”-इति । यो न्यग्रोधोऽस्ति, ‘एतत्’ न्यग्रोधस्वरूपं वनस्पतीनां मध्ये क्षत्रियजातिरेव, ‘राजन्यः’ देशाधिपतिरपि ‘क्षत्र’’ मनुष्याणां मध्ये क्षत्रियजातिः । किञ्चायं क्षत्रियः ‘इह राष्ट्रे’ स्वदेशे वसन् ‘नितत इव हि’ तत्तद्ग्रामेषु सञ्चरणेन नितरां सन्तत एव भवति, तथा ‘प्रतिष्ठित इव’ राज्यस्थैर्येण चलनरहित एव भवति ; न्यग्रोधवृक्षोऽपि अधोमुखैः अवरोधैः ‘नितत इव’ नितरां व्याप्त एव भवति, तथा भूम्यां ‘प्रतिष्ठित इव’ स्थिर एव भवति । तस्मादस्त्युभयोः साम्यम् ॥

न्यग्रोधभक्ष मुपसंहरति— “तद्यत् क्षत्रियो यजमानो न्यग्रोधस्यावरोधांश्च फलानि च भक्षयत्यात्मन्येव तत् क्षत्रं वनस्पतीनां प्रतिष्ठापयति , क्षत्र आत्मानम्”-इति । ‘तत्’ तस्मात् न्यग्रोधक्षत्रिययोः सादृश्यसद्भावाद् यः ‘क्षत्रियः’ पुरुषो यागं कुर्वन् न्यग्रोधवृक्षस्यावरोधान् फलानि च भक्षयेत् , तदानीं वनस्पतीनां सम्बन्धि ‘क्षत्रं’ क्षत्रियजातिम् ‘आत्मन्येव’ स्वोदरमध्ये एव प्रतिष्ठापयति ; तथैव ‘आत्मानं’ स्वस्वरूपं वनस्पतिसम्बन्धिनि ‘क्षत्रे’ न्यग्रोधे प्रतिष्ठापयति ॥

उपसंहृतं तं भक्षं पुनरपि प्रशंसति— "क्षत्रे ह वै स आत्मनि क्षत्रं वनस्पतीनां प्रतिष्ठापयति, न्यग्रोध इवावरोधैर्भूम्यां प्रति राष्ट्रे तिष्ठत्युग्रं हास्य राष्ट्रमव्यथ्यं भवति य एवमेतं भक्षं भक्षयति क्षत्रियो यजमानः"–इति । 'यः' क्षत्रियो यागं कुर्वन् 'एतं' न्यग्रोधसम्बन्धिनं भक्षं भक्षयति, स क्षत्रियः स्वयं वनस्पतीनां सम्बन्धिनि 'क्षत्रे' न्यग्रोधे प्रतिष्ठितः सन् 'आत्मनि' स्वस्मिन् वनस्पतीनां सम्बन्धि 'क्षत्रं' न्यग्रोधं प्रतिष्ठापयति; यथा न्यग्रोधोऽवरोधैर्भूम्यां प्रतिष्ठितः, एवमयं राजा राष्ट्रे प्रतितिष्ठति । अस्य राष्ट्रम् 'उग्रं' तेजस्वि सत् 'अव्यथ्यं' केनापि व्यथितुमशक्यं भवति ॥ ५ (३१) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) पञ्चमः खण्डः ॥ ५ (३१) ॥

॥ अथ षष्ठः खण्डः ॥

अथ यदौदुम्बराण्यूर्जो वा एषोऽन्नाद्याद् वनस्पतिरजायत यदुदुम्बरो भौज्यं वा एतद् वनस्पतीनामूर्जमेवास्मिंस्तदन्नाद्यं भौज्यञ्च वनस्पतीनां क्षत्रे दधात्यथ यदाश्वत्थानि तेजसो वा एष वनस्पतिरजायत यदश्वत्थः साम्राज्यं वा एतद् वनस्पतीनां तेज एवास्मिंस्तत्साम्राज्यञ्च वनस्पतीनां क्षत्रे दधा-

त्यथ यत् प्लाक्षाणि यशसो वा एष वनस्पतिरजायत यत् प्लक्षः स्वाराज्यञ्च ह वा एतद् वैराज्यञ्च वनस्पतीनां यश एवास्मिंस्तत् स्वाराज्यवैराज्ये च वनस्पतीनां क्षत्रे दधात्येतान्यस्य पुरस्तादुपक्लृप्तानि भवन्त्यथ सोमं राजानं क्रीणन्ति ते राज्ञ एवावृतोऽवमथातिथिवशैश्चरन्त्यथौपवसथ्य महन्येतान्यध्वर्युः पुरस्तादुपकल्पयेताधिषवणं चर्माधिषवणे फलके द्रोणकलशं दशापवित्रं मद्रीन् पूतभृतं चाधवनीयञ्च स्थाली मुदञ्चनं चमसञ्च तद्यदेतद् राजानं प्रातरभिषुण्वन्ति तदेनानि द्वेधा विगृह्णीयादभ्यन्यानि सुनुयान् माध्यन्दिनायान्यानि परिशिष्यात् ॥ ६ (३२) ॥

न्यग्रोधस्यावरोधान् फलानि च प्रशस्य, औदुम्बरादिप्रशंसां क्रमेण दर्शयति—"अथ यदौदुम्बराण्यूर्जो वा एषो ऽन्नाद्याद् वनस्पतिरजायत यदुदुम्बरो ; भौज्यं वा एतद् वनस्पतीनामूर्ज मेवास्मिंस्तदन्नाद्यं भौज्यञ्च वनस्पतीनां क्षत्रे दधाति"-इति । 'अथ' न्यग्रोधप्रशंसानन्तरम्, उदुम्बरप्रशंसा कथ्यते — 'यद्' यानि 'औदुम्बराणि' फलानि भक्षत्वेनोक्तानि, तेषां सम्पादको यदुम्बरो ऽस्ति, एषः 'ऊर्जः' रसात्, अन्नाद्याच्च वनस्पतिरूपो ऽजायत । 'एतद्' उदुम्बरफलं वनस्पतीनां मध्ये 'भौज्यं वै' भोजनार्ह मेव । 'तत्' तेनौदुम्बरभक्षेण अस्मिन् क्षत्रे 'ऊर्ज मेव' रस मेव तथान्नाद्यं वनस्पतीनां मध्ये भोजनयोग्यं द्रव्य मवस्थापयति ॥

अश्वत्थफलानि प्रशंसति— "अथ यदाश्वत्थानि, तेजसो वा एष वनस्पतिरजायत यदश्वत्थः; साम्राज्यं वा एतद् वनस्पतीनां, तेज एवास्मिंस्तत्साम्राज्यञ्च वनस्पतीनां क्षत्रे दधाति"-इति। 'अथ' औदुम्बरप्रशंसानन्तरम्, अश्वत्थफलानि प्रशस्यन्ते। यान्यश्वत्थफलानि सन्ति, तेषां जनको योऽश्वत्थः, एष वनस्पतिः तेजस एवोदपद्यत। 'एतद्' अश्वत्थफलं वनस्पतीनां सम्बन्धि साम्राज्यस्वरूपमेव; 'तत्' तेन अश्वत्थफलभक्षणेन तेज एव वनस्पतीनां साम्राज्यञ्च अस्मिन् क्षत्रे स्थापयति॥

प्लक्षफलानि प्रशंसति— "अथ यत् प्लाक्षाणि, यशसो वा एष वनस्पतिरजायत यत् प्लक्षः; स्वाराज्यञ्च ह वा एतद् वैराज्यञ्च वनस्पतीनां, यश एवास्मिंस्तत् स्वाराज्यवैराज्ये च वनस्पतीनां क्षत्रे दधाति"-इति। 'अथ' अश्वत्थप्रशंसानन्तरम्, यानि प्लक्षफलानि विद्यन्ते, तानि प्रशस्यन्ते। योऽयं प्लक्षोऽस्ति, एष वनस्पतिः यशस एवोत्पन्नः। 'एतत्' प्लक्षफलं वनस्पतीनां सम्बन्धि स्वाराज्यवैराज्यरूपम्। स्वातन्त्र्येण राजत्वं 'स्वाराज्यं', विशेषेण राजत्वं 'वैराज्यम्'। 'तत्' तेन प्लक्षफलेन 'अस्मिन्' क्षत्रे यशश्च स्वाराज्यवैराज्ये च सम्पादयति॥

भक्षद्रव्यं प्रशस्य तस्य प्रयोगमाह— "एतान्यस्य पुरस्तादुपक्लृप्तानि भवन्त्यथ सोमं राजानं क्रीणन्ति; ते राज्ञ एवावतोपवसथात्प्रतिवेशैश्चरन्त्यथौपवसथ्य महरेतान्यध्वर्युः पुरस्तादुपकल्पयेताधिषवणं चर्माधिषवणे फलके द्रोणकलशं दशापवित्रमद्रीन् पूतभृतं चाधवनीयञ्च स्थालीमुदञ्चनं चमसञ्च; तद्यदेतद् राजानं प्रातरभिषुण्वन्ति, तदेनानि द्वेधा विगृह्णीयादभ्यन्यानि सुनुयान्, माध्यन्दिनायान्यानि परिशिंष्यात्"-इति। 'एतानि' न्यग्रोधा-

वरीषादीनि 'अस्य' राज्ञोऽर्थे सोमक्रयात् पूर्वम् 'उपक्लृप्तानि' सम्पादितानि भवन्ति । तत ऊर्ध्वं सोमक्रयः । ततः 'ते' अध्वर्यु-प्रभृतयः 'राज्ञ एवावृता' सोमस्यैव प्रकारेण उपवसथदिनात् पूर्वं 'प्रतिवेशैः' प्रसिद्धैः क्रियाविशेषैः* 'चरन्ति' अनुतिष्ठेयुः । 'अथ' अनन्तरम्, औपवसथ्य अहः । औपवसथ्ये ऽहनि अध्वर्युः 'पुरस्तात्' प्रथमं 'एतानि' वक्ष्यमाणानि चर्मादीनि 'उपकल्पयेत' सम्पादयेत् । यस्मिंश्चर्मणि सोमो ऽभिषूयते, तत् चर्माभिषवणाख्यम्† । ययोः फलकयोरभिषूयते, ते फलके अधिषवणसञ्ज्ञके‡ । द्रोणकलशं प्रौढं दारुपात्रम्§ । दशापवित्रं वस्त्रम्‖ । अद्रयो ऽभिषे-

---

* "प्रतिवेशं चरेयुः । तस्मादौपवसथ्यात् । गृहमेधीव भवति । तस्य यज्ञो व्यृध्यते" —इति तै० ब्रा० १ ६. ७. १ । प्रातिवेश्यकुलेन पचां [illegible] गच्छतीति प्रतिवेशः, पचार्थं ओदनं । तं दक्षिणार्थं पचन्तः प्रचेयुः"—इत्यादि तद्भाष्ये (तै० ब्रा० १ ६. ८.) । "[illegible] पचति प्रतिवेश ओदनं [illegible] श्रौ० ८. १०. १ । "प्रतिवेशा अपि पचन्ति" —इति च तत्रैव ८. ११. १२ । अत्र तु महानसपाचका प्रतिवेशा विवक्षिताः ।

† "अभिषवणं परिक्रीणं भवति"—इत्यादि शत० ब्रा० ३. ५. ३. २२ । [illegible] सोमः सूयत इत्यधिषवणम् । [illegible] मिति वचनात् गोचर्म"—इत्यादि का० श्रौ० ८. ५. २६ टी० । [illegible] अभिषवणार्थं [illegible] मुद्गरप्रयुक्ता [illegible] आनडुहं [illegible] । तस्य [illegible] अधिषवणफलकयोरुपरि [illegible] तच्चर्म [illegible] तदेवाभिषवणाख्यम् । [illegible] चर्मणि [illegible] सोमं स्थापयेत् । तदेतत् कात्या० श्रौ० ७. ९. २०—३० सूत्रेषु स्फुटम् ।

‡ उपरवाणां सदसि [illegible] अधिषवणफलके उपदधाति । [illegible] सोमो यथा [illegible] ते च [illegible] परिमितदीर्घे भवतः । तद्विस्तरकं वर्णनं कात्या० श्रौ० ८. ४. २४ सू० टी० द्रष्टव्यम् । "अथाधिषवणे फलके उपदधाति"—इत्यादि च शत० ब्रा० ३ ४. ५. २२ ।

§ "द्रोणकलशः—द्रुममयः कलशाकारी वैकङ्कतः ; यस्योपरि [illegible]" —इत्यादि का० श्रौ० ८.७४. या० दे० । [illegible] परिमाणकपूर्वः (रभा० २३०) ।

‖ [illegible] सोमस्य [illegible] भवति ।

चत्वारो ग्रावाणः * । पूतभृदाधवनीयौ पात्रविशेषौ † । स्थाली कुम्भः ‡ । उदञ्चनम् उन्नयनपात्रम् § । चमसा भक्षार्थं दारुपात्रम् ‖ । एतान्यध्वर्युः सम्पाद्य, तत ऊर्ध्वं 'यद्' यदा 'एतत्' एतं राजानं प्रातःकाले अभिषुण्वन्ति, 'तत्' तदानीम् 'एतानि' न्यग्रोधावरोधादीनि द्वेधा विभजेत् । तत्र 'अन्यानि' एकभाग-

---

तत्रैकं यजमानस्यारत्निमात्रम्, तदेव द्रोणकलशे स्थाप्यते ; अथापरं प्रादेशमात्रम्, तदेव परिप्लवायां युज्यते । तदेतद् द्वितीयं मूर्धपवित्रं भवत्युभयतोऽदश मिति दशापवित्रं चोच्यते । का० श्रौ० ९. २. १६, १७ द्रष्टव्यम् ।

* "अथ ग्राव्ण उपावहरति"-इत्यादि शत० ब्रा० ३. ५. ४. २४ । "तस्मिन् ग्राव्णः पञ्च, वैष्णवाः स्थेति (वा० सं० ५. २५.)"-इति कात्या० श्रौ० ८. ५. २८ ।

† पूतभृद् आधवनीयौ— पूतं सोमं बिभर्तीति पूतभृत् । एतत्संज्ञकः पृथुमुखो महाकलशो भवति । आधवनीयस्य तद्रूप एव ; आधूयते प्रक्षाल्यते सोमोऽस्मिन्नित्येव तत्र प्रकृतिप्रत्ययगतोऽर्थविशेषः (का० श्रौ० ९. २. २०.) । यत्र यद्यपि आधवनीयकुम्भस्यैव प्राथम्यम्, तथापि 'अल्पाच्तरं (पूर्वम्)'-इति शब्दानुशासनाद् (पा० सू० २.२.३४,) द्वन्द्वे तस्य परप्रयोगः पूतभृदाधवनीयाविति ।

‡ स्थाल्यश्चतस्रः— 'आग्रयणोक्थ्यादित्यध्रुवाणाम्'-इति का० श्रौ० ९. २. १४ सूत्रव्याख्यायां याज्ञिकदेवः ।

§ उदञ्चनौ— पूतभृताधवनीययोः कुम्भयोः सोमोदकग्रहणसाधनपात्रभूतौ जलभाण्डविशेषौ । का० श्रौ० ९.२.२१ ; ९.६.१५ ; १०.५.१. भाष्याणि द्रष्टव्यानि । 'उदङ्कोऽनुदके'-इति पा० सू० ३. ३. १२३ । 'घृतोदङ्कश्चर्ममयं' भाण्डम् । अनुदके किम् ? उदकोदञ्चनः'-इति तत्र दीक्षितः (सि० कौ०) ।

‖ दश चमसाः— सोमपानपात्राणि । 'चमसो देवपानः'-इति ऋ०सं० १०.१६.८ । 'औदुम्बरेण चमसेन चतुःस्रक्तिना'-इति शत० ब्रा० ७.२.११.२ । 'दश चमसानसमन्तानधः'-इति का० श्रौ० ९.२.२२ । 'अक्रमतः'-इति च मानवसूत्रम् । तथाच मुष्टियुक्तानि । न्यग्रोधरोहितकपर्णान्यतमकाष्ठनिर्मितानि । होतुः, ब्रह्मणः, उद्गातुः, सुन्वतः, प्रशास्तुः, ब्राह्मणाच्छंसिनः, पोतुः, नेष्टुः, आग्नीध्रस्य, अच्छावाकस्येति दश । कात्या० श्रौ० (९.९.२५ ; १२.१३.) भाष्यं द्रष्टव्यम् ।

गतानि 'तस्मिन्' प्रातस्सवने अभिषुणुयात्, इतरभागगतानि तु माध्यन्दिनसवनाय स्थापयेत् ॥ ६ (३२) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) षष्ठः खण्डः ॥ ६ (३२) ॥

॥ अथ सप्तमः खण्डः ॥

तद्यच्चैतां*श्चमसानुन्नयेयुस्तदेतं यजमानचमस मुन्नयेत् तस्मिन् द्वे दर्भतरुणके प्रास्ते† स्यातां तयोर्वषट्कृतेऽन्तःपरिधि पूर्वं प्रास्येद् दधिक्राव्णो अकारिष मित्येतयर्चा सस्वाहा‡कारयानुवषट्कृते परमा दधिक्राः शवसा पञ्चकृष्टीरिति तद्यच्चैतांश्चमसानाहरेयुस्तदेतं यजमानचमस माहरेत् तान्यच्चोद्गृह्णीयुस्तदेन मुपोद्गृह्णीयात् तद्यदेळां होतोपह्वयेत यदा चमसं भक्षयेदथैन मेतया भक्षयेद् यदत्र शिष्टं रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः। इदं तदस्य मनसा शिवेन सोमं राजान मिह भक्ष-

---

* "तद्यम् वैता"—इति क। † "प्राप्ते"—इति ग।

‡ "स: स्वाहा०"—इति क, "सह स्वाहा०"—इति ग।

यामीति शिवो ह वा अस्मा एष वानस्पत्यः शिवेन मनसा भक्षितो भवत्युग्रं हास्य राष्ट्रमव्यथ्यं भवति य एवमेतं भक्षं भक्षयति क्षत्रियो यजमानः शन्न एधि हृदे पीतः प्र ण आयुर्जीवसे सोम तारीरित्यात्मनः प्रत्यभिमर्श ईश्वरो ह वा एषो ऽप्रत्यभिमृष्टो मनुष्यस्यायुः प्रत्यवहर्त्तोरनर्हन् मा भक्षयतीति तद् यदेतेनात्मानमभिमृशत्यायुरेव तत्प्रतिरत आ प्यायस्व समेतु ते सं ते पयांसि समु यन्तु वाजा इति चमसमाप्याययत्यभिरूपाभ्यां यद् यज्ञे ऽभिरूपं तत् समृद्धम् ॥ ७ (३३) ॥

अथास्य फलचमसस्य* उन्नयनादिप्रयोगं दर्शयति— "तद्यत्रैतांश्चमसानुन्नयेयुस्तदेतं यजमानचमसमुन्नयेत्; तस्मिन् द्वे दर्भतरुणके प्रास्ते स्यातां, तयोर्वषट्कृतेऽन्तःपरिधि पूर्वं प्रास्येद्, दधिक्राव्णो अकारिषमित्येतयर्चा सस्वाहाकारयानुवषट्कृते ऽपरमा दधिक्राः शवसा पञ्चकृष्टीरिति"—इति । तत ऊर्ध्वं 'यत्र' यदा 'एतान्' ब्रह्महोत्रादिचमसान् दशसङ्ख्याकानुन्नयेयुः, 'तत्' तदानीं 'यजमानस्य' राज्ञश्चमसम् 'उन्नयेत्' अभिषुतेन न्यग्रोधादिना पूरयेत् । 'तस्मिन्' पूरिते चमसे ऽल्पं दर्भद्वयं प्रक्षिप्य तयोर्मध्ये प्रथमप्रक्षिप्तं दर्भं 'वषट्कृते' वषट्कारे कृते सति "दधिक्राव्णः"—

---

* न्यग्रोधफलान्यङ्कुरांश्चाहृत्य सम्पिष्य चूर्णयित्वा दध्ना मिश्रणं कृत्वा राजन्यवैश्ययोरन्यतरस्य यजमानस्य भक्षणाय चमसनामपात्रे रक्षितो भवति, स एव यजमानचमसः फलचमस इत्युच्यते, तत्र इतरान् सोमचमसाननु उन्नेयो भवति । कात्या० श्रौ० १०, ९, ३०–३२ सूत्रेषु द्रष्टव्यम् ।

इत्येतयर्चा स्वाहाकारसहितया परिधीना मन्तः प्रक्षिपेत् । 'अनुवषट्कृते' अनुवषट्कारे कृते सत्यपरं दर्भम् "आ दधिक्राः"-इत्यनयर्चा पूर्ववत् स्वाहाकारसहितया परिधीना मन्तः प्रक्षिपेत् * ॥

अथास्य फलचमसस्य भक्षणं विधत्ते— "तस्य हैतांश्चमसानाहरेयुस्तदेतं यजमानचमस माहरेत्; तान्यत्रोद्गृह्णीयुस्तदेन मुपोद्गृह्णीयात्; तद्यदिळां होतोपह्वयेत, यदा चमसं भक्षयेदथैन मेतया भक्षयेद्"-इति । ततो होमादूर्ध्वं 'यत्र' यदा 'एतान्' होत्रादीनां चमसान् ऋत्विज आहरेयुः, 'तद्' तदानीम एतं 'यजमानस्य' राजचमस माहरेत् । 'तान्' आहृतान् होत्रादिचमसान् 'यत्र' यदा 'उद्गृह्णीयुः' भक्षणार्थं मूर्ध्वं धारयेयुः, 'तत्' तदानीम् 'एतं' यजमानस्य राजचमसम् 'उपोद्गृह्णीयात्' ऊर्ध्वं धारयेत् । तत ऊर्ध्वं यदा होतेळा मुपह्वयेत, उपहूय च स्वकीयं चमसं यदा भक्षयेत्, 'अथ' तदानीम् 'एनं' यजमानचमसम् 'एतया' वक्ष्यमाणयर्चा राजा भक्षयेत् ॥

ता मृचं पठति— "यदत्र शिष्टं रसिनः सुतस्य, यदिन्द्रो अपिबच्छचीभिः । इदं तदस्य मनसा शिवेन, सोमं राजान मिह भक्षयामीति"-इति । 'रसिनः' रसयुक्तस्य 'सुतस्य' अभिषुतस्य अवरोधादिद्रव्यस्य 'अत्र' पात्रे 'यच्छिष्टं' योऽवशिष्टो भागः, 'यत्' च पात्रस्थं द्रव्य मिन्द्रः 'शचीभिः' कर्मविशेषैः संस्कृत मपिबत् । शचीशब्दः कर्मनामसु पठितः † । 'अस्य' इन्द्रस्य सम्बन्धि

---

* "इतरेषु सोमचमसेषु भक्ष्यमाणेषु एवं फलचमस चमसाध्वर्युरेव कुशतरुणेन चमसाद् गृहीत्वा जुहोति"-इति कात्या० श्रौ० १०, ९, ३२ सू० टी० ।

† निघण्टौ वाङ्नामसु (१. ११.) ४९, कर्मनामसु (२. १.) ६२, प्रज्ञानामसु च (३. ९. ८) ।

‘तदिदं’ शिष्टं ‘शिवेन’ भक्तियुक्ततया मङ्गलेन मनसा ‘इह’ कर्मणि ‘सोमं राजानं’ सोमराजरूपं भावयित्वा भक्षयामि ॥

तदिदं समन्त्रकभक्षणं प्रशंसति — “शिवो ह वा अस्मा एष वानस्पत्यः, शिवेन मनसा भक्षितो भवत्युग्रं हास्य राष्ट्र मव्यथ्यं भवति, य एव मेतं भक्षं भक्षयति क्षत्रियो यजमानः”-इति । ‘यः’ क्षत्रियो यजमानः, ‘एवम्’ उक्तेन प्रकारेण ‘एतं’ फलचमसरूपं भक्षं भक्षयति, ‘अस्मै’ यजमानाय एष ‘वानस्पत्यः’ भक्षः ‘शिवो ह वै’ मङ्गलो हितकारी भूत्वा ‘शिवेन मनसा’ भक्तियुक्तेन मङ्गलेन मनसा भक्षितो भवति । ‘अस्य’ राज्ञो राष्ट्रम् ‘उग्रम्’ शत्रूणा मभिभवनायोग्यरूपं भूत्वा केनापि ‘अव्यथ्य’ व्यथयितु मशक्यं भवति । भयं चलनं वा कदाचिदपि नास्य राष्ट्रस्य भवतीत्यर्थः ॥

भक्षणादूर्ध्वं मन्त्रेण आत्मस्पर्शं विधत्ते— “शं न एधि हृदे पीत, प्र ण आयुर्जीवसे सोम तारीरित्यात्मनः प्रत्यभिमर्शः”-इति । हे ‘सोम’ सोमस्थानीयावरोधादिभक्ष ! अस्माभिः पीतः सन् ‘नः’ अस्माकं हृदये ‘शं एधि’ सुखहेतुर्भव । ‘जीवसे’ चिरजीवनाय ‘नः’ अस्माक मायुः ‘प्रतारीः’ प्रकर्षेण सम्पादय । ‘इति’ अनेन मन्त्रेण ‘आत्मनः’ स्वकीयहृदयस्य ‘प्रत्यभिमर्शः’ हस्तेन सम्पूर्णः स्पर्शः कर्त्तव्यः ॥

अथान्वयव्यतिरेकाभ्या मभिमर्शं प्रशंसति— “ईश्वरो ह वा एषोऽप्रत्यभिमृष्टो मनुष्यस्यायुः प्रत्यवहर्त्तोरनर्हन्मा भक्षयतीति ; तद्यदेतेनात्मान मभिमृशत्यायुरेव तत्प्रतिरते”-इति । ‘एषः’ अवरोधादिभक्षः ‘अप्रत्यभिमृष्टः’ मन्त्रपूर्वकात्मस्पर्शरहितः सन् ‘मनुष्यस्य’ राज्ञः आयुः ‘प्रत्यवहर्त्तोः’ विनाशयितु मीश्वरः समर्थो

भवति । केनाभिप्रायेणेति, सोऽभिधीयते— 'अनर्हन्' भक्षयितुमयोग्यः सन् मां भक्षयतीति तस्य भक्षस्याभिप्रायः । सोऽयं व्यतिरेकः, तदादित्यादिरन्वयः । 'तत्' तदा भक्षणादूर्ध्वं यथा 'एतेन' अग्ने इत्यादिमन्त्रेणाभिमृशति, 'तत्' तेनाभिमर्शनेनायुरेव 'प्रतिरते' प्रकर्षेण वर्धयति ॥

द्वाभ्यामृग्भ्यां तस्य चमसस्य पूरणं विधत्ते— "आ प्यायस्व समेतु ते (ऋ० सं० १.९१.१६.), सं ते पयांसि समु यन्तु वाजा इति (ऋ० सं० १.९१.१८.) चमसमाप्याययत्यभिरूपाभ्यां; यद्यज्ञेऽभिरूपं तत्समृद्धम्"—इति । प्रथमायामृचि आप्यायस्वेति श्रवणाद्, द्वितीयस्यास्तृतीयपादे चाप्यायमानः इति श्रवणादिदं मन्त्रद्वयमाप्यायनस्य 'अभिरूपम्' अनुकूलम् । यज्ञे 'यत्' अङ्गम् 'अभिरूपम्' अनुकूलं क्रियते, 'तत्' अङ्गं 'समृद्धं' सम्पूर्णं भवति ॥ ७ (३३) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) सप्तमः खण्डः ॥ ७ (३३) ॥

॥ अथ अष्टमः खण्डः ॥

तद्यत्रैतांश्चमसान्सादयेयुस्तदेतं यजमानचमसं सादयेत्तान्यत्र प्रकल्पयेयुस्तदेनमनु प्रकल्पयेदथैनमाहुतं भक्षयेन्नराशंसपीतस्य देव सोम

ते मतिविद' ऊमैः पितृभिर्भक्षितस्य भक्षयामीति' प्रातस्सवने नाराशंसो भक्ष' ऊर्वैरिति माध्यन्दिने' काव्यैरिति तृतीयसवन' ऊमा वै पितरः प्रातस्सवन' ऊर्वा माध्यन्दिने' काव्यास्तृतीयसवने' तदेनान् पितॄनेवामृतान्त्सवनभाजः करोति सर्वो हैव सो ऽमृत इति ह स्माह प्रियव्रतः सोमापो' यः कश्च सवनभागित्यमृता ह वा अस्य पितरः' सवनभाजो भवन्त्युग्रं हास्य राष्ट्रमव्यथ्यं' भवति' य एवमेतं भक्षं भक्षयति क्षत्रियो यजमानः समान आत्मनः प्रत्यभिमर्शः' समानमाप्यायनं' चमसस्य' प्रातस्सवनस्यैवावृता प्रातस्सवने चरेयुर्माध्यन्दिनस्य माध्यन्दिने' तृतीयसवनस्य तृतीयसवने' तमेवमेतं भक्षं प्रोवाच' रामो मार्गवेयो' विश्वन्तराय सौषद्मनाय तस्मिन् होवाच प्रोक्ते' सहस्रमु ह ब्राह्मण तुभ्यं दद्मः सश्यापर्णा* उ मे यज्ञ† इत्येतमु हैव प्रोवाच तुरः कावषेयो' जनमेजयाय पारिक्षितायैतमु हैव प्रोचतुः पर्वतनारदौ' सोमकाय साहदेव्याय' सहदेवाय सार्ञ्जयाय‡ बभ्रवे दैवावृधाय' भीमाय वैदर्भाय नग्नजिते

---

* "सः श्यापर्णौ"—इति ङ। † "यज्ञ"—इति ग।

‡ "सार्भयाय"—इति क, "सार्ञ्जयाय"—इति ख, "सार्ञ्जयाय"—इति ग, "साञ्जयाय" इति च, "सार्ञ्जयाय"—इति ज, ञ।

गान्धारायैतमु हैव प्रोवा॑चाग्निः सनश्रुतायारि॑न्दमा॑य क्रतुविदे जानकय॑ एतमु हैव प्रोवा॑च वसिष्ठः सुदासे पैजवना॑य ते ह ते सर्व एव महज्जग्मु॑रेतं भक्षं भक्षयित्वा॑ सर्वे हैव महाराजा आसु॑रादित्य इव ह स्म श्रियां प्रतिष्ठितास्तपन्ति॑ सर्वाभ्यो दिग्भ्यो बलि मावहन्त॑ आदित्य इव ह वै श्रियां प्रतिष्ठितस्तपति॑ सर्वाभ्यो दिग्भ्यो बलि मावहत्यु॑ग्रं हास्य राष्ट्र मव्यथ्यं भवति॑ य एव मेतं भक्षं भक्षयति॑ क्षत्रियो यजमानो यजमा॑नः ॥ ८ (३४) ॥

॥ इत्यैतरेयब्राह्मणे सप्तमपञ्चिकायां पञ्चमोऽध्यायः ॥ ५ ॥

भक्षिताप्यायितस्य नाराशंसमङ्गस्य चमसस्य* प्रयोगं विधत्ते— "तद्यत्रैतांश्चमसानुत्सादयेयुस्तदेतं यजमानचमसं सादयेत्; तान्यत्र प्रकम्पयेयुस्तदेन मनु प्रकम्पयेदथैन माहृतं भक्षयेन्नाराशंसपीतस्य देव सोम ते मतिविद ऊमैः पितृभिर्भक्षितस्य भक्षयामीति प्रातःसवने नाराशंसो भक्ष, ऊर्वैरिति माध्यन्दिने, काव्यैरिति तृतीयसवने"-इति । 'तत्' तस्मादाप्यायनात् ऊर्ध्वं 'यत्र' यदा 'एतान्' होत्रादीनां चमसानाप्यायितान् सादयेयुः, तदानी मेतं 'यजमानस्य' राजचमसं सादयेत् । 'तान्' होत्रादीनां चमसान् यदा प्रकम्पयेयुः, तदैव 'एनम्' राजचमस मनु प्रकम्पयेत् । 'अथ'

---

* "आप्यायिताश्चमसान् सादयन्ति, ते नाराशंसा भवन्ति"—इति आश्व० श्रौ० ४. ५. ६. २० । 'हुतशिष्टा भक्षिता आप्यायिताश्चमसा नाराशंसाः'-इति सा० भा० (शा० ब्रा० १२. १६ ; तै० ब्रा० २. ७) ।

अनन्तर मितं चमसं भक्षणार्थं माहृतं नराशंसेत्यादिमन्त्रेण भक्षयेत्। हे सोमभक्ष्य फलचमस देव! 'नराशंसपीतस्य' नरा मनुष्या ऋभुप्रमुखाः शंसन्ति यस्मिन् सवनविशेषे सोऽयं नराशंसः, तत्र देवैः पीतस्य, ऊमनामभिः पितृभिश्च भक्षितस्य, 'मतिविदः' अस्मदभिप्रायाभिज्ञस्य ते भक्षयामि 'इति' अनेन मन्त्रेण प्रातस्सवने नराशंसचमससम्बन्धी भक्षः कर्त्तव्यः। इतरयोस्तु सवनयोस्तस्मिन् मन्त्रे 'ऊमैरिति' अस्य पदस्य स्थाने 'ऊर्वैः'–'काव्यैः'–इति पदद्वयं क्रमेण पठनीयम् ॥

त्रिविधं मन्त्रतात्पर्यं दर्शयति— "ऊमा वै पितरः प्रातस्सवन, ऊर्वा माध्यन्दिने, काव्यास्तृतीयसवने, तदेतत् पितॄनेवामृतान्त्सवनभाजः करोति"–इति। ऊमा, ऊर्वाः, काव्याः,–इत्येते सवनत्रयगताः पितृविशेषाः; अतस्तच्छब्दप्रयोगेण तान् पितॄन् सवनभाजः करोति। पितरश्च द्विविधाः; मृता अमृताश्च। इदानीं मनुष्याः सन्तो मरणादूर्द्ध्वं पितृलोकं प्राप्ताः 'मृताः', सृष्टिमारभ्य पितृलोकेऽवस्थिताः 'अमृताः'; ऊमादयस्तथाविधत्वादमृतशब्देन विशेष्यते ॥

अथ मन्त्रतात्पर्ये मतान्तरं दर्शयति— "सर्वो हैव सोऽमृत इति ह स्माह प्रियव्रतः सोमापो यः कश्च सवनभागिति"–इति। न केवल मूमादय एव पितरः प्रसिद्धा अमृताः, किन्तु यः कोऽपि पीत्वा सवनभाग् भवति, स सर्वोऽप्यूमादिशब्दैरुपलक्षितत्वादमृत एव भवतीति* 'सोमापः' सोमपः प्रियव्रताख्यो महर्षिराह स्म ॥

इदानीं नराशंसचमसभक्षं प्रशंसति— "अमृता ह वा अस्य

---

* तथाहि— "भक्षयित्वाऽपाम सोम ममृता अभूम, शन्नो भव हृद आपीत इन्दविति मुखहृदये अभिमृशेरन्"–इति आप॰ श्रौ॰ ५, ६, २९ ।

पितरः सवनभाजो भवन्त्युप हास्य राष्ट्र मव्यथ्यं भवति , य एव मेतं भक्षं भक्षयति क्षत्रियो यजमानः"-इति । 'अस्य' राज्ञो भक्षयितुः 'पितरः' पितृपितामहादयः सर्वेऽपि सवनभाजः सन्तः 'अमृताः' मरणरहिता देवा भवन्ति । उप मित्यादि पूर्ववत् (१५८पृ०) । यन्न इत्यादिमन्त्रेण स्वदेहस्पर्शनम्, आ प्यायस्वेतिमन्त्रद्वयेन (१५६पृ०) चमसपूरणञ्च ॥

प्रातस्सवने यदुक्तं तदुत्तरयोः सवनयोरतिदिशति — "समान आत्मनः प्रत्यभिमर्शः , समान माप्यायनं चमसस्य"-इति ॥

फलचमसे विद्यमानं प्रयोगविशेष मभिधाय 'अतिशिष्ट' सोमचमसगतं प्रयोगं सवनत्रयेऽप्यतिदिशति — "प्रातस्सवनस्यैवाकृता प्रातस्सवनं चरेयुर् , माध्यन्दिनस्य माध्यन्दिनं , तृतीयसवनस्य तृतीयसवनं" इति । सोमविषयस्य प्रातस्सवनस्यैव 'आकृता' प्रकारेण फलचमसविषयप्रातस्सवने 'चरेयुः' अनुतिष्ठेयुः । एव मित्यादि योज्यम् ।

उक्तं फलचमसभक्ष मुपसंहरति— "तं हैत मेतं भक्षं प्रोवाच रामो मार्गवेयो विश्वन्तराय सौषद्मनाय"-इति ।

अथ विश्वन्तरस्य वाक्यं दर्शयति— "तस्मिन् ह्योवाच प्रोक्ते सहस्र मु ह ब्राह्मण तुभ्यं दद्मः सश्यापर्ण उ मे यज्ञ इति"-इति । 'तस्मिन्' राजभक्षे रामेण 'प्रोक्ते' सति स राजा रामं प्रत्येव मुवाच— हे 'ब्राह्मण' राम ! तुभ्यं वयं 'सहस्र मु ह' गवां सहस्रं सम्पूर्णं दद्मः । पुरा मे यज्ञो विश्यापर्ण आसीत् *, इदानीं तु 'सश्यापर्णः' एवास्तु ; भवदीयाः श्यापर्णनामकाः सर्वे ब्राह्मणाः अस्मिन् यज्ञे वसन्त्विति ॥

---

* तदुक्तं पुरस्तात् — "विश्यापर्णं यज्ञ माहरत"-इति १३१ पृ० ।

इदानीं सम्प्रदायकथनेन भक्षं प्रशंसति— "एत मु हैव प्रोवाच तुरः कावषेयो जनमेजयाय पारिक्षिताय; एत मु हैव प्रोचतुः पर्वतनारदौ सोमकाय साहदेव्याय, सहदेवाय सार्ञ्जयाय, बभ्रवे दैवावृधाय, भीमाय वैदर्भाय, नग्नजिते गान्धाराय ; एत मु हैव प्रोवाचाग्निः सनश्रुतायारिन्दमाय, क्रतुविदे जानकये ; एत मु हैव प्रोवाच वसिष्ठः सुदासे पैजवनाय ; ते ह ते सर्वे एव महज्जग्मुरेतं भक्षं भक्षयित्वा सर्वे हैव महाराजा आसुरादित्य इव ह स्म श्रियां प्रतिष्ठितास्तपन्ति, सर्वाभ्यो दिग्भ्यो बलि मावहन्ते"— इति । 'एतं' पूर्वोक्त मेव भक्षं कवषस्य पुत्रस्तुरो नाम महर्षिः, परिक्षित्पुत्राय जनमेजयसञ्ज्ञकाय प्रोवाच । अय मेकः सम्प्रदायः । तथैव 'एतं' भक्षं पर्वतनारदाख्यावृषी सहदेवस्य पुत्राय सोमकाय प्रोचतुः । सोमकश्चान्यस्मै सहदेवाय प्रोवाच । सहदेवश्च सार्ञ्जयाय प्रोवाच । सार्ञ्जयश्च बभ्रवे प्रोवाच । बभ्रुश्च देवावृधाय प्रोवाच । देवावृधश्च भीमाय प्रोवाच । भीमश्च वैदर्भाय प्रोवाच । वैदर्भश्च नग्नजिते प्रोवाच । नग्नजिच्च गान्धाराय प्रोवाच । अयं द्वितीयः सम्प्रदायः । तथा 'एतम्' एव भक्षं अग्निनामको महर्षिः सनश्रुताय प्रोवाच । सनश्रुतश्चारिन्दमाय प्रोवाच । अरिन्दमश्च क्रतुविदे प्रोवाच । क्रतुविच्च जानकये प्रोवाच । अयं तृतीयः सम्प्रदायः । अथ 'एतम्' एव भक्षं वसिष्ठो महर्षिः सुदासे महर्षये प्रोवाच । सुष्ठु धर्मं दासतीति सुदाः, अथवा सुष्ठु शत्रून् दस्यत्युपक्षयतीति सुदाः । स च पैजवनाय प्रोवाच । यद्वा* सहदेवाय सार्ञ्जयायेत्यादिषु वाक्येषु सहदेवादिनाम्नां सार्ञ्जयादि-

---

* सुदाएव पैजवनोऽत्र प्रसिद्धः । तथाहि— ऋ० सं० ७.१८.२२–२५ ऋक्षु 'सुदासः पैजवनस्य'–इति । "विश्वामित्र ऋषिः सुदासः पैजवनस्य पुरोहितः"–इत्यादिर्निरुक्तवचनञ्च

पदानि विशेषणतया योज्यानि । द्वितीयस्तच्छब्द एतच्छब्दार्थः । 'ते ह' एते तुरादयः पैजवनान्ताः सर्व एव पुरुषाः 'एतं' फलचमसभक्षं भक्षयित्वा 'महज्जग्मुः' महत्त्वं प्राप्ताः । महत्त्वस्यैव सर्वं इत्यादिकं विवरणम् । सर्वेऽप्येते 'महाराजाः' सार्वभौमाः आसन् । यथा आदित्यो द्युलोके प्रतिष्ठितस्तपति, एव मेते 'श्रियां' गजाश्वादिकायां सम्पदि प्रतिष्ठिताः सन्तः 'तपन्ति' शत्रूणां तापं कुर्वन्ति । तथा 'सर्वाभ्यो दिग्भ्यः' सर्वदिगवस्थितेभ्यो राजभ्यः सकाशाद् 'बलि मावहन्ते' कर माददानाः स्वामिनो भवन्ति ॥

नराशंसभक्षं पुनरपि फलकथनेन प्रशंसति— "आदित्य इव ह वै श्रियां प्रतिष्ठितस्तपति, सर्वाभ्यो दिग्भ्यो बलि मावहत्युग्रं हास्य राष्ट्र मव्यथ्यं भवति य एव मेतं भक्षं भक्षयति क्षत्रियो यजमानो यजमानः"-इति । पूर्ववद् व्याख्येयम् । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ८ (३४) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायां पञ्चमाध्याये
(पञ्चत्रिंशाध्याये) अष्टमः खण्डः ॥ ८ (३४) ॥

(२.७.२.) । अत एव पूर्वोक्तस्य 'महदैनस आर्षकाय'-इत्यादि व्याख्यानस्यायुक्तत्व मनुभूय सुयुक्तं व्याख्यानं वसुः प्रक्रमते यदेति । महदैनस्य अप्रत्यापन्नत्वेन आर्षेयत्वम्, नग्नजितश्च अश्वादर्शिप्रापितत्वेन गान्धारत्वं शतपथे प्रसिद्धम् (२, ४, ४, ४ ; ८, १, ४, १०) । एव मन्येऽपि तत्तद्विशेषणमिदानामन्वेष्टव्यानि ।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'-नामभाष्ये
ऐतरेयब्राह्मणस्य सप्तमपञ्चिकायाः पञ्चमोऽध्यायः ॥

अथातः पशोरेकः(१) । तदाहुर्य आहिताग्निरेकादश(२) । हरिश्चन्द्रः षट्(३) । प्रजापतिर्यज्ञमष्टौ(४) । विश्वन्तरोऽष्टौ(५) ॥ ७ * ॥

अथातः पशोस्, तदाहुर्यद्दर्शपूर्णमासयोर्, अथात इष्टापूर्त्तस्य, तेषां यज्ञमसानां चत्वारि॥७†॥

॥ इति सप्तमपञ्चिका समाप्ता ॥

---

* १, ९, ५९, १०३, १३१ पृ० (१—११—६—८—८=३४ ख०) ।

† १, ४७, ११०, १४४ पृ० (१०—१०—१०—४=३४ख० । १भा० २२९९पृ० द्र०।

॥ ऐतरेयब्राह्मणम् ॥

॥ अथाष्टमपञ्चिका ॥

(८म)

॥ प्रथमाध्यायस्य प्रथमः खण्डः ॥

॥ ॐ ॥ अथात * स्तुतशस्त्रयोरेवैकाहिकं प्रातस्सवन मैकाहिकं तृतीयसवन मेते वै शान्ते क्लृप्ते प्रतिष्ठिते सवने यदैकाहिके शान्त्यै क्लृप्त्यै प्रतिष्ठित्या अप्रच्युत्या उक्थो माध्यन्दिनः पवमानो य उभयसाम्नो बृहत्पृष्ठस्योभे हि सामनी क्रियेते आ त्वा रथं यथोतय इदं वसो सुत मन्ध इति राथन्तरी प्रतिपद् राथन्तरो ऽनुचरः पवमानोक्थं वा एतद् यन्मरुत्वतीयं पवमाने वा अत्र रथन्तरं कुर्वन्ति बृहत्पृष्ठं सवीवधतायै तदिदं रथन्तरं स्तुत माभ्यां प्रतिपदनुचराभ्या मनुशंसत्यथो ब्रह्म वै रथन्तरं क्षत्रं बृहद् ब्रह्म खलु वै क्षत्रात् पूर्वं ब्रह्मपुरस्तान् म उग्रं राष्ट्र मव्यथ्य मसदित्यथान्नं वै रथन्तर मन्न मेवास्मै तत् पुरस्तात् कल्पयत्यथेयं वै पृथिवी रथन्तर मियं खलु वै

---

* "अथातः"—इति सविसर्गः क, ज।

प्रतिष्ठां॑ प्रतिष्ठा मेवास्मै तत् पुरस्तात् कल्पयति॑ समान इन्द्रनिहवो ऽविभक्तः॑ सो ऽह्ना मुद्वान् ब्राह्मणस्पत्य॑ उभयसाम्नो रूपं॑ मुभे हि सामनी क्रियेते॑ समान्यो धाय्या अविभक्तास्ता॑ अह्ना मैकाहिको मरुत्वतीयः प्रगाथः॑ ॥ १ ॥

॥ श्रीगणेशाय नमः ॥

फलाख्यचमसो भक्षो राज्ञो यज्ञे प्रकीर्त्तितः ।
उच्यते राजयज्ञेऽस्मिन् विशेषः स्तोत्रशस्त्रयोः ॥

तदेतत् प्रतिजानीते— "अथात स्तुतशस्त्रयोरेव"–इति । 'अथ' राज्ञो यज्ञे भक्षविशेषकथनानन्तरम्, यतः स्तुतशस्त्रयोर्विशेषो जिज्ञासितः, 'अतः' कारणात् तयोरेव, विशेष उच्यत इति शेषः ॥

तं विशेषं वक्तु मादौ विशेषरहित मंशं दर्शयति— "ऐकाहिकं प्रातस्सवन मैकाहिकं तृतीयसवन मेते वै शान्ते कॢप्ते प्रतिष्ठिते सवने यदैकाहिके, शान्त्यै कॢप्त्यै प्रतिष्ठित्या अप्रच्युत्यै"–इति । एकाहे प्रकृतिरूपे * यत् प्रातस्सवनं यच्च तृतीयसवनमुक्तम्†, तदुभयं राज्ञो विकृतावपि तथैव प्रयोक्तव्यम् ; न तु तयोः कश्चिद् विशेषोऽस्ति । ऐकाहिके ये उभे प्रातस्सवन–तृतीयसवने, ते 'एते' एव 'शान्ते' सुखकरे 'कॢप्ते' स्वभ्यस्ते 'प्रतिष्ठिते' सम्पन्ने ; अतस्तयोः प्रकृतिवदनुष्ठानं 'शान्त्यै' सुखार्थं, 'कॢप्त्यै' स्वभ्यासार्थं, 'प्रतिष्ठित्यै' सम्पत्त्यर्थम् , 'अप्रच्युत्यै' विनाशराहित्यार्थं च भवति ॥

---

* ३भा० २४८पृ० द्र० ।

† १भा० ३४१पृ०—२भा० ५०पृ०, २भा० ११५—१८०पृ० द्र० ।

यथा प्रातस्सवन-तृतीयसवनयोः प्राकृताद् विशेषो नास्ति, तथा माध्यन्दिनसवनेऽपि मरुत्वतीय मैकाहिकं होत्रकशस्त्राणि चैकाहिकानि * ; स्तोत्रे तु विशेषोऽस्ति, त मिमं दर्शयति—"उभौ माध्यन्दिनः पवमानो य उभयसाम्नो बृहत्पृष्ठस्योभे हि सामनी क्रियेते"—इति। बृहद्रथन्तरं चेत्युभयविधं साम यस्मिन् अभिजिदादौ सोऽय मुभयसामा ; बृहत्साम पृष्ठस्तोत्रं यस्मिन् अभिजिदादौ सोऽयं 'बृहत्पृष्ठः'। तादृशस्य 'उभयसाम्नो बृहत्पृष्ठस्य' अभिजिदादेर्यो माध्यन्दिनः पवमान उक्तः †, स एवात्र राजयज्ञे माध्यन्दिनः पवमानो द्रष्टव्यः। न चोभयसामत्वं बृहत्पृष्ठत्वं चोभयं व्याहत मिति शङ्कनीयम्; माध्यन्दिनपवमानस्तोत्रे रथन्तरं साम, पृष्ठस्तोत्रे बृहत्सामेत्येव मुभयसामत्वस्य व्यवस्थितत्वात्। 'उभे हि'—इत्यनेनेय मेव व्यवस्था स्पष्टीक्रियते ॥

(यद्यपि मरुत्वतीयशस्त्रावयवाः प्रतिपदादयः प्राकृता एव, तथापि तदनुवादेनात्र प्रशंसा क्रियते ‡) तत्र प्रतिपदनुचरौ दर्शयति—"आ त्वा रथं यथोतय, इदं वसो सुत मन्ध इति राथन्तरी प्रतिपद्, राथन्तरो ऽनुचरः; पवमानोक्थं वा एतद् यन् मरुत्वतीयम्; पवमाने वा अत्र रथन्तरं कुर्वन्ति, बृहत्पृष्ठं, सवीवधतायै; तदिदं रथन्तरं स्तुत माभ्यां प्रतिपदनुचराभ्या मनुशंसति"—इति। "आ त्वा रथम्"—इति (ऋ० सं० ८. ६८. १.) यस्तृचः, सोऽयं मरुत्वतीयशस्त्रस्य प्रतिपत् §। अस्मिंस्तृचे रथन्तरं साम उद्गातृभिर्गीयते, तस्मादियं प्रतिपद् 'राथन्तरी'। "इदं वसो सुतम्"—इत्ययं (ऋ० सं० ८.२.१.)

---

* २भा० ५१—११४पृ० द्र०।

† २भा० ६१पृ० द्र०।

‡ बन्धनीचिह्नान्तर्गतग्रन्थो ख-पुस्तके नास्ति।

§ २भा० ६५,६६पृ० द्र०।

तृचो ऽनुचरः ; छन्दोदेवतादिना पूर्वेण समानत्वात् * । रथन्तरसामाधारस्य पूर्वस्य तृचस्य अनुसारित्वादस्यापि रथन्तरत्वम् । यत् मरुत्वतीयं शस्त्र मस्ति, एतत् 'पवमानोक्थं वै' पवमानस्तोत्रानुसारेण शस्यमानत्वात् । 'उक्थं' शस्त्रम्, तद् द्विविधं पवमानोक्थं पृष्ठोक्थञ्च; अतोऽत्र पवमानोक्थ मिति विशेष्यते । अस्मिंश्च माध्यन्दिनपवमानस्तोत्रे सामगा रथन्तरं साम कुर्वन्ति, पृष्ठस्तोत्रन्तु बृहत्सामोपेतं कुर्वन्ति, तदेतदुभयं 'सवीवधतायै' सम्पद्यते । उभयतः शिक्यद्वयेन जलकुम्भद्वयं वोढुं यः काष्ठविशेषः पुरुषाणा मंसे ध्रियते, स वीवध इत्युच्यते । सामद्वयोपेतस्य माध्यन्दिनसवनप्रयोगस्य वीवधसदृशत्वाद् वीवधेन सह वर्त्तत इति सवीवधत्वम् † । यदि रथन्तरं साम माध्यन्दिने पवमाने स्तुतम्, तदिदम् 'आभ्याम्' "आ त्वा रथम्"- "इदं वसो सुतम्"-इत्येताभ्यां प्रतिपदनुचराभ्या मनुशंसेत् ॥

ब्रह्मान्नपृथिवीरूपत्वेन रथन्तरं प्रशंसति— "अथो ब्रह्म वै रथन्तरं, क्षत्रं बृहद्; ब्रह्म खलु वै क्षत्रात् पूर्वं, ब्रह्मपुरस्तान् म उग्रं राष्ट्र मव्यथ्य मसदित्यथान्नं वै रथन्तर मन्न मेवास्मै तत् पुरस्तात् कल्पयत्यथेयं वै पृथिवी रथन्तर मियं खलु वै प्रतिष्ठा, प्रतिष्ठा मेवास्मै तत् पुरस्तात् कल्पयति"-इति । यद् 'रथन्तरं' साम, तद् ब्राह्मणजातिस्वरूपम्; उभयोः प्रजापतिमुखजत्वात् ।

---

* २भा० ६७पृ० द्र० ।

† 'विवधवीवधशब्दौ उभयतोबद्धशिक्ये स्कन्धवाह्ये काष्ठे वर्त्तेते'-इति सि० कौ० (पा० ४.४.१७ सू०) । ता० ब्रा० ४.५.१९ ; १४.१.१० । आश्व० श्र० ९.१२.९ । विवध इति इत्यादिपाठस्तैत्तिरीयाणाम् ७.३.५.४ ; ०.६ । विवध इति पर्य्यंमध्यपाठोऽपि क्वाचित्कः ।

तथा 'बृहत्'साम-क्षत्रियजात्योः प्रजापतिबाहुजत्वसाम्यादेकत्वम् । ब्राह्मणजातिः क्षत्रियजातेः पूर्वभाविनी, अतो बृहत्सामसाध्यात् पृष्ठस्तोत्रात् पूर्वं रथन्तरसामसाध्यस्य पवमानस्तोत्रस्य अनुष्ठाने ऽय मभिप्रायः । 'ब्रह्म' ब्राह्मणजातिः 'पुरस्तात्' पूर्वकाले यस्य राष्ट्रस्य, तदिदं 'ब्रह्मपुरस्तात्' 'मे' राज्ञो राष्ट्रम् उग्र मव्यथ्यम् 'असद्' भवेदित्यभिप्रायः * । किञ्च ब्रह्महेतुत्वाद् 'रथन्तर' साम ब्रह्मात्मकम् ; 'तत्' तेन रथन्तरप्रयोगेण 'अस्मै' राज्ञे ब्रह्म मेव 'पुरस्तात् कल्पयति' प्रथमतः सम्पादयति । किञ्चेदं 'रथन्तर' साम 'इयं पृथिवी' भूमिस्वरूप मेव ; इयञ्च भूमिः प्राणिनां 'प्रतिष्ठा' आधारः ; 'तत्' तेन रथन्तरप्रयोगेण 'अस्मै' यजमानाय राज्ञे प्रतिष्ठा मेव कल्पयति ॥

"इन्द्र नेदीय एदिहि"-"उत्तिष्ठ ब्रह्मणस्पते"-इत्येतौ प्रगाथद्वयं (ऋ० सं० ८. ५३. ५. ६ ; १. ४०. १-२.) प्रशंसति—"समान इन्द्रनिहवो ऽविभक्तः ; सोऽह्ना बृहान् , ब्राह्मणस्पत्य उभयसाम्नो रूप मुभे हि सामनी क्रियेते"-इति । इन्द्रो नितरा माहूयते यस्मिन् प्रगाथे, सोऽत्र च प्रकृतौ च 'समानः' एक एव । तस्यैवेदं व्याख्यानम् 'अविभक्तः'-इति , अविकृत इत्यर्थः † । 'सः' च प्रगाथः 'अह्ना', रूप मिति शेषः । अहःप्रयोगस्य निष्पादकत्वात् तद्रूपत्वम् । यः प्रगाथः 'बृहान्' उच्चशब्दवान् 'ब्राह्मणस्पत्यः' ब्रह्मणस्पतिदेवताकश्च ; "उत्तिष्ठ ब्रह्मणस्पते"-इत्येवं श्रुतत्वात् । सोऽपि प्रशंसनीयः । किञ्चासौ प्रगाथ उभयसाम्नो रूपम् ; 'हि' यस्मात् 'उभे' बृहद्-रथन्तरे सामनी, तस्मिन् प्रगाथे सामगैर्गीयेते ‡ ॥

---

* ता० ब्रा० ११. १. २—४ द० । † सभा० ६७--३६१० पृ० ।

‡ 'सामगैरभिधीयते'-इति ख ।

धाय्याना मृचां प्रकृतौ विकृतौ चैकत्व माह—"समान्यो धाय्या अविभक्तास्ता अह्नाम्"—इति । 'समान्यः'—इत्यस्य व्याख्यानम् 'अविभक्ताः'—इति । ताश्चाहर्विशेषनिष्पादकत्वात् तत्स्वरूपाः * ॥

"प्र व इन्द्राय बृहते"—इत्यस्य (ऋ० सं० ८. ८९. ३, ४.) मरुत्वतीयप्रगाथस्य प्रकृतिविकृत्योरेकत्वं दर्शयति—"ऐकाहिको मरुत्वतीयः प्रगाथः"—इति † ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां प्रथमाध्याये
(षट्त्रिंशाध्याये) प्रथमः खण्डः ॥ १ ॥

॥ अथ द्वितीयः खण्डः ॥

जनिष्ठा उग्रः सहसे तुरायेति सूक्त॑ मुग्रवत् सहस्वत्तत्॑ क्षत्रस्य रूपं॑ मन्द्र ओजिष्ठ इत्योजस्व॑त्तत्क्षत्रस्य रूपं॑ बहुलाभिमान इत्य॑भिवदभिभूत्यै रूपं॑ तदेकादशर्चं भव॑त्येकादशाक्षरा वै त्रिष्टुप्॑ त्रैष्टुभो वै राजन्य॑ ओजो वा इन्द्रियं॑ वीर्यं त्रिष्टु॑बोजः क्षत्रं वीर्यं राजन्य॑स्तदेन मोजसा क्षत्रेण वीर्येण समर्द्धयति॑ तद्गौरिवीतं भव॑त्येतद् वै मरुत्वतीयं॑ समृद्धं यद्गौरिवीतं॑

---

* १भा० ७९—८२पृ० द्र० ।

† १भा० ८३पृ० द्र० ।

तस्योक्तं ब्राह्मणं॑ त्वा मिद्धि हवामह इति॑ बृहत्पृष्ठं भवति॑ क्षत्रं वै बृहत्॑ क्षत्रेणैव तत् क्षत्रं समर्द्धयत्य॑थो क्षत्रं वै बृहदात्मा॑ यजमानस्य निष्केवल्यं॑ तद्यद् बृहत्पृष्ठं भवति॑ क्षत्रं वै बृहत्॑ क्षत्रेणैवैनं तत्समर्द्धयत्य॑थो ज्यैष्ठ्यं वै बृहज्ज्यैष्ठ्येनैवैनं॑ तत्समर्द्धयत्य॑थो श्रैष्ठ्यं वै बृहच्छ्रैष्ठ्येनैवैनं॑ तत्समर्द्धयत्य॑भि त्वा शूर नोनुम इति॑ रथन्तर मनुरूपं कुर्वन्त्ययं॑ वै लोको रथन्तर॑ मसौ लोको बृहदस्य वै लोकस्यासौ लोको ऽनुरूपो॑ ऽमुष्य लोकस्यायं॑ लोकोऽनुरूपस्तद्यद् रथन्तर मनुरूपं कुर्वन्त्युभावेव तल्लोकौ॑ यजमानाय सम्भोगिनौ कुर्वन्त्यथो ब्रह्म वै रथन्तरं॑ क्षत्रं बृहद्॑ ब्रह्मणि खलु वै क्षत्रं॑ प्रतिष्ठितं॑ क्षत्रे ब्रह्माथो साम्न एव सयोनितायै॑ यद्वावानेति धाय्या॑ तस्या उक्तं ब्राह्मण मुभयं॑ शृणवच्चन इति सामप्रगाथ उभयसाम्नो रूप मुभे हि सामनी क्रियेते ॥ २ ॥

मरुत्वतीये शस्त्रे निविद्धानीयं॑ सूक्तं प्रशंसति— "जनिष्ठा उग्रः सहसे तुरायेति सूक्त मुग्रवत्सहस्वत्तत्क्षत्रस्य रूपं, मन्द्र ओजिष्ठ इत्योजस्वत्तत् क्षत्रस्य रूपं, बहुलाभिमान इत्यभिवदभिभूत्यै रूपं; तदेकादशर्चं भवत्येकादशाक्षरा वै त्रिष्टुप्, त्रैष्टुभो वै राजन्य, ओजो वा इन्द्रियं वीर्यं त्रिष्टुबोजः क्षत्रं वीर्यं राजन्यस्तदेन मोजसा क्षत्रेण वीर्येण समर्द्धयति; तद्गौरिवीतं भवत्येतद्वै मरुत्वतीयं

[illegible] यद्गौरिवीतं, तस्योक्तं ब्राह्मणम्”-इति । “जनिष्ठाः”-इत्यस्मिन् पादे* उग्रशब्द सहःशब्दयोर्विद्यमानत्वात् तदेतत् सूक्तम् ‘उग्रवत्सहस्वत्’ । तच्चोभयं क्षत्रियजातेः स्वरूपम्; क्षत्रियोऽपि क्रूरो बलवांश्च । द्वितीयपादस्य * पूर्वभागे “मन्द्र ओजिष्ठः”-इतिश्रुतत्वात् सूक्तम् ‘ओजस्वत्’ ओजःशब्दोपेतम् । ओजो नाम बलहेतुरष्टमो धातुः ; तस्य च धातोः क्षत्रिये सम्पूर्णत्वाद् ओजःशब्दोपेतं सूक्तं क्षत्रियस्य स्वरूपम् । तदुत्तरभागे * “बहुलाभिमानः”-इतिश्रुतत्वात् ‘अभिवत्’ अभिशब्दोपेतम् । तच्च ‘अभिभूत्यै’ शत्रूणा मभिभवस्य स्वरूपम् । किञ्च ‘तत्’ सूक्त मेकादशर्चं भवति †, त्रिष्टुप् चैकादशाक्षरा:, राजन्यश्च त्रिष्टुप्सम्बन्धी ; तयोरुभयोः प्रजापतिबाहुजत्वात् । किञ्चेयं त्रिष्टुबोजःप्रभृतीनां हेतुत्वात् तत्स्वरूपम् । ओजो बलहेतुरष्टमो धातुः, वीर्यं शरीरादिबलम्, इन्द्रियं चक्षुरादिपाटवम् ; राजन्यश्चौजःप्रभृतीनां स्वरूपभूतः । तत्रौजः पूर्व मेवोक्तम्, ‘क्षत्रं’ क्षत्रियजातियुक्तत्वम्, ‘वीर्यं’ शरीरादिबलम् । एवञ्च राजयज्ञे ‘तत्’ तेन त्रिष्टुप्छन्दस्कसूक्तपाठेन ‘एनं’ राजानं ओजःक्षत्रवीर्यैः समृद्धं करोति । किञ्च ‘एतत्’ सूक्तं गौरिवीत्याख्येन महर्षिणा दृष्टत्वात् गौरीवीताख्यं भवति ‡ । यस्मादेतद् गौरिवीतं, तस्मात् ‘एतत्’ मरुत्वतीयं शस्त्रं ‘समृद्धं’ सम्पूर्णं भवति । ‘तस्य’ च गौरिवीतनाम्नः सूक्तस्य ‘ब्राह्मणं’ “तद्वा एतद् यजमानजननम्”-इत्यादिना पूर्व मेवोक्तम् § ॥

---

* सोऽयमर्द्धर्चः:— “जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः”-इति ।

† ऋ० सं० १०, ७३, १—११ ऋचः ।   ‡ २भा० ८४पृ० १७पं० द्र० ।

§ १प्र० २ख० द्र०—२भा० ८२पृ० १०पं० द्र० ।

अथ निष्केवल्यशस्त्र माह — "त्वा मिद्धि हवामह इति बृहत्पृष्ठं भवति ; क्षत्रं वै बृहत्, क्षत्रेणैव तत् क्षत्रं समर्द्धयत्यथो क्षत्रं वै बृहदात्मा यजमानस्य निष्केवल्यं ; तद्यद् बृहत्पृष्ठं भवति, क्षत्रं वै बृहत्, क्षत्रेणैवैनं तत्समर्द्धयत्यथो ज्यैष्ठ्यं वै बृहज्ज्यैष्ठ्येनैवैनं तत्समर्द्धयत्यथो श्रैष्ठ्यं वै बृहच्छ्रैष्ठ्येनैवैनं तत्समर्द्धयति"–इति । "त्वा मिद्धि"–इत्यादिकस्तृचो निष्केवल्यशस्त्रस्य स्तोत्रियप्रतिपद्रूपः, बृहत्साम्न आधारत्वाद् बृहद्रूपः, तेन च साम्ना पृष्ठस्तोत्रस्य निष्पाद्यत्वात् पृष्ठस्वरूपश्च भवति । "त्वा मिद्धि"–इत्यस्यामृच्युत्पन्नं बृहत्साम 'क्षत्रं वै' क्षत्रियजातिरूप मेव ; अतः 'क्षत्रेणैव' त्वा मिद्धीति तृचरूपेण 'तत्' क्षत्रं यजमानरूपं समृद्धं करोति । 'अथो' अपि चोक्तरीत्या क्षत्र मेव बृहद्रूपं निष्केवल्यशस्त्रं च यजमानस्य 'आत्मा' देहभूतः ; 'तत्' तथा सति 'यद्' यदि बृहत्पृष्ठशब्दद्वयवाच्यं त्वा मिद्धीत्यादिकं निष्केवल्यं भवेत्, 'तत्' तेन निष्केवल्येन, क्षत्रं वै बृहदिति पूर्वं मुक्तत्वात् 'क्षत्रेणैव' त्वा मिद्धीत्यादिना बृहद्रूपेण निष्केवल्येनैव 'एनं' यजमानं समृद्धं करोति । 'अथो' अपि च त्वा मिद्धीत्यादिकं बृहद्रूपं 'ज्यैष्ठ्यं वै' वयोवृद्धेः स्वरूपम्, अतो 'ज्यैष्ठ्येनैव, वयोवृद्ध्यैव 'एनं' राजानं समृद्धं करोति । 'अथो' अपि च त्वा मिद्धीत्यादिकं बृहद्रूपं 'श्रैष्ठ्यं वै' गुणोत्कर्ष एव ; तथा सति 'श्रैष्ठ्येनैव ' गुणोत्कर्षेणैव यजमानं समृद्धं करोति ॥

निष्केवल्यशस्त्रस्य प्रतिपदं मुक्त्वा अनुरूप माह— "अभि त्वा शूर नोनुम इति रथन्तर मनुरूपं कुर्वन्त्ययं वै लोको रथन्तर मसौ लोको बृहदस्य वै लोकस्यासौ लोकोऽनुरूपोऽमुष्य लोकस्यायं लोकोऽनुरूपस्तद्यद् रथन्तर मनुरूपं कुर्वन्त्युभावेव तल्लोकौ

यजमानाय सम्भोगिनौ कुर्वन्त्यथो ब्रह्म वै रथन्तरं, क्षत्रं बृहद्; ब्रह्मणि खलु वै क्षत्रं प्रतिष्ठितं, क्षत्रे ब्रह्माथो साम्न एव सयोनितायै"–इति। "अभि त्वा शूर"–इत्येतं तृचं निष्केवल्यशस्त्रस्यानुरूपं कुर्युः*। यद्यपि त्वा मिद्धाभि त्वेत्येतौ प्रगाथौ ऋग्द्वयात्मकौ, तथापि प्रग्रथनेन तृचत्वं सम्पाद्य प्रतिपदनुचरत्वं द्रष्टव्यम्। अभि त्वेत्ययं तृचो रथन्तरसाम्न आधारत्वाद् रथन्तर मित्युच्यते। बृहद्रथन्तरशब्दाभ्यां विवक्षितं त्वा मिद्धाभि त्वेति तृचद्वयं मिलित्वा प्रशस्यते। भूलोको रथन्तरस्वरूपः, स्वर्गलोको बृहत्स्वरूपः; तावेतौ लोकौ परस्परानुरूपौ; अस्मिंल्लोके दत्तेन हविषा देवाः स्वर्गे जीवन्ति, स्वर्गादागतया वृष्ट्या मनुष्या जीवन्ति, तदेतत् परस्पर मनुरूपत्वम्। एवं सति बृहद्रथन्तररूपाभ्यां प्रतिपदनुचराभ्या मुभावेव लोकौ यजमानार्थं समीचीनभोगयुक्तौ कुर्वन्ति। 'अथो' अपि च प्रजापतिमुखजत्वसाम्येन रथन्तरस्य ब्राह्मणरूपत्वात्, तदीयबाहुजत्वसाम्येन बृहतः क्षत्रियरूपत्वाच्च† बृहद्रथन्तराभिधानयोस्तृचयोरनुष्ठानेन ब्रह्मक्षत्रयोः परस्परा प्रतिष्ठा भवति। 'अथो' अपि च तृचद्वयानुष्ठानं निष्केवल्यशस्त्रस्य तृचद्वयाश्रितसाम्नश्च 'सयोनितायै' समानस्थानत्वाय सम्पद्यते॥

धाय्यां दर्शयति— "यद्वावानेति (सं० १०.७४.६) धाय्या; तस्या उक्तं ब्राह्मणम्'–इति। 'तस्याः' धाय्यायाः प्रशंसारूपं 'ब्राह्मणं' "तं देवा अब्रुवंस्त्वं वा अवोचथाः"–इत्यादिना पूर्व मेवोक्तम्‡॥

---

* 'इत्येष तृचः निष्केवल्यस्यानुरूपः कार्यः'–इति ख।

† १भा० १९पृ० ५पं०, २०३पृ० १२पं०—तै०सं०७. १. १. ४।

‡ ३प० २अ० १० खं०—२भा० ८४पृ० ६पं० द्र०।

सामाधारभूतं प्रगाथं दर्शयति— "उभयं शृणवच्च न इति सामप्रगाथ उभयसाम्नो रूप मुभे हि सामनी क्रियेते"--इति । उभय मित्यादिप्रगाथो बृहद्रथन्तरसामद्वयस्य स्वरूपम् ; यस्मादेते उभयसामनी तस्मिन् प्रगाथे सामगैर्गीयेते , तस्मात् तद्रूपत्वं युक्तम् * ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां प्रथमाध्याये
(षट्त्रिंशाध्याये) द्वितीयः खण्डः ॥ २ ॥

॥ अथ तृतीयः खण्डः ॥

त मु ष्टुहि यो अभिभूत्योजा इति सूक्त॑ मभिवदभिभूत्यै रूप॑ मषाळ्ह मुग्रं सहमान माभिरित्यु॑ग्रवत्॑ सहमानवत्॑ तत्क्षत्रस्य रूपं॑ तत्पञ्चदशर्चं भव॑त्योजो वा इन्द्रियं॑ वीर्यं पञ्चदश॑ ओजः क्षत्रं॑ वीर्यं राजन्य॑स्तदेन मोजसा क्षत्रेण॑ वीर्येण समर्धयति॑ तद्भारद्वाजं॑ भवति॑ भारद्वाजं वै बृहदार्षेयेण॑ सलोमैष ह वाव क्षत्रिययज्ञः॑ समृद्धो यो बृहत्पृष्ठ॑स्तस्माद् यत्र क्व च क्षत्रियो यजेत॑ बृहदेव तत्र पृष्ठं॑ स्यात्॑ तत् समृद्धम् ॥ ३ ॥

---

* २भा० १०४—११३९० द्र० ।

निष्केवल्यशस्त्रे निविद्धानीयसूक्तं दर्शयति— "त मु ष्टुहि यो अभिभूत्योजा इति (मं० ६.१८.१-१५.) सूक्त मभिवदभिभूत्यै रूपम्"—इति । 'अभिवत्' अभिशब्दोपेतं सूक्तम् । तस्माद् 'अभिभूत्यै' शत्रूणा मभिभवस्य स्वरूपम् * ॥

तस्या ऋचः तृतीयपाद मनूद्य प्रशंसति— "अषाळ्हमुग्र' सहमान माभिरित्युग्रवत् , सहमानवत् , तत् क्षत्रस्य रूपम्"—इति । उग्रशब्द-सहमानशब्द-युक्त मिदं सूक्तम् ; तच्च शब्दद्वयवाच्यं क्षत्रियजातेः स्वरूपम् ; क्षत्रियो ह्युग्रो भूत्वा शत्रून् अभिभवति ॥

तत्सूक्तगता मृक्सङ्ख्यां प्रशंसति— "तत् पञ्चदशर्चं भवत्योजो वा इन्द्रियं वीर्यं पञ्चदश, ओजः क्षत्रं वीर्यं राजन्यस्तदेन मोजसा क्षत्रेण वीर्येण समर्द्धयति"—इति । पूर्वोक्तत्रिष्टुप्-प्रशंसावाक्यवत् (१७१ पृ०) इदं पञ्चदशस्तोमप्रशंसावाक्यं व्याख्येयम् † ॥

ऋषिद्वारा सूक्तं प्रशंसति— "तद्भारद्वाजं भवति ; भारद्वाजं वै बृहदार्षेयेण सलोमा"—इति । भरद्वाजेन दृष्टत्वादिदं सूक्तं 'भारद्वाजम्', 'बृहत्' सामापि तथा भारद्वाजम् । तादृशबृहद्योगादयं क्रतुः 'आर्षेयेण सलोमा' आर्षेयो भरद्वाजमुनिसम्बन्धः, लोमशब्देन केशयुक्तो मूर्द्धोपलक्ष्यते ; 'सलोमा' सशिरस्कः, सम्पूर्ण इत्यर्थः । भरद्वाज-मुनिदृष्टस्य बृहतः सम्पूर्णत्वाद् बृहद्द्वारा मुनिसम्बन्धे ‡ सति क्रतोरपि सम्पूर्णत्वं द्रष्टव्यम् ॥

इदानीं बृहद्रथन्तरसामोपेतप्रकृतयज्ञक्रतुसमृद्धि § मुपजीव्यैक-

---

* प्रकृतौ तु इन्द्रस्य नु वीर्यं मिति विहितम् (२भा० ११२पृ०) द्र० ।

† "पिबा सोमं त मु ष्टुहीति मध्यन्दिनः , तयोर्वैकाहिके पुरस्तादन्ये वा शंसेयुः"—इति आश्व० श्रौ० ८, ५, ४, ५ ।

‡ 'सम्पूर्णत्वाद् भरद्वाजमुनिसम्बन्धे'—इति ख । § '०क्रतुसम्बन्ध'—इति ख ।

सामकेऽपि क्षत्रिययज्ञे पृष्ठस्तोत्रस्य बृहत्सामसाध्यत्वं विधत्ते— “एष ह वाव क्षत्रिययज्ञः समृद्धो यो बृहत्पृष्ठस्तस्माद् यत्र क्व च क्षत्रियो यजेत, बृहदेव तत्र पृष्ठं स्यात्, तत् समृद्धम्”– इति । ‘यः’ क्रतुः द्विसामकत्वेन * बृहत्पृष्ठेनोपेतः, एष एव क्षत्रिययज्ञः ‘समृद्धः’ सम्पूर्णः । यस्मादेवं, तस्माद् ‘यत्र क्व च’ एकसामकेन अपि क्रतुना क्षत्रियो यजेत, तत्र पृष्ठस्तोत्रं बृहत्सामयुक्तमेव कुर्यात् । ‘तत्’ एतदनुष्ठानं ‘समृद्धं’ सम्पूर्णं भवति ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां प्रथमाध्याये
(षट्त्रिंशाध्याये) तृतीयः खण्डः ॥ ३ ॥

॥ अथ चतुर्थः खण्डः ॥

ऐकाहिका होत्रा॑ एता वै शान्ताः क्लृप्ताः॑ प्रतिष्ठिता होत्रा॑ यदैकाहिकाः॑ शान्त्यै क्लृप्त्यै॑ प्रतिष्ठित्या अप्रच्युत्यै॑ ताः सर्वरूपा भवन्ति॑ सर्वसमृद्धाः सर्वरूपतायै॑ सर्वसमृद्ध्यै॑ सर्वरूपाभिर्होत्राभिः॑ सर्वसमृद्धाभिः॑ सर्वान् कामानवाप्नवामेति॑ तस्माद् यत्र क्व चैकाहा॑ असर्वस्तोमा असर्वपृष्ठा॑ ऐकाहिका एव॑ तत्र होत्राः †

---

* ‘द्विसामको’–इति ख ।

† “होत्रा”–इति निर्विसर्गपाठः ग, ङ । एवमुत्तरत्रापि यण्परे सकारे ।

स्तुतत्समृद्ध मुक्थ्य एवायं पञ्चदशः स्यादित्याहुरोजो वा इन्द्रियं वीर्यं पञ्चदश ओजः क्षत्रं वीर्यं राजन्यस्तदेन मोजसा क्षत्रेण वीर्येण समर्द्धयति तस्य त्रिंशत्स्तुतशस्त्राणि भवन्ति त्रिंशदक्षरा वै विराड् विराळन्नाद्यं विराज्येवैनं तदन्नाद्ये प्रतिष्ठापयति तस्मात् तदुक्थ्यः पञ्चदशः स्यादित्याहुर्ज्योतिष्टोम एवाग्निष्टोमः स्याद् ब्रह्म वै स्तोमानां त्रिवृत् क्षत्रं पञ्चदशो ब्रह्म खलु वै क्षत्रात् पूर्वं ब्रह्म पुरस्तान् म उग्रं राष्ट्र मव्यथ्य मसदिति विशः सप्तदशः शौद्रो वर्ण एकविंशो विशञ्चैवास्मै तच्छौद्रञ्च वर्ण मनुवर्त्मानौ कुर्वन्त्यथो तेजो वै स्तोमानां त्रिवृद्वीर्यं पञ्चदशः प्रजातिः सप्तदशः प्रतिष्ठैकविंशस्तदेनं तेजसा वीर्येण प्रजात्या प्रतिष्ठयान्ततः समर्द्धयति तस्माज्ज्योतिष्टोमः स्यात् तस्य चतुर्विंशति स्तुतशस्त्राणि भवन्ति चतुर्विंशत्यर्द्धमासो वै संवत्सरः संवत्सरे कृत्स्न मन्नाद्यं कृत्स्न एवैनं तदन्नाद्ये प्रतिष्ठापयति तस्माज्ज्योतिष्टोम एवाग्निष्टोमः स्यादग्निष्टोमः स्यात् ॥ ४ ॥

॥ इत्यैतरेयब्राह्मणेऽष्टमपञ्चिकायां प्रथमोऽध्यायः ॥ १ ॥

माध्यन्दिनसवने होतुः शस्त्रविशेष मभिधाय होत्रकाणां विशेषाभावं दर्शयति— "ऐकाहिका होत्राः; एता वै शान्ताः क्लृप्ताः प्रतिष्ठिता होत्रा, यदैकाहिकाः शान्त्यै क्लृप्त्यै प्रतिष्ठित्या अप्रच्युत्यै ; ताः सर्वरूपा भवन्ति सर्वसमृद्धाः, सर्वरूपतायै सर्वसमृद्ध्यै, सर्वरूपाभिर्होत्राभिः सर्वसमृद्धाभिः, सर्वान् कामानवाप्नवामेति, तस्माद् यत्र क्व चैकाहा असर्वस्तोमा असर्वपृष्ठा ऐकाहिका एव तत्र होत्राः स्युस्तत्समृद्धम्"–इति । मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानां याः क्रियास्ताः 'होत्राः' *, ताश्च 'ऐकाहिकाः' एकाहे प्रकृतिरूपे विहिता एवात्र विकृतिरूपे क्षत्रिययज्ञे कर्त्तव्याः । 'एताः' च होत्राः शान्तत्वादिगुणकाः । शान्तादिशब्दार्थाः पूर्ववद् (१६५पृ०) व्याख्येयाः । 'ताः' चैकाहिका होत्राः 'सर्वरूपाः सर्वसमृद्धाश्च भवन्ति' तत्तद्विकृतिषु होत्रकाणां ये ये विशेषा उक्ताः, तद्रूपत्वं सर्वरूपत्वम् ; तत्तत्फलसमृद्धिः सर्वसमृद्धिः ; एतच्चोभय मिन्द्राभिष्टवनेन क्षत्रियस्य प्रतिपादनसामर्थ्यात् सम्पद्यते । अतः 'सर्वरूपतायै' सर्वलोकप्राप्त्यर्थं, तत्र च सर्वभोगसमृद्ध्यर्थम्, उक्ता होत्रकाः सम्पद्यन्ते । ततः क्षत्रियाः पुरुषाः सर्वरूपाभिः सर्वसमृद्धाभिरैकाहिकाभिर्होत्राभिः सर्वान् कामानवाप्नवामेति अभिप्रायेण ऐकाहिकानुष्ठानं कुर्युः † । एकाहाश्च द्विविधाः,— सर्वस्तोम-सर्वपृष्ठाः, तद्विपरीताश्च । पृष्ठ्यषडहे प्रतिपादिताः त्रिवृत्-पञ्चदश-सप्तदश-एकविंश-त्रिणव-त्रयस्त्रिंशरूपाः षट्सङ्ख्याकाः सर्वे स्तोमाः । तस्मिन्नेव पृष्ठ्यषडहे रथन्तर-बृहद्-वैरूप-वैराज-शाक्वर-रैवतानि षट्सङ्ख्याकानि सर्व-

---

* ६भा० २४७पृ० १८पं०, २७७पृ० १७पं० द्र० ।

† 'ऐकाहिकहोत्रानुष्ठानं'–इति ग ।

पृष्ठानि * । तैः सर्वैः स्तोमैः पृष्ठैश्च युक्तेभ्य एकाहेभ्यो व्यतिरिक्ताः कतिपयस्तोमपृष्ठयुक्ता एकाहाः 'असर्वस्तोमा असर्वपृष्ठाः' च । यस्माद् ऐकाहिका होत्राः पूर्वोक्तरीत्या प्रशस्ताः, तस्मात् यत्र क्वापि असर्वस्तोमा असर्वपृष्ठाश्चैकाहा अनुष्ठीयन्ते, तत्र सर्वत्र ऐकाहिका एव होत्राः स्युः; न तु नूतनो विशेषः कश्चिदस्ति । 'तत्' तादृशं कर्म 'समृद्धं' फलेन सम्पूर्णम् ॥

अथ क्षत्रिययज्ञस्य संस्थाविशेषो निर्णेतव्यः, तदर्थ मादौ केषाञ्चित् पक्ष मुपन्यस्यति— "उक्थ्य एवायं पञ्चदशः स्यादित्याहुरोजो वा इन्द्रियं वीर्यं पञ्चदश, ओजः क्षत्रं वीर्यं राजन्यस्तदेन मोजसा क्षत्रेण वीर्येण समर्द्धयति"-इति । 'अयं' क्षत्रिययज्ञ उक्थ्यसंस्थ एव †; सर्वेष्वपि स्तोत्रेषु पञ्चदशस्तोम एव स्यादित्येव मेके ब्रह्मवादिन आहुः । ओजो वा इत्यादिकं पूर्ववद् (१७५पृ०) व्याख्येयम् ॥

उक्थ्ये स्तोत्रशस्त्रसङ्ख्यां प्रशंसति— "तस्य त्रिंशत् स्तुतशस्त्राणि भवन्ति; त्रिंशदक्षरा वै विराड्, विराळन्नाद्यं विराज्येवैनं तदन्नाद्ये प्रतिष्ठापयति; तस्मात् तदुक्थ्यः पञ्चदशः स्यादित्याहुः"-इति । 'तस्य' उक्थ्यस्य पञ्चदश स्तोत्राणि, पञ्चदश शस्त्राणि ‡ इत्येवं त्रिंशत् सङ्ख्या; तथा सत्यक्षरद्वारा विराड्रूपत्वाद्, विराजश्चान्नसाधनत्वात् 'एनं' यजमानं विराट्साम्येन अन्नाद्ये प्रतिष्ठापयति, 'तस्मात्' एवं पञ्चदशस्तोत्रशस्त्रत्वात्

---

* २भा० ९८पृ० *, ११६— ११९पृ० द्र० ।

† उक्थ्यक्रतुप्रयोगः ३प० ५ख० (२भा० २१४—२५४पृ०) द्र० ।

‡ "पञ्चदशोक्थ्यस्य स्तोत्राणि पञ्चदश शस्त्राणि"-इति २भा० १९०पृ० । "पञ्चदश स्तोत्राणि पञ्चदश शस्त्राणि, स मासः"-इति ता० ब्रा० ४, २, ९ ।

'तदुक्थ्यः' स क्षत्रिययज्ञ उक्थ्यसंस्थः पञ्चदशस्तोमयुक्तः स्यात् । इत्येवं केचिदाहुः ॥

अथ स्वपक्ष माह— "ज्योतिष्टोम एवाग्निष्टोमः स्याद्"-इति । योऽयं क्षत्रियाणां ज्योतिष्टोमः, सोऽग्निष्टोमसंस्थ एव स्यात् ॥

तस्मिन्नग्निष्टोमे ये त्रिवृदादयश्चत्वारः स्तोमास्तान् ब्राह्मणादिवर्णचतुष्टयरूपेण तेजआदिगुणचतुष्टयरूपेण च प्रशंसति— "ब्रह्म वै स्तोमानां त्रिवृत्, क्षत्रं पञ्चदशो, ब्रह्म खलु वै क्षत्रात् पूर्वं, ब्रह्म पुरस्तान् म उग्रं राष्ट्र मव्यथ्य मसदिति; विशः सप्तदशः; शौद्रो वर्ण एकविंशो; विशञ्चैवास्मै तच्छौद्रं च वर्ण मनुवर्त्मानौ कुर्वन्त्यथो तेजो वै स्तोमानां त्रिवृद्, वीर्यं पञ्चदशः, प्रजातिः सप्तदशः, प्रतिष्ठैकविंशस्तदेनं तेजसा वीर्येण प्रजात्या प्रतिष्ठयान्ततः समर्धयति; तस्माज्ज्योतिष्टोमः स्यात्"-इति । प्रजापतेर्मुखबाहुमध्यदेशपादेभ्य उत्पत्तिसाम्यात् त्रिवृदादिस्तोमानां ब्राह्मणादिवर्णचतुष्टयरूपत्वम् * । तत्र ब्राह्मणपूर्वकं राष्ट्रं मदीय मुग्र मव्यथनीयं चास्त्वित्यभिप्रायेण क्षत्रियस्य त्रिवृत्-पञ्चदशौ क्रमेण अनुष्ठेयौ । सप्तदशैकविंशयोनुष्ठानेन वैश्यशूद्रौ वर्णौ क्षत्रियस्यानुगामिनौ कुर्वन्ति । त्रिविदादिस्तोमानां तेजोवीर्यप्रजननप्रतिष्ठासाधनत्वात् तत्तद्रूपत्वम् । तेषा मनुष्ठानेन 'एनं' क्षत्रियम् 'अन्ततः' यज्ञस्यान्ते तेजआदिभिः समृद्धं करोति । तस्मात् क्षत्रियस्य त्रिविदादिस्तोमचतुष्टयविशिष्टो ज्योतिष्टोमः स्यात् ॥

अग्निष्टोमसंस्थे तस्मिन् स्तोत्रशस्त्रसङ्ख्यां प्रशंसति— "तस्य चतुर्विंशति स्तुतशस्त्राणि भवन्ति; चतुर्विंशत्यर्धमासो वै संवत्सरः, संवत्सरे कृत्स्न मन्नाद्यं, कृत्स्न एवैनं तदन्नाद्ये प्रतिष्ठापयति;

---

* १भा० १९४० पृ०, २०६४० १२पं०—तै० सं० ७. १. १. ४ ।

तस्माज्ज्योतिष्टोम एवाग्निष्टोमः स्यादग्निष्टोमः स्यात्”-इति । ‘तस्य’ अग्निष्टोमसंस्थस्य ज्योतिष्टोमस्य द्वादश स्तोत्राणि द्वादश शस्त्राणि, एवं चतुर्विंशतिसङ्ख्या ; ततोऽर्द्धमासद्वारा संवत्सरत्वम् ; संवत्सरे च त्रिः सस्यानां पच्यमानत्वादन्नाद्यं ‘कृत्स्नं’ सम्पूर्णं भवति* । तेन ‘एनं’ यजमानं सम्पूर्ण एव अन्नाद्ये प्रतिष्ठापयति । तस्मात् क्षत्रियस्य ज्योतिष्टोमो अग्निष्टोमसंस्थ एव स्यात्, न तूक्थ्यसंस्थः । अभ्यासोऽध्यायपरिसमाप्त्यर्थः† ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां प्रथमाध्याये
(षट्त्रिंशाध्याये) चतुर्थः खण्डः ॥ ४ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये ‘वेदार्थप्रकाश’-नामभाष्ये
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायाः प्रथमोऽध्यायः ॥

---

* “चतुर्विंशतिरग्निष्टोमस्य स्तुतशस्त्राणि”-इति ३प० ४ख०(२भा० १२१पृ०)। अपि ता० ब्रा० ४. ५. १२ एवमेव ।

† “अथ राजसूयाः (९, ३. १)”-इत्याद्याश्वलायनस्य सूत्रालोच्यः ।

॥ अथ द्वितीयाध्यायः ॥

(३७)

॥ अथ प्रथमः खण्डः ॥

अथातः पुनरभिषेकस्यैव सूयते ह वा अस्य क्षत्रं यो दीक्षते क्षत्रियः सन्त्स यदा ऽवभृथादुदेत्यानूबन्ध्ययेष्ट्वोदवस्यत्यथैन मुदवसानीयायां संस्थितायां पुनरभिषिञ्चति तस्यैते पुरस्तादेव सम्भारा उपक्लृप्ता भवन्त्यौदुम्बर्यासन्दी तस्यै प्रादेशमात्राः पादाः स्युररत्निमात्राणि शीर्षण्यानूच्यानि मौञ्जं विवयनं व्याघ्रचर्मास्तरण मौदुम्बरश्चमस उदुम्बरशाखा तस्मिन्नेतस्मिंश्चमसे ऽष्टातयानि निषुतानि भवन्ति दधि मधु सर्पिरातपवर्ष्या आपः शष्पाणि च तोक्मानि च सुरा दूर्वा तद्यैषा दक्षिणा स्फ्यवर्त्तनिर्वेदेर्भवति तस्यैतां प्राची मासन्दीं प्रतिष्ठापयति तस्या अन्तर्वेदि द्वौ पादौ भवतो बहिर्वेदि द्वावियं वै श्रीस्तस्या एतत् परिमितं रूपं यदन्तर्वेद्यथैष भूमा ऽपरिमितो यो बहिर्वेदि तद्यदस्या अन्तर्वेदि द्वौ पादौ भवतो बहिर्वेदि द्वा उभयोः कामयोरुपाप्त्यै यश्चान्तर्वेदि यश्च बहिर्वेदि ॥ ५ ॥

॥ श्रीगणेशाय नमः ॥

सुतयज्ञविशेषोऽस्य क्षत्रियस्योपवर्णितः ।
क्रतौ समाप्तेऽथ पुनरभिषेकोऽत्र वर्ण्यते ॥

त मेत मभिषेकं प्रतिजानीते — "अथातः पुनरभिषेकस्यैव" -इति । 'अथ' क्रतुसमाप्त्यनन्तरम्, यतः क्षत्रियो ऽभिषेक मर्हति, 'अतः' कारणात् पुनरभिषेकस्यैव, विधिरुच्यत इति शेषः * । राज्ञः पूर्वं मभिषिक्तत्वादयं पुनरभिषेको भवति । इतरस्यापि क्षत्रियस्य माहेन्द्रग्रहाय प्रस्तुते सत्यभिषेकस्य आध्वर्यवस्य विद्यमानत्वात् † अयं पुनरभिषेको भवति ॥

त मेव विधत्ते — "सूयते ह वा अस्य क्षत्रं यो दीक्षते क्षत्रियः सन्स यदा ऽवभृथादुदेत्यानूबन्ध्ययेष्ट्वोदवस्यत्यथैन मुदवसानीयायां संस्थितायां पुनरभिषिञ्चति"-इति । 'यः' पुमान् क्षत्रियः सन् 'दीक्षते' दीक्षां प्राप्नोति, 'अस्य' क्षत्रस्य पुरुषस्य 'क्षत्रं' सर्वेषां प्राणिनां क्षतात् त्राणम् 'सूयते' प्रवर्त्तते । तस्मात् 'सः' क्षत्रियो यदा 'अवभृथादुदेत्य' अवभृथाख्यं कर्म समाप्तं कृत्वा, 'अनूबन्ध्यया' तदाख्यया कया चित् पशुस्थानीयया 'इष्ट्वा' यागं कृत्वा, पश्चात् 'उदवस्यति' उदवसानीयाख्ययेष्ट्या कर्मावसानं करोति, 'अथ' तदानीम् 'एनं' क्षत्रिय मुदवसानीयेष्टौ समाप्तायां पुनरपि कर्माङ्गत्वेन ऋत्विजो ऽभिषिञ्चेयुः ॥

---

* "तं वै प्राञ्चं तिष्ठन्त मभिषिञ्चति पुरस्ताद् ब्राह्मणो ऽभिषिञ्चत्यध्वर्युर्वा, यो वास्य पुरोहितो भवति; पश्चादितरे ०—० इदं सर्वं यो राजसूयेन यजते"-इत्यादि शत० ब्रा० ५, ४, २, १—५ ।

† "तं वै माध्यन्दिने सवने ऽभिषिञ्चति ०—० अगृहीते माहेन्द्रे"-इत्यादि शत० ब्रा० ५.३.५.१ । 'माहेन्द्रे ग्रहे अगृहीते सोमरसेनापूर्णे, मरुत्वतीयान्ते इत्यर्थः'-इति तत्र सा० भा० ।

तस्याभिषेकस्य साधनानि विधत्ते — "तस्यैते पुरस्तादेव सम्भारा उपक्लृप्ता भवन्त्यौदुम्बर्यासन्दी ; तस्यै प्रादेशमात्राः पादाः स्युररत्निमात्राणि शीर्षण्यानूच्यानि ; मौञ्जं विवयनं, व्याघ्रचर्मास्तरण, मौदुम्बरश्चमस , उदुम्बरशाखा ; तस्मिन्नेतस्मिंश्चमसे ऽष्टातयानि निषुतानि भवन्ति,— दधि मधु सर्पिरातपवर्ष्या आपः शष्पाणि च तोक्मानि च दूर्वा"-इति । 'तस्य' पुनरभिषेकस्य 'एते' वक्ष्यमाणाः 'सम्भाराः' सम्पादनीया द्रव्यविशेषाः 'पुरस्तादेवोपक्लृप्ताः' अभिषेककालात्प्रागेव सम्पादिता भवेयुः । के वस्तुविशेषाः सम्पादनीयाः ? ते ऽभिधीयन्ते । उदुम्बरकाष्ठैर्निर्मिता का चिदासन्दी । 'तस्यै' तस्या आसन्द्याः चत्वारः पादाः प्रादेशपरिमिताः ; तेषां पादानां शिरस्युपरिभागे ऽवस्थितानि 'शीर्षण्यानि', अन्वक्तिर्यगवस्थितानि काष्ठानि 'अनूच्यानि', तानि शीर्षण्यनूच्यानि' * अरत्निपरिमितानि । प्रादेशद्वयमरत्निः । 'विवयनं' विविधं वयनं रज्जुना मोतप्रोतरूपेण संयोजनम् , तच्च 'मौञ्जं' मुञ्जतृणेन निर्मितम् । ईदृश्या आसन्द्या उपरि आस्तरणं व्याघ्रचर्म । दध्यादिप्रक्षेपार्थः प्रौढ उदुम्बरकाष्ठनिर्मितश्चमसः । तथा काचित् सूक्ष्मा 'उदुम्बरशाखा' । 'तस्मिन्नेतस्मिन् औदुम्बरे' प्रौढे चमसे वक्ष्यमाणदध्यादिद्रव्याणि 'अष्टातयानि' । अत्र द्वितयत्रितयादिवत् "सङ्ख्याया अवयवे तयप्"-इति (पा०५.२.४२.सू०)

---

* वक्ष्यत्युपरिष्टात् तृतीयाध्यायीयाद्यखण्डभाष्ये — 'अनूच्ये पार्श्वद्वयवर्तिनी फलके'-इति । "आसन्दीं समभरन् । तस्या ग्रीष्मश्च वसन्तश्च द्वौ पादावास्तां, शरच्च वर्षाश्च द्वौ । बृहच्च रथन्तरं चानूच्ये३ आस्तां, यज्ञायज्ञियं च वामदेव्यं च तिरश्चे"-इति अथ० सं० १५. ३. ४-५ । "चतुःस्रक्तयः पादा भवन्ति, चतुःस्रक्तीन्यनूच्यानि"-इति शत० ब्रा० ६. ७. १. १५ । "चत्वारः पादाश्चत्वार्यनूच्यानि"-इति च तत्रैव २८।

सूत्रेण तयप् प्रत्ययः । अष्टसङ्ख्याका अवयवा येषां दध्यादीनां तान्यष्टातयानि । दीर्घश्छान्दसः । तानि च 'निषुतानि' नितरां सुतानि प्रक्षिप्तानि भवन्ति । चमसे प्रक्षेपणीयान्यष्टद्रव्याणि कानि ? इति, तान्युच्यन्ते — दधि, मधु, सर्पिरित्येतानि त्रीणि प्रसिद्धानि ; आतपयुक्तवर्षभवाः 'आतपवर्ष्याः' *, तादृश्य आपश्चतुर्थं द्रव्यम् ; 'शष्पाणि' श्यामतृणानि, पञ्चमं द्रव्यम् ; 'तोक्मानि' अङ्कुराणि षष्ठं द्रव्यम् ; सुरा, दूर्वेति द्रव्यद्वयं प्रसिद्धम् ॥

सम्पादिताया आसन्द्याः प्रतिष्ठापनं विधत्ते — "तस्यैषा दक्षिणा स्फ्यवर्त्तनिर्वेदेर्भवति, तत्रैतां प्राचीमासन्दीं प्रतिष्ठापयति ; तस्या अन्तर्वेदि द्वौ पादौ भवतो बहिर्वेदि द्वावियं वै श्रीस्तस्या एतत्परिमितं रूपं यदन्तर्वेद्यथैष भूमाऽपरिमितो यो बहिर्वेदि ; तद् यदस्या अन्तर्वेदि द्वौ पादौ भवतो, बहिर्वेदि द्वा, उभयोः कामयोरुपाप्त्यै यश्चान्तर्वेदि यश्च बहिर्वेदि"-इति । पुरा वेदिपरिग्रहार्थं स्फ्येन लेखात्रयं कृतम् — दक्षिणा प्रतीच्युदीची च । तत्र देवयजनदेशे यैषा वेदिः सम्बन्धिनी दक्षिणा 'स्फ्यवर्त्तनिः' स्फ्यस्य रेखा भवति, 'तत्र' तस्यां रेखायाम् 'एताम्' आसन्दीं 'प्राचीं' प्रागग्राम् अवस्थापयेत् । 'तस्याः' आसन्द्या उत्तरदिग्गतौ द्वौ पादावन्तर्वेदि तिष्ठतः ; दक्षिणदिग्गतौ द्वौ पादौ बहिर्वेदि स्थापनीयौ । 'इयं' भूमिः 'श्रीर्वै' सम्पद्रूपैव । 'तस्याः' भूमेरन्तर्वेदि यद् रूपमस्ति, एतत् 'परिमितम्' अल्पम्, अथ बहिर्वेदि 'यः' प्रदेशोऽस्ति, एष 'भूमा' बहुलः अत एव 'अपरि-

---

* "अन्तरिक्षात् प्रतिगृह्यातपवर्ष्याः"-इति कात्या० श्रौ० १५. ४. ५ । 'आतपे वर्षन्ति, ताः अन्तरिक्षात् प्रतिगृह्य भूमिपतनात् प्रागेव आकाशात् पततीरादाय गृह्णाति' -इति तद्-व्याख्यानम् ।

मितः' इयानिति परिच्छेदरहितः। एवं सति वेदेर्मध्ये बहिश्चासन्ध्या द्वौ द्वौ पादाविति यदस्ति, तदुभयोः कामयोः प्राप्त्यै भवति,—यश्च कामो वेदिमध्ये लभ्यते, यश्च अन्यः कामो वेदेर्बहिर्लभ्यते, तदुभयसिद्ध्यर्थ मेवं स्थापन मिति ॥ १ (५) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) प्रथमः खण्डः ॥ १ (५) ॥

॥ अथ द्वितीयः खण्डः ॥

व्याघ्रचर्मणास्तृणात्युत्तरलोम्ना॑ प्राचीनग्रीवेण॑ क्षत्रं वा एतदारण्यानां पशूनां यद् व्याघ्रः॑ क्षत्रं राजन्यः॑ क्षत्रेणैव तत्क्षत्रं समर्धयति॑ तां पश्चात् प्राङुपविश्याच्य॑ जानु दक्षिण मभिमन्त्रयत॑ उभाभ्यां पाणिभ्या॑ मालभ्याग्निष्ट्वा॑ गायत्र्या॑ सयुक् छन्दसारोहतु॑ सवितोष्णिहा॑ सोमोऽनुष्टुभा॑ बृहस्पतिर्बृहत्या॑ मित्रावरुणौ॑ पङ्क्त्येन्द्रस्त्रिष्टुभा॑ विश्वेदेवा जगत्या॑ तानह मनु राज्याय॑ साम्राज्याय भौज्याय॑ स्वाराज्याय वैराज्याय॑ पारमेष्ठ्याय राज्याय॑ माहाराज्या-

आधिपत्याय स्वावश्यायातिष्ठायारोहामीत्येता मासन्दी मारोहेद्दक्षिणेनाग्रे जानुनाथ सव्येन तत्तदितीह चतुरुत्तरैर्वै देवाश्छन्दोभिः सयुग् भूत्वैतां श्रिय मारोहन्यथा मेत एतर्हि प्रतिष्ठिता अग्निर्गायत्र्या सवितोष्णिहा सोमो ऽनुष्टुभा बृहस्पतिर्बृहत्या मित्रावरुणौ पङ्क्त्येन्द्रस्त्रिष्टुभा विश्वेदेवा जगत्या ते एते अभ्यनूच्येते अग्नेर्गायत्र्यभवत्सयुग्वेति कल्पते ह वा अस्मै योगक्षेम उत्तरोत्तरिणीं ह श्रिय मश्नुते ऽश्नुते ह प्रजाना मैश्वर्यं माधिपत्यं य एव मेता अनु देवता एता मासन्दी मारोहति क्षत्रियः सन्नथैन मभिषेक्ष्यन्नपां शान्तिं वाचयति शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे । सर्वाँ* अग्नीँ रप्सुषदो हुवे वो मयि वर्चो बल मोजो निधत्तेति नैतस्याभिषिषिचानस्याशान्ता आपो वीर्यं निर्हणन्निति † ॥ २ (६) ॥

प्रतिष्ठिताया आसन्द्या उपरि चर्मास्तरणं विधत्ते — "व्याघ्रचर्मणास्तृणात्युत्तरलोम्ना प्राचीनग्रीवेण ; क्षत्रं वा एतदारण्यानां पशूनां यद् व्याघ्रः, क्षत्रं राजन्यः, क्षत्रेणैव तत् क्षत्रं समर्द्धयति"—इति । उत्तर ऊर्द्धभागे लोमानि यस्य चर्मणस्तत् 'उत्तरलोम', प्राच्यां दिशि ग्रीवा यस्य चर्मणस्तत् 'प्राचीनग्रीवम्' । तादृशेन

---

* "सर्वां"—इति ख, ग । † "निर्हणंनिति"—इति ख, ग, ङ ।

व्याघ्रचर्मणा ता मासन्दी मास्तृणीयात् । अरण्ये एवावस्थिता आरण्याः पशवो हरिणादयः । यो व्याघ्रोऽस्ति एतदारण्यपशूनां मध्ये ‘क्षत्रं वै’ क्षत्रियवच्छूरः ; योऽयं ‘राजन्यः’ यजमानः, सोऽपि ‘क्षत्रं’ क्षत्रियजातित्वाच्छूरः । अतश्चर्मास्तरणाद् व्याघ्रचर्मरूपेण ‘क्षत्रेणैव’ यजमानरूपं ‘क्षत्रं’ समृद्धं करोति ॥

आसन्द्या अभिमन्त्रणं विधत्ते— “तां पश्चात्प्राङुपविश्याच्य जानु दक्षिण मभिमन्त्रयत उभाभ्यां पाणिभ्या मालभ्य”–इति । प्रतिष्ठापिताया आसन्द्याः पश्चाद् भागे यजमानः प्राङ्मुख उपविश्य, दक्षिणं यत् जान्वस्ति, तत् ‘आच्य’ भूमिस्पृष्टं यथा भवति तथा न्यग्भूतं कृत्वा, सव्यजानु ऊर्द्ध्वमुख मेवावस्थाप्य , उभाभ्यां पाणिभ्या मासन्दीम् ‘आलभ्य’ स्पृष्ट्वा, वक्ष्यमाणमन्त्रेणाभिमन्त्रयेत् ॥

तं मन्त्रं दर्शयति— “अग्निष्ट्वा गायत्र्या सयुक् छन्दसारोहतु, सवितोष्णिहा, सोमोऽनुष्टुभा , बृहस्पतिर्बृहत्या, मित्रावरुणौ पङ्क्त्येन्द्रस्त्रिष्टुभा, विश्वेदेवा जगत्या, तानह मनु राज्याय साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाऽधिपत्याय स्वावश्यायातिष्ठायारोहामीति”–इति । हे आसन्दि । ‘त्वा’ त्वां गायत्र्या छन्दसा ‘सयुक्’ सहितः अग्निः आरोहतु । ‘उष्णिहा’ छन्दसा सहितः सविता आरोहतु । एवं सोमबृहस्पतिमित्रावरुणेन्द्रविश्वेदेवाः अनुष्टुबादिच्छन्दोभिः सहिताः त्वा मारोहन्तु । ‘तान्’ अग्न्यादीन् देवान् ‘अनु’ पश्चाद् अहम् आरोहामि । किमर्थम् ? राज्यादिसिद्ध्यर्थम् । ‘राज्यं’ देशाधिपत्यम् । ‘साम्राज्यं’ धर्मेण पालनम् । ‘भौज्य’’ भोगसमृद्धिः । ‘स्वाराज्यम्’ अपराधीनत्वम् । ‘वैराज्यम्’ इतरेभ्यो भूपतिभ्यो वैशिष्ट्यम् । एतदुक्त मैहिकम् , अथामुष्मिक मुच्यते—

'पारमेष्ठ्यम्' प्रजापतिलोकप्राप्तिः। तत्र 'राज्यं' ऐश्वर्यम्। 'माहाराज्यं' तत्रत्येभ्यश्चाधिक्यम्। 'आधिपत्यं' इतरान् प्रति स्वामित्वम्। 'स्वावश्यम्' अपारतन्त्र्यम्। 'आतिष्ठत्वं' चिरकालवासित्वम्॥

अनेन मन्त्रेणाभिमन्त्रणादूर्द्ध्व मारोहणं विधत्ते— "इत्येता मासन्दी मारोहेद्दक्षिणेनाग्रे जानुनाथ सव्येन"-इति। 'इति'-शब्दः पूर्वोक्त मभिमन्त्रणमन्त्रं परामृशति। तेनैव मन्त्रेण 'एताम्' आसन्दी मारोहेत्। तत्रायं प्रकारः -- दक्षिणेन जानुना प्रथमं समारोहेत्, ततः सव्येनारोहेत्॥

आरोहणं प्रशंसति— "तत्तदिती३"-इति। 'तत्' आरोहणम्, 'तत्' आरोहणम्, 'इति' एवं सर्वे जनाः पूजयन्ति। पूजार्थेयं प्लुतिः॥

मन्त्रतात्पर्यं दर्शयति— "चतुरुत्तरैर्वै देवाश्छन्दोभिः सयुग् भूत्वैतां श्रिय मारोहन् यस्या मेत एतर्हि प्रतिष्ठिता; अग्निर्गायत्र्या, सवितोष्णिहा, सोमोऽनुष्टुभा, बृहस्पतिर्बृहत्या, मित्रावरुणौ पङ्क्त्येन्द्रस्त्रिष्टुभा, विश्वेदेवा जगत्या"-इति। चत्वार्यक्षराण्येकैकस्माच्छन्दसः 'उत्तराणि' अधिकानि येषु गायत्र्यादिषु जगत्यन्तेषु छन्दस्सु, तानि 'चतुरुत्तराणि'; तादृशैश्छन्दोभिः 'सयुग् भूत्वा' साहित्यं प्राप्य, 'देवाः' अग्न्यादयः 'एताम्' आसन्दीं 'श्रियम्' ऐश्वर्यरूपाम् आरोहन्। 'यस्याम्' आसन्द्याम् 'एते' अग्न्यादयः इदानी मपि प्रतिष्ठिता वर्त्तन्ते। देवाश्छन्दोभिः सयुग् भूत्वेत्यय मर्थो अग्निर्गायत्र्येत्यादिना स्पष्टीकृतः॥

उक्त मर्थं मन्त्रसंवादेन दृढयति— "ते एते अभ्यनूच्येते अग्नेर्गायत्र्यभवत्सयुग्वेति"-इति। 'ते एते' देवच्छन्दसी परस्परसहिते

कया चिदृचो भ्यनूच्येति । सेयं मृगश्निरित्यादिका (१८८पृ०)। येयं गायत्री, सेयं मन्त्रः 'सयुग्वा' सहवासिन्यभवत् । 'इति' तस्या ऋचोऽर्थः ॥

क्षत्रियस्यारोहणं प्रशंसति— "कल्पते ह वा अस्मै योगक्षेम उत्तरोत्तरिणीं ह श्रिय मश्नुते, ऽश्नुते ह प्रजाना मैश्वर्यं माधिपत्यं, य एव मेता अनु देवता एता मासन्दी मारोहति क्षत्रियः सन्"-इति । 'यः' पुमान् क्षत्रियः सन् एताः देवता अनु स्वय मपि उक्तेन प्रकारेण एता मासन्दी मारोहति, 'अस्मै' क्षत्रियाय 'योगक्षेमः' 'कल्पते' सिध्यति । अप्राप्तस्य लाभस्य प्राप्तिर्योगः, प्राप्तस्य वस्तुनो रक्षणं क्षेमः, योगसहितः क्षेमो 'योगक्षेमः' । किञ्चायं क्षत्रियः 'उत्तरोत्तरिणीं' दिनेदिने वर्धमानां श्रियं प्राप्नोति; तथा सर्वासां प्रजानाम् 'ऐश्वर्यं' नियामकत्वम्, 'आधिपत्यम्' अधिकत्वेन पालनञ्च प्राप्नोति ॥

अभिषेककर्त्तुः शान्तिमन्त्रवाचनं विधत्ते— "अथैन मभिषेक्ष्यन्नपां शान्तिं वाचयति"-इति । 'अथ' आसन्द्यारोहणानन्तरम्, 'एनम्' आरूढं क्षत्रियं योऽन्योऽभिषेक्ष्यति, स पुमान् 'अपां' शान्तिं जलदेवतानां शान्तिकरं मन्त्रं 'वाचयेत्' क्षत्रियस्याग्रे स्वयं सकृदुक्त्वा तं क्षत्रियं पाठयेत् ॥

एतं शान्तिमन्त्रं दर्शयति— "शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे । सर्वाँ अग्नी रप्सुषदो हुवे वो मयि वर्चो बल मोजो निधत्तेति"-इति । हे 'आपः' देवताः! 'शिवेन' शान्तेन अनुग्रहयुक्तेन चक्षुषा मा मवलोकयत, तथा 'शिवया' शान्तया 'तन्वा' मदीयां त्वच मुपस्पृशत । 'अप्सु' जलेषु सीदन्तीति 'अप्सुषदः' और्वादयोऽग्नयः, तान् अग्नीन् सर्वान्

'वः' युष्मदर्थं 'हुवे' आह्वयामि, यूय मपि 'वर्चः' कान्तिः शरीरबलम्, तत्कारणम् 'ओजः' च मयि 'निधत्त' सम्पादयत॥

तदेतच्छान्तिमन्त्रवाचनं प्रशंसति — "नैतस्याभिषिषिचानस्याशान्ता आपो वीर्यं निर्हणन्निति"-इति। 'अशान्ताः' उग्रा आपः। तथा च अन्यत्र श्रूयते — "दिव्या आपो ऽशान्ताः"-इति ताश्चापः शान्तिवाचनाभावे 'अभिषिषिचानस्य' अभिषेकं प्राप्तस्य 'एतस्य' क्षत्रियस्य वीर्यं 'निर्हण्युः' विनाशयेयुः, सति तु शान्तिपाठे 'न निर्हणन्' * नैव विनाशयन्ति,-'इति' अभिप्रायेण शान्तिं वाचयेत्॥ २ (६)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) द्वितीयः खण्डः॥ २ (६)॥

॥ अथ तृतीयः खण्डः ॥

अथैन मुदुम्बरशाखा मन्तर्द्धायाभिषिञ्चतीमा आपः शिवतमा इमाः सर्वस्य भेषजीः। इमा राष्ट्रस्य वर्द्धनीरिमा राष्ट्रभृतो ऽमृताः। याभिरिन्द्र मभ्यषिञ्चत् प्रजापतिः सोमं राजानं वरुणं यमं मनुं। ताभिरद्भिरभिषिञ्चामि त्वा महं राज्ञां त्व मधिराजो

---

* 'न निर्हरणं'-इति क।

भवेह। महान्तं त्वा महीनां सम्राजं चर्षणीनां। देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनद्। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या मग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसेऽन्नाद्याय। भूरिति य इच्छेदिम मेव प्रत्यन्न मद्यादित्यथ य इच्छेद् द्विपुरुषं भूर्भुव इत्यथ य इच्छेत् त्रिपुरुषं वाऽप्रतिमं वा भूर्भुवः स्वरिति तद्धैक आहुः सर्वाप्तिर्वा एषा यदेता व्याहृतयोऽतिसर्वेण हास्य परस्मै कृतं भवतीति त मेतेनाभिषिञ्चेद्देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या मग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसेऽन्नाद्यायेति तदु पुनः परिचक्षते यदसर्वेण वाचोऽभिषिक्तो भवतीश्वरो ह तु पुरायुषः प्रैतोरिति ह स्माह सत्यकामो जाबालो य मेताभिर्व्याहृतिभिर्नाभिषिञ्चतीतीश्वरो ह सर्व मायुरैतोः सर्व माप्नोद्विजयेनेत्यु ह स्माहोद्दालक आरुणिर्य मेताभिर्व्याहृतिभिरभिषिञ्चतीति त मेतेनैवाभिषिञ्चेद् देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या मग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसे

ऽन्नाद्याय॑ भूर्भुवस्स्वरित्यथैतानि ह वै॑ क्षत्रियादीजानाद्॑ व्युत्क्रान्तानि भवन्ति॑ ब्रह्मक्षत्रे ऊर्गन्नाद्य॑ मपा मोषधीनां रसो॑ ब्रह्मवर्चस मिरापुष्टिः प्रजातिः॑ क्षत्ररूपं॑ तदथो अन्नस्य रस॑ ओषधी॑नां क्षत्रं प्रतिष्ठा॑ तद्यदेवामू पुरस्तादाहुतौ जुहो॑ति तदस्मिन् ब्रह्मक्षत्रे दधाति॑ ॥ ३ (७) ॥

अभिषेकप्रकारं विधत्ते — "अथैन मुदुम्बरशाखा मन्तर्धायाभिषिञ्चति"-इति । 'अथ' शान्तिवाचनानन्तरम्, 'एनं' क्षत्रियम् 'उदुम्बरशाखा मन्तर्धाय' शिरस्युदुम्बरशाखया व्यवधानं कृत्वा चमसस्थैर्दध्यादिभिरभिषिञ्चेत् * ॥

तिस्र ऋचः, एकं यजुः, व्याहृतयश्चेत्येते अभिषेकमन्त्राः । तत्र प्रथमा मृच माह— "इमा आपः शिवतमा इमाः सर्वस्य भेषजीः । इमा राष्ट्रस्य वर्द्धनीरिमा राष्ट्रभृतो ऽमृताः"-इति । 'आपः'-इत्यनेन दध्यादिसर्वद्रव्याणि उपलक्ष्यन्ते । 'इमाः' दध्यादिसहिताः आपः 'शिवतमाः' अतिशयेन शान्ताः । तथा 'इमाः' आपः 'सर्वस्य' दारिद्र्यादिरोगस्य 'भेषजीः' औषधरूपाः । तथा 'इमाः' आपो राष्ट्रस्य 'वर्द्धनीः' अभिवृद्धिहेतवः । अत एव 'इमाः' आपो 'राष्ट्रभृतः' राष्ट्रधारिण्यः । स्वयं च 'अमृताः' विनाशरहिताः ॥

द्वितीया मृच माह— "याभिरिन्द्र मभ्यषिञ्चत् प्रजापतिः

---

* "स्थितं प्राञ्च मभिषिञ्चति"-इत्यादि (कात्या० श्रौ० १५.५, ३०-३३.) पाठादभिषेकप्रकारविशेषाभिगन्तव्याः ।

सोमं राजानं वरुणं यमं मनुं। ताभिरद्भिरभिषिञ्चामि त्वा महं राज्ञां त्वमधिराजो भवेह"—इति। पुरा प्रजापतिः 'याभिः' दध्यादिसहिताभिरद्भिरिन्द्रादीनभ्यषिञ्चत्, हे क्षत्रिय! ताभिः अद्भिः त्वा मह अभिषिञ्चामि; त्वं च 'इह' लोके राज्ञां सर्वेषां अधिकः राजा भव।

तृतीया ऋगाह—"महान्तं त्वा महीनां सम्राजं चर्षणीनां। देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत्"—इति। 'जनित्री' तवोत्पादिका मातृरूपा देवी, त्वां 'महीनां' महताम् अपि पुरुषाणां मध्ये अतिशयेन महान्तम्, 'चर्षणीनां' मनुष्याणां सर्वेषां 'सम्राजं' सम्यक् [illegible] कृत्वा, [illegible] उत्पादितवती; अतो भवदीया 'जनित्री' माता, [illegible] पुण्यात्मा भूत्वोत्पादितवती॥

तिस्र ऋचो ऽभिजप्य यजु[illegible]—"देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसे ऽन्नाद्याय"—इति। हे क्षत्रिय! 'सवितुः' प्रेरकस्य देवस्य परमेश्वरस्य 'प्रसवे' अनुज्ञायां सत्यां त्वा अभिषिञ्चामि। केन साधनेन? 'अश्विनोः' देवयोः सम्बन्धिभ्यां बाहुभ्यां, न तु मदीयाभ्याम्; तथा 'पूष्णः' देवस्य हस्ताभ्याम्। मणिबन्धपर्यन्तौ दण्डाकारौ 'बाहू', अङ्गुलि

---

* एवंविधमन्त्रपाठं तैत्तिरीया इत्थं समामनन्ति। [illegible] श्रेष्ठ्यायाभिषिञ्चामीति, [illegible] दुग्धमेतद्द्वयम्। सोमस्य [illegible] सोमो वै देवानां पयः, [illegible] देवतानामभिषेचनमिति [illegible] सोमस्य [illegible] अभिषेकणम्. (तै० [illegible]— ब्रा० सं० १. १३)।

सहितावग्रभागौ 'हस्तौ'। तथाग्निसम्बन्धिना 'तेजसा' शारीरकान्त्या, सूर्यस्य सम्बन्धिना 'वर्चसा' वाह्यप्रकाशेन, इन्द्रसम्बन्धिना 'इन्द्रियेण' चक्षुरादिपाटवेन। कस्मै प्रयोजनायाय मभिषेकः? तत्र शारीरबलाय, 'श्रियै' हस्त्यश्वादिसम्पदे, 'यशसे' कीर्त्यै, 'अन्नाद्याय' अन्नसम्पत्तये॥

अथ कामनाभेदेन व्याहृतीर्दर्शयति "भूरिति य इच्छेदिम मेव प्रत्यन्न मद्यादित्यथ य इच्छेद् द्विपुरुषं भूर्भुव इत्यथ य इच्छेत् त्रिपुरुषं वाऽप्रतिमं वा भूर्भुवस्स्वरिति"-इति। 'यः' अभिषेक्ता 'इम मेव' अभिषिच्यमानं क्षत्रियं प्रति असौ 'अन्न मद्यात्' नीरोगो भवेदिति 'इच्छेत्' कामयेत, तं 'भूरिति' व्याहृत्या अभिषिञ्चेत्। अथ 'यः' अभिषेक्ता पुत्रपौत्राभ्यां द्वाभ्यां पुरुषाभ्यां सहितम् 'इमं' क्षत्रियं प्रति अन्न मद्यादिति कामयेत, तदानीं 'भूर्भुवः इति' व्याहृतिद्वयेन अभिषिञ्चेत्। अथ 'यः' अभिषेक्ता पुत्रपौत्रप्रपौत्रैस्त्रिभिः पुरुषैः युक्तम् 'इमं' क्षत्रियम् प्रति पुरुषत्रयपर्यन्तं जीवित्वा सुखेनान्न मद्यादिति कामयेत; अथवा त मेतम् 'अप्रतिमं' स्वतुल्यक्षत्रियान्तररहितं कुर्यात् * इति कामयेत, तदानीं 'भूर्भुवस्स्वरिति' व्याहृतित्रयेण अभिषिञ्चेत्॥

अत्र किञ्चित् पूर्वपक्ष मुद्भावयति — "तद्धैक आहुः, — सर्वाप्तिर्वा एषा यदेता व्याहृतयोऽतिसर्वेण हास्य परस्मै कृतं भवतीति; त मेतेनाभिषिञ्चेद् देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या मग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसेऽन्नाद्यायेति"-इति। 'तत्र' तस्मिन् एव अभिषेके ब्रह्मवादिनः केचिदेव माहुः,— या एता

---

* "कथाम्"-इति ख।

व्याहृतयः सन्ति, 'एषा' व्याहृतिरूपा 'सर्वाप्तिर्वै' सर्वफलप्राप्तिसाधनम्; अथो व्याहृतिभिरभिषेके 'अस्य' अभिषिच्यमानस्य 'परस्मै' परस्य स्वस्मादन्यस्य क्षत्रियस्य 'अतिसर्वेण' तदपेक्षामात्रमतिक्रम्य कृत्स्नेनापि मन्त्रजातेन अभिषेचनं कृतं भवति; तदेतदधिकाभिषेचन मयुक्तम् 'इति' अभिप्रेत्य 'तं' क्षत्रियम् 'एतेन' देवस्य त्वेत्यादिना यजुषा अभिषिञ्चेत्, न तु व्याहृतिभिरिति तेषां पक्षः ॥

तं पक्षं दूषयति— "तदु पुनः परिचक्षते; यदसर्वेण वाचोऽभिषिक्तो भवतीश्वरो ह तु पुरायुषः प्रैतोरिति ह स्माह सत्यकामो जाबालो य मेताभिर्व्याहृतिभिर्नाभिषिञ्चतीति"–इति। 'तदु' तदपि पूर्वोक्तं मतं पुनरन्येऽभिज्ञाः 'परिचक्षते' निराकुर्वन्ति। 'यं' क्षत्रियम् 'एताभिः' व्याहृतिभिः नाभिषिञ्चति, 'एषः' क्षत्रियो 'यद्' यस्मात् कारणाद् 'असर्वेण' सम्पूर्त्तिरहितेन 'वाचा' वाक्येन मन्त्रेण अभिषिक्तो भवति, तस्मादयं स्वोचितादायुषः पुरा 'प्रैतोः' प्रैतुं मर्त्तुम् 'ईश्वरः' समर्थो भवति; तस्मादायुःक्षयहेतुत्वादयं पक्षो न युक्त इति जबालाया पुत्रः 'सत्यकामः' महर्षिराह स्म ॥

पूर्वपक्षं दूषयित्वा सिद्धान्त माह— "ईश्वरो ह सर्व मायुरैतोः सर्व माप्तोर्विजयेनेत्यु ह स्माहोद्दालक आरुणिर्य मेताभिर्व्याहृतिभिरभिषिञ्चतीति; त मेतेनैवाभिषिञ्चेद् देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या मग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसेऽन्नाद्याय भूर्भुवस्स्वरिति"–इति। 'यं' क्षत्रियम् 'एताभिः' व्याहृतिभिरभिषिञ्चति, स क्षत्रियः 'सर्व मायुरैतोः' सर्वात्मनायुः प्राप्तुम् 'ईश्वरः' समर्थो

भवति ; ततो ‘विजयेन’ शत्रूनभिभूय सर्वं भोगम् ‘आप्नोत्’ आप्नोति । ‘इति’ एवं वरुणस्य पुत्र उद्दालक आह स्म । तस्मात् ‘तं’ क्षत्रियम् ‘एतेन’ व्याहृत्यन्तेन यजुषा अभिषिञ्चेत्, न तु केवलेन । सोऽयं व्याहृत्यन्तो मन्त्रो नित्यप्रयोगे द्रष्टव्यः ; काम्यप्रयोगे तु व्याहृतिविकल्पः पूर्वं मुक्तः* ॥

अभिषेकाङ्गं होमं विधत्ते— “अथैतानि ह वै क्षत्रियादीजानाद् व्युत्क्रान्तानि भवन्ति,—ब्रह्मक्षत्रे ऊर्गन्नाद्य मपा मोषधीनां रसो ब्रह्मवर्चस मिरापुष्टिः प्रजातिः क्षत्ररूपं ; तदथो अन्नस्य रस ओषधीनां क्षत्रं प्रतिष्ठा ; तद्यदेवामू पुरस्तादाहुती जुहोति, तदस्मिन् ब्रह्मक्षत्रे दधाति”—इति । ‘अथ’ अभिषेकानन्तरम्, होम उच्यत इति शेषः । ‘ईजानाद्’ यागं कृतवतः क्षत्रियात् ‘एतानि’ वक्ष्यमाणानि ‘व्युत्क्रान्तानि’ अपगतानि भवन्ति । तानि निर्दिश्यन्ते— ‘ब्रह्मक्षत्रे’ एतस्य समीपे वर्त्तमानं जातिद्वयम्, ‘ऊर्क्’ क्षीरादिरसः, ‘अन्नाद्यम्’ ओदनादिकम् ; तदेतदुभय मपा मोषधीनाञ्च ‘रसः’ सारः । ‘अपां सारः’ क्षीरादिः, ‘ओषधीनां रसः’ अन्नाद्यम् । ‘ब्रह्मवर्चसं’ श्रुताध्ययनसम्पत्तिः, ‘इरापुष्टिः’ अन्नसमृद्धिः, ‘प्रजातिः’ पुत्रोत्पादनम् । तच्च सर्वं क्षत्रियस्य स्वरूपम् ; अत्यन्त मपेक्षितत्वाद् । एतेषां व्युत्क्रान्तौ क्षत्रियस्य स्वरूपहानिरेव भवति । ‘अथो’ अपि च ‘अन्नस्य’ ओदनस्य, ‘रसः’ रसस्य क्षीरादेः, ‘ओषधीनां’ व्रीहियवादीनां ‘क्षत्रं प्रतिष्ठा’ क्षत्रिय आश्रयः । तस्माद् उक्तो व्यतिक्रमः क्षत्रियस्य न युक्तः । ‘तत्’ तथा सति ‘यत्’ यदि ‘अमू’ वक्षिस्ये आहुती अभिषिक्तस्य क्षत्रियस्य पुरस्ताद् जुहुयात्, ‘तत्’

---

* ‘भूरिति’–इत्यादिः, ‘भूर्भुवस्वरिति’–इत्यादिश्च १९५ पृ० ६ पं० द्र० ।

तदानीम् 'अस्मिन्' अभिषेके ब्राह्मणजातिं, क्षत्रियजातिं, तदुपलक्षित मन्त्रादिकं च सर्वं मवस्थापयति। "ब्रह्म प्रपद्ये ०—० स्वाहा"-"क्षत्रं प्रपद्ये ०—० स्वाहा"-इत्याहुतिद्वयं * जुहुयादिति तात्पर्यार्थः † ॥ ३ (७) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (७) ॥

॥ अथ चतुर्थः खण्डः ॥

अथ यदौदुम्बर्यासन्दी भवत्यौदुम्बरश्चमस उदुम्बरशाखोर्ग्वा अन्नाद्य मुदुम्बर ऊर्ज मेवास्मिंस्तदन्नाद्यं दधात्यथ यद् दधि मधु घृतं भवत्यपां स ओषधीनां रसोऽपा मेवास्मिंस्तदोषधीनां रसं दधात्यथ यदातपवर्ष्या आपो भवन्ति तेजश्च ह वै ब्रह्मवर्चसं चातपवर्ष्या आपस्तेज एवास्मिंस्तद् ब्रह्मवर्चसं च दधात्यथ यच्छष्पाणि च तोक्मानि च भवन्तीरायै

---

* पुरस्तात् ७. ४. ४. (११२–११६) द्रष्टव्यम् ।

† तै० सं० १. ८. १४, तै० ब्रा० १. ७. ८, वा० सं० १०. १७, वा० ब्रा० (शत०) ५. ४. २ अभिषेकविवरणं द्रष्टव्यम् ।

तत्पुष्ट्यै रूप मथो प्रजात्या इत्य मेवास्मिंस्तत्पुष्टिं दधात्यथो प्रजाति मथ यत् सुरा भवति क्षत्ररूपं तदथो अन्नस्य रसः क्षत्ररूप मेवास्मिंस्तद्दधात्यथो अन्नस्य रस मथ यद् दूर्वा भवति क्षत्रं वा एतदोषधीनां यद् दूर्वा क्षत्रं राजन्यो नितत इव हीह क्षत्रियो राष्ट्रे वसन् भवति प्रतिष्ठित इव निततेव दूर्वावरोधैर्भूम्यां प्रतिष्ठितेव तद्यद् दूर्वा भवत्योषधीना मेवास्मिँस्तत्* क्षत्रं दधात्यथो प्रतिष्ठा मेतानि ह वै यान्यस्मादीजानाद् व्युत्क्रान्तानि भवन्ति तान्येवास्मिँस्तद् दधाति तैरेवैनं तत्समर्द्धयत्यथास्मै सुरा कंसं हस्त आदधाति स्वादिष्ठया मदिष्ठया पवस्व सोम धारया इन्द्राय पातवे सुत इत्याधाय शान्तिं वाचयति नाना हि वां देवहितं सदस्कृतं मा संसृक्षाथां परमे व्योमनि सुरा त्व मसि शुष्मिणी सोम एष राजा मैनं हिंसिष्टं स्वां योनि माविशन्ताविति सोमपीथस्य चैषा सुरापीथस्य च व्यावृत्तिः पीत्वा यं रातिं मन्येत तस्मा एनां प्रयच्छेत्तद्धि मित्रस्य रूपं मित्र एवैनां तदन्ततः प्रतिष्ठापयति तथा हि मित्रे प्रतितिष्ठति प्रतितिष्ठति य एवं वेद ॥ ४ (८) ॥

---

* "मेवास्मिंस्तत्"—इति क, ग, ङ । एव मित्तोत्तरत्र च ।

अभिषेकसाधनानि क्रमेण प्रशंसितु मादावासन्द्यादित्रयं प्रशंसति— "अथ यदौदुम्बर्यासन्दी भवत्यौदुम्बरश्चमस उदुम्बरशाखोर्ग्वा अन्नाद्य मुदुम्बर ऊर्जं मेवास्मिंस्तदन्नाद्यं दधाति"-इति । आसन्दी-चमस-शाखानां कारणभूतो यः 'उदुम्बरः', सोऽयं रसस्यान्नस्य स्वरूपभूतः ; तेन 'अस्मिन्' यजमाने रसमन्नञ्च सम्पादयति ॥

दध्यादित्रयं प्रशंसति— "अथ यद् दधि मधु घृतं भवत्यपां स ओषधीनां रसोऽपा मेवास्मिंस्तदोषधीनां रसं दधाति"-इति । दधिघृतयोः पशुभक्षिततृणोदकजन्यत्वात् ओषधिरसत्वम् ; मधुनो मधुकरानीतपुष्परसजन्यत्वाद् ओषधिसारत्वम् ॥

आतपसहिता वृष्टिजन्या आपः प्रशंसति— "अथ यदातपवर्ष्या आपो भवन्ति, तेजश्च ह वै ब्रह्मवर्चसं चातपवर्ष्या आपस्तेज एवास्मिंस्तद् ब्रह्मवर्चसं च दधाति"-इति * । आतपसम्बन्धात् तेजस्त्वम्, आहुतिफलरूपवृष्टिसम्बन्धाद् ब्रह्मवर्चसत्वम् ॥

श्यामतृणान्यङ्कुराणि च प्रशंसति— "अथ यच्छष्पाणि च तोक्मानि च भवन्तीरायै तत् पुष्ट्यै रूप मथो प्रजात्या इरा मेवास्मिंस्तत् पुष्टिं दधात्यथो प्रजातिम्"-इति । तृणाना मङ्कुराणां च पशव्यत्वात् तद्भक्षणेन पशुपुष्टिप्रजोत्पादनयोर्दृष्टत्वात् इरापुष्टिप्रजातिरूपत्वम् ॥

---

* आध्वर्य्यवेष्वभिषेकसाधनेषु सप्तदशविधा आपः श्रूयन्ते । ता यथा— सारस्वत्यः, वृष्णऊर्मिः, स्यन्दमानाः, कौशस्त्यः, अपयत्यः, अपाम्पतिः, निवेष्यः, सूर्यत्वचसः, आतपवर्ष्याः, वैशन्त्यः, कूप्याः, प्रुष्वाः, मधु, गोरुल्ब्याः, पयः, घृतम्, मरीच्यः । "स सारस्वतीरेव प्रथमा गृह्णाति"-इत्यारभ्य, "सप्तदशापः सम्भरति"-इत्यन्तः शत० ब्रा० ५. ३. ४. ३-२२ कण्डिका द्रष्टव्याः । षोडश वेति च तत्रापि पक्षान्तरम् । तै० सं० १. ८. ११, तै० ब्रा० १. ७. ५. अपि एवमेव ।

सुरां प्रशंसति — "अथ यत् सुरा भवति, क्षत्ररूपं तद्; अथो अन्नस्य रसः; क्षत्ररूपमेवास्मिंस्तद्दधात्यथो अन्नस्य रसम्"-इति। सुरायाः क्षत्रियस्येव मदयोगात् क्षत्ररूपत्वम्, व्रीह्याद्यङ्कुरजन्यत्वादन्नरसत्वञ्च ॥

दूर्वां प्रशंसति— "अथ यद् दूर्वा भवति; क्षत्रं वा एतदोषधीनां यद् दूर्वा, क्षत्रं राजन्यो, नितत इव हीह क्षत्रियो राष्ट्रे वसन् भवति, प्रतिष्ठित इव; निततेव दूर्वावरोधैर्भूम्यां, प्रतिष्ठितेव; तद्यद् दूर्वा भवत्योषधीनामेवास्मिंस्तत् क्षत्रं दधात्यथो प्रतिष्ठाम्"-इति। ओषधिजातौ दूर्वायाः क्षत्रियजातित्वं राजसम्बन्धिक्षत्रियजातिसाम्यादवगन्तव्यम् *। तदेव साम्यं नितत इवेत्यादिना प्रपञ्च्यते। 'इह' राष्ट्रे क्षत्रियो वसन्, तेषु ग्रामेषु सञ्चारात् स्वपुरुषस्थापनाच्च, स्वयं नितरां 'ततः' विस्तृतः 'इव' राज्यैश्वर्येण प्रतिष्ठित एव भवति; दूर्वा 'अवरोधैः' अधोमुखैः स्वकीयमूलैर्नितरां 'तता इव' व्याप्तेव, स्थैर्याद् एकत्र प्रतिष्ठितेव भवति। तथा सति 'यद्' यत्र दूर्वा भवति, तदानीम् ओषधिसम्बन्धिक्षत्रियजातिम् 'अस्मिन्' यजमाने सम्पादयति, अपि च 'प्रतिष्ठां' स्थैर्यमपि सम्पादयति ॥

प्रत्येकं प्रशस्य समुदायरूपेण प्रशंसति— "एतानि ह वै यान्यस्मादीजानाद् व्युत्क्रान्तानि भवन्ति, तान्येवास्मिंस्तद्दधाति; तैरेवैनं तत्समर्द्धयति"-इति। 'ईजानाद्' यागं कृतवतः 'अस्मात्' क्षत्रियाद् यान्येव 'एतानि' दध्युदुम्बरादीनि व्युत्क्रान्तानि भवन्ति,

---

* "अयं वाव माऽधूर्वीदिति यदब्रवीदधूर्वीन्मेति, तस्माद् धूर्वा; धूर्वा ह वै तां दूर्वेत्याचक्षते परोक्षम्; परोक्षकामा हि देवाः। तदेतत् क्षत्रम्। प्राणो ह्येष रसः"-इति शत० ब्रा० ७. ४. २. १२।

तान्येव 'अस्मिन्' क्षत्रिये सम्पाद्य, तैरेवैनं समृद्धं करोति ॥

अभिषिक्तस्य क्षत्रियस्य पानपात्रं विधत्ते— "अथास्मै सुराकंसं हस्त आदधाति"–इति । 'अथ' अभिषेकानन्तरम्, 'अस्मै' अस्य क्षत्रियस्य हस्ते सुरायुक्तं कांस्यपात्र मादध्यात् ॥

तत्र मन्त्र माह— "स्वादिष्ठया मदिष्ठया पवस्व सोम धारया इन्द्राय पातवे सुतः (मं० ९.१.१.)"–इति । हे सोम ! त्वत्समानं सुराद्रव्यं 'स्वादिष्ठया' अतिशयेन स्वादुभूतया, 'मदिष्ठया' अतिशयेन मदहेतुभूतया त्वदीयया 'धारया' पवस्व यजमानं शोधय । हे द्रव्यविशेष ! 'इन्द्राय पातवे' इन्द्रस्य पानार्थं 'सुतः' अभिषुतः सम्पादितोऽसि ॥

मन्त्रान्तरेण शान्तिवाचनं विधत्ते— "इत्याधाय शान्तिं वाचयति"–इति । 'इति' अनेन पूर्वोक्तमन्त्रेण हस्ते सुरायुक्तं कांस्यपात्र माधाय, वक्ष्यमाणमन्त्रेण शान्तिं वाचयेत् ॥

तं मन्त्रं दर्शयति— "नाना हि वां देवहितं सदस्कृतं ; मा संसृक्षाथां परमे व्योमनि ; सुरा त्व मसि शुष्मिणी, सोम एष राजा, मैनं हिंसिष्टं स्वां योनि माविशन्ताविति"–इति । हे सुरासोमौ ! 'वां' युवयोः 'देवहितं' देवैः सम्पादितं 'सदः' स्थानं 'नाना कृतं' पृथगेव निष्पादितम् । अतः 'परमे व्योमनि' उत्कृष्टे उदराकाशे 'मा संसृक्षाथां' मा संसर्गं कुरुतम् । संसर्गे हि सोमस्य बाधः स्यात् । हे मद्य ! त्वं 'शुष्मिणी' बलवती सुरासि, एष सोमो राजा, तौ बलवन्तौ युवा मुभौ 'स्वां योनि माविशन्तौ' उदरमध्ये विभागेन स्वं स्वं स्थानं प्रविशन्तौ 'एनं' पातारं 'मा हिंसिष्टं' हिंसित मुपद्रुतं मा कुरुतम् । 'इति' एतं मन्त्रं क्षत्रियस्यार्थे कथयित्वा, तं वाचयेत् ॥

तस्य मन्त्रस्य तात्पर्यं दर्शयति— "सोमपीथस्य चैषा सुरापीथस्य च व्यावृत्तिः"—इति । 'एषा' मन्त्रप्रतिपाद्या सोमपानसुरापानयोः परस्परव्यावृत्तिः ; मा संसृक्षाथा मिति संसर्गस्य निषिद्धत्वात् ॥

पीतशेषस्य दानं विधत्ते— "पीत्वा यं रातिं मन्येत, तस्मा एनां प्रयच्छेत्, तद्धि मित्रस्य रूपं; मित्र एवैनां तदन्ततः प्रतिष्ठापयति, तथा हि मित्रे प्रतितिष्ठति"—इति । कांस्यपात्रगतां सुरां क्षत्रियः स्वयं पीत्वा, 'यं' पुरुषं 'रातिं' स्वस्य धनदातारं मित्रं मन्येत, 'तस्मै' पुरुषाय 'एनाम्' अवशिष्टां सुरां प्रयच्छेत् ; 'तत्' एकपात्रगतद्रव्यपानं मित्रस्य स्वरूपम् ; परस्परं मित्रयोः सहभोजनदर्शनात् । 'तत्' तेन दानेन 'अन्ततः' पानान्ते मित्रे एव 'एनां' सुरां प्रतिष्ठापयति । 'तथा हि' तथैव कुर्वन्, स्वय मपि मित्रे प्रतिष्ठितो भवति ॥

वेदनं प्रशंसति— "प्रतितिष्ठति य एवं वेद"—इति ॥ ४ (८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) चतुर्थः खण्डः ॥ ४ (८) ॥

॥ अथ पञ्चमः खण्डः ॥

अथौदुम्बरशाखा मभि प्रत्यवरोह॑त्यूर्ग्वा अन्नाद्य मुदुम्बर॑ ऊर्ज मेव तदन्नाद्य मभि प्रत्यवरोह॑त्युपर्ये-

वासीनो॑ भूमौ पादौ प्रतिष्ठाप्य॑ प्रत्यवरोह मा॑ह प्रतितिष्ठामि द्यावापृथिव्योः॑ प्रतितिष्ठामि प्राणापानयोः॑ प्रतितिष्ठाम्यहोरात्रयोः॑ प्रतितिष्ठाम्यन्नपानयोः॑ प्रति ब्रह्मन् प्रति क्षत्रे॑ प्रत्येषु त्रिषु लोकेषु॑ तिष्ठामीत्यन्ततः॑ सर्वेणात्मना प्रतितिष्ठति॑ सर्वस्मिन् ह वा एतस्मिन् प्रतितिष्ठत्यु॑त्तरोत्तरिणीं ह श्रिय मश्नुते॑ ऽश्नुते ह प्रजाना मैश्वर्यं माधिपत्यं॑ य एव मेतेन पुनरभिषेकेणा॑भिषिक्तः क्षत्रियः प्रत्यवरोह॑त्येतेन प्रत्यवरोहेण प्रत्यवरुह्योपस्थं कृ॑त्वा प्राङासीनो नमो ब्रह्मणे नमो ब्रह्मणे॑ नमो ब्रह्मण इति त्रिष्कृत्वो ब्रह्मणे॑ नमस्कृत्य वर॑ ददामि॑ जित्या अभिजित्यै॑ विजित्यै सञ्जित्या॑ इति वाचं विसृजते॑ स यन्नमो ब्रह्मणे नमो ब्रह्मणे॑ नमो ब्रह्मण इति त्रिष्कृत्वो॑ ब्रह्मणे नमस्करोति॑ ब्रह्मण एव त॑त्क्षत्रं वश मेति॑ तद्यत्र वै ब्रह्मणः क्षत्रं वश मेति॑ तद्राष्ट्रं समृद्धं॑ तद्वीरवदा हास्मिन् वीरो जायते॑ ऽथ यद्वरं ददामि॑ जित्या अभिजित्यै॑ विजित्यै सञ्जित्या॑ इति वाचं विसृजत॑ एतद्वै वाचो जितं॑ यद् ददामीत्याह॑ यदेव वाचो जिता३* तन् म इद मनु कर्म॑ सन्तिष्ठाता इति विसृज्य॑ वाच

---

* "जिता३"-इति क, ख, घ। "जितं३"-इति ग।

मुपोत्थायाहवनीये समिध मभ्यादधाति समिदसि सम्वेड्ध्वेन्द्रियेण वीर्येण स्वाहेतीन्द्रियेणैव तद्वीर्येणात्मान मन्ततः समर्द्धयत्याधाय समिधं त्रीणि पदानि प्राङुदङभ्युत्क्रामति कृषिरसि दिशां मयि देवेभ्यः कल्पत कल्पतां मे योगक्षेमो ऽभयं मे ऽस्त्वित्यपराजितां दिश मुपतिष्ठते जितस्यैवापुनः पराजयाय तत्तदितीँ३ * ॥ ५ (८) ॥

आसन्द्या अवरोहं विधत्ते — "अथोदुम्बरशाखा मभि प्रत्यवरोहत्यूर्ग्वा अन्नाद्य मुदुम्बर ऊर्ज मेव तदन्नाद्य मभि प्रत्यवरोहति"-इति । 'अथ' अभिषेकानन्तरम्, भूमौ उदुम्बरशाखा मवस्थाप्य, तां 'अभि'लक्ष्य प्रत्यवरोहेत् । योऽय मुदुम्बरः स 'ऊर्ज' रसरूप एव ; तत्फले माधुर्यसद्भावात् । तथान्नाद्यस्वरूपश्च ; तद्भक्षणेनोदरपूरणात् । तस्माद् उदुम्बरशाखायां प्रत्यवरोहेणोर्जं मन्नाद्यं चाभिलक्ष्यावरोहति ॥

तत्र प्रकारं विधत्ते — "उपर्येवासीनो भूमौ पादौ प्रतिष्ठाप्य प्रत्यवरोह माह"-इति । आसन्द्या उपर्येव स्वय मुपविष्टः, प्रथमतः पादौ भूमाववस्थाप्य प्रत्यवरोहसाधनभूतं मन्त्रं पठेत् ॥

तं मन्त्रं दर्शयति — "प्रतितिष्ठामि द्यावापृथिव्योः, प्रतितिष्ठामि प्राणापानयोः, प्रतितिष्ठाम्यहोरात्रयोः, प्रतितिष्ठाम्यन्नपानयोः, प्रति ब्रह्मन्, प्रति क्षत्रे, प्रत्येषु त्रिषु लोकेषु तिष्ठा-

---

* "तत्तदितीं३"-इति ग, ङ।

मीति" इति। भूमौ यदवरोहणं, तद् द्यावापृथिव्यादिषु सर्वेष्ववस्थान मिति मन्त्रार्थः॥

अनेन मन्त्रेण क्रियमाणं प्रत्यवरोहं प्रशंसति—"अन्ततः सर्वेणात्मना प्रतितिष्ठति, सर्वस्मिन् ह वा एतस्मिन् प्रतितिष्ठत्युत्तरोत्तरिणीं ह श्रिय मश्नुते, अश्नुते ह प्रजाना मैश्वर्य माधिपत्यं, य एव मेतेन पुनरभिषेकेणाभिषिक्तः क्षत्रियः प्रत्यवरोहति" इति। 'यः' क्षत्रियः उक्ताभिषेकादूर्ध्व मनेन मन्त्रेण प्रत्यवरोहति, स पुरुषः 'अन्ततः' अभिषेकस्यान्ते धनिकत्वादिना सर्वेण रूपेण प्रतिष्ठितो भवति। 'एतस्मिन् सर्वस्मिन्' द्यावापृथिव्यादिके प्रतिष्ठितो भवति। उत्तरेत्यादि पूर्ववद् (१८०.७०) योजनीयम्॥

प्रत्यवरोहादूर्ध्वं कर्त्तव्यं विधत्ते—"एतेन प्रत्यवरोहेण प्रत्यवरुह्योपस्थं कृत्वा, प्राङासीनो नमो ब्रह्मणे नमो ब्रह्मणे नमो ब्रह्मण इति त्रिष्कृत्वो ब्रह्मणे नमस्कृत्य, वरं ददामि जित्या अभिजित्यै विजित्यै सञ्जित्या इति वाचं विसृजते" इति। प्रत्यवरुह्येति दीर्घश्छान्दसः। 'एतेन' पूर्वोक्तेन प्रत्यवरोहमन्त्रेण 'प्रत्यवरुह्य' भूमौ 'उपस्थम्' आसनविशेषं * कृत्वा, प्राङ्मुख आसीनो नमस्कारमन्त्रं त्रिः पठित्वा, वर मित्यादिमन्त्रेण वाचं विसृजेत्। वाग्विसर्गो लौकिकव्यवहारः। 'जितिः' जयसामान्यम्। अभितः सर्वेषु देशेषु जितिः 'अभिजितिः'। प्रबलदुर्बलशत्रूणां तारतम्येन विविधो जयः 'विजितिः'। पुनः शत्रूत्थानाभावाय सम्यग् जितिः 'सञ्जितिः'। एतत्सिद्ध्यर्थं ब्राह्मणाय 'वरं' गां ददामि †॥

---

* "सुसमन्वक्षोरिरश्चिभ्यां जानुभ्यां सोपस्थं कृत्वा यथा प्रकृति निषद्यन्"—इति आश्व० श्रौ० ६. ५. ४।

† "वरो दक्षिणा"—इति तै० सं० १. ८. २। तै० आर० २. १६. ३। "वरो दक्षिणा

नमस्कारमन्त्रं प्रशंसति— "स यन्नमो ब्रह्मणे नमो ब्रह्मणे नमो ब्रह्मण इति त्रिष्कृत्वो ब्रह्मणे नमस्करोति, ब्रह्मण एव तत्क्षत्रं वश मेति; तस्मात वै ब्रह्मणः क्षत्रं वश मेति, तद्राष्ट्रं समृद्धं, तद्वीरवदा ह्यस्मिन् वीरो जायते"-इति। 'सः' क्षत्रियो मन्त्रेणनमस्करोतीति यदस्ति, तेन 'ब्रह्मण एव' ब्राह्मणस्यैव क्षत्रियजातिर्वश मेति। 'तत्' तेन ब्राह्मणाधीनत्वेन तद्राष्ट्रं सर्ववस्तुसमृद्धं वीरपुरुषोपेतं च भवति; 'अस्मिन्' क्षत्रिये 'वीरः' पुरुष आजायते ॥

वरदानमन्त्रं प्रशंसति— "अथ यद्वरं ददामि, जित्या अभिजित्यै विजित्यै सञ्जित्या इति वाचं विसृजते; एतद्वै वाचो जितं, यद्वरं ददामीत्याह; यदेव वाचो जिताँ३; तन् म इद मनु कर्म सन्तिष्ठाता इति"-इति। वर मित्यादिमन्त्रेण वाचं विसृजत इति यदस्ति (२०६ पृ०), तस्मिन् मन्त्रस्वरूपे ददामीति यदाह, एतदेव वाक्सम्बन्धि 'जितं' जयः। यदेव वाचो जित मस्ति, [पूजार्थं जिता मिति दीर्घः *] 'तद्' वाग् वश्यरूपं 'मे' मदीयम् 'इदं कर्म' अनुष्ठानं 'सन्तिष्ठाते' सम्यगवतिष्ठताम्; 'इति' तस्य मन्त्रस्याभिप्रायः ॥

समिदाधानं विधत्ते — "विसृज्य वाच मुपोत्थायाहवनीये समिध मभ्यादधाति"-इति। उक्तेन प्रकारेण वाङ्नियमं परित्यज्य, तस्मादासनात् उत्थितो वक्ष्यमाणमन्त्रेणाहवनीये समिधं प्रक्षिपेत् ॥

वरो हि राज्यम्"-इति तै० ब्रा० १. ६. १. ५। "पशुर्दक्षिणा धेनुर्वरो वा"-इति कात्या० श्रौ० ६. ७. २९। "आचार्याय वरं ददाति; गौर्ब्राह्मणस्य, ग्रामो राजन्यस्य"-इति पार० गृ० १. १०. १२; "अत्र निविदो अस्त०—० वर मेव ददाति"-इति २भा० ४२पृ० ।

* मदृष्टेषु सर्वेष्वेव पुस्तकेषु 'जिताँ३'-इति प्लुताङ्को विद्यते; पूजार्था प्लुतिरेवोक्षिता, उक्तञ्च तथा सङ्गतेव, पश्यत चोपरिष्टादमेकत (२०९ पृ०)।

तं मन्त्रं दर्शयति—"समिदसि सम्येङ्क्ष्वेन्द्रियेण वीर्येण स्वाहेति"-इति। हे काष्ठ! त्वं 'समिदसि' समिन्धनसाधनमसि। इङ्खति-धातोर्लोण्मध्यमपुरुषैकवचनम् 'एउङ्क्ष्व'-इति; स च गत्यर्थः *। 'उ'-शब्दोऽनर्थकः। इन्द्रियपाटवेन, शरीरसामर्थ्येन च 'समेङ्क्ष्व' संयोजय, तदर्थं स्वाहुतमिदमस्तु॥

मन्त्रस्य तात्पर्यं दर्शयति—"इन्द्रियेणैव तद्वीर्येणात्मानमन्ततः समर्धयत्याधाय समिधं त्रीणि पदानि प्राङुदङभ्युत्क्रामति"-इति। 'तत्' तेन समिदाधानमन्त्रेण आत्मानमभिषेककर्मान्ते वीर्येन्द्रियाभ्यां समृद्धं करोति। समिधं प्रक्षिप्य प्राङ्मुख उदङ्मुखो वा पदत्रयमभित उत्क्रामेत्। यद्वा प्राङुदङिति अन्तरालवर्तिनीमैशानीं दिशमभिलक्ष्योत्क्रामेत्॥

तत्र मन्त्रं दर्शयति—"कृमिरसि दिशां मयि देवेभ्यः कल्पत, कल्पतां मे योगक्षेमोऽभयं मेऽस्तु"-इति। दिग्विशेषमभिलक्ष्य क्रियमाणं त्रैपदोत्क्रमणं दिशां 'कृमिः' कल्पनं, स्वाधीनत्वसम्पादनम्; तथा सम्पादकमसि। अतो मयि देवार्थं 'कल्पत' कल्पनं सामर्थ्यं कुरु। बहुवचनं छान्दसम्। 'मे' मम 'योगक्षेमः' योगसहितः क्षेमः 'कल्पताम्' सम्पाद्यताम्; तथैव 'मे' मम सर्वत्र 'अभयं' भयराहित्यमस्तु॥

दिगुपस्थानं विधत्ते—"इत्यपराजितां दिशमुपतिष्ठते, जितस्यैवापुनः पराजयाय; तत्तद्वितीर्"-इति। 'इति' अनेन पूर्वोक्तेन कृमिरसीत्यादिनैव मन्त्रेण पराजयरहितां प्राचीमुदीचीं वा दिशमुपतिष्ठते। अथवा 'अपराजितां दिशम्' ऐशानीम् उपतिष्ठते। पूर्वं जितस्यैव दिग्विशेषस्य, पुनः परा-

---

* "उख उखि०—०इख इखि०—०रिगि लिगि गत्यर्थाः"-इति धा०पा०भ्वा०१३८-१५५।

जयरक्षित्वार्थं मुपस्थानम् । लोकाश्च सर्वे तदुपस्थान मिति पूजयन्ति । पूजार्थेयं सानुनासिका प्लुतिः ॥ ५ (८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) पञ्चमः खण्डः ॥ ५ (८) ॥

॥ अथ षष्ठः खण्डः ॥

देवासुरा वा एषु लोकेषु संयेतिरे त एतस्यां प्राच्यां दिशि येतिरे तांस्ततो ऽसुरा अजयंस्ते दक्षिणस्यां दिशि येतिरे तांस्ततो ऽसुरा अजयंस्ते प्रतीच्यां दिशि येतिरे तांस्ततो ऽसुरा अजयंस्त उदीच्यां दिशि येतिरे तांस्ततो ऽसुरा अजयंस्त एतस्मिन्नवान्तरदेशे येतिरे य एष प्राङुदङ् ते ह ततो जिग्युस्तं यदि क्षत्रिय उपधावेत्सेनयोः समायत्योस्तथा मे कुरु यथाह मिमां सेनां जयानीति स यदि तथेति ब्रूयाद् वनस्पते वीड्वङ्गो हि भूया इत्यस्य रथोपस्थ मभिमृश्याथैनं ब्रूयादातिष्ठस्वैतां ते दिश मभिमुखः सन्नद्धो रथो ऽभिप्रवर्त्ततां * स उदङ् स प्रत्यङ् स

---

* "ऽभिप्रवर्त्ततां"—इति क ।

दक्षिणा स प्राङ् सो ऽभ्यमित्र मित्यभीवर्त्तेन हविषेत्येतेनैन मावर्त्तयेदथैन मन्वीक्षेताप्रतिरथेन शासेन सौपर्णेनेति जयति ह तां सेनां यद्यु वा एन मुपधावेत्सङ्ग्रामं संयतिष्यमाणस्तथा मे कुरु यथा ऽह मिमं सङ्ग्रामं सञ्जयानीत्येतस्या मेवैनं दिशि यातयेज्जयति ह तं सङ्ग्रामं यद्यु वा एन मुपधावेद्राष्ट्रादवरुध्यमानस्तथा मे कुरु यथा ऽह मिदं राष्ट्रं पुनरवगच्छानीत्येता मेवैनं दिश मुपनिष्क्रमयेत् तथाह राष्ट्रं पुनरवगच्छत्युपस्थायामित्राणां व्यपनुत्तिं ब्रुवन् गृहानभ्येत्यप प्राच इन्द्र विश्वाँ अमित्रानिति सर्वतो हास्मा अनमित्र मभयं भवत्युत्तरोत्तरिणीं ह श्रिय मश्नुते ऽश्नुते ह प्रजाना मैश्वर्य माधिपत्यं य एव मेता ममित्राणां व्यपनुत्तिं ब्रुवन् गृहानभ्येत्यथ गृहान् पश्चाद् गृह्यस्याग्नेरुपविष्टायान्वारब्धाय ऋत्विगन्ततः कंसेन चतुर्गृहीतास्तिस्र आज्याहुतीरैन्द्रीः प्रपदं जुहोत्यनार्त्या अरिष्ट्या अज्यान्या अभयाय ॥ ६ (१०) ॥

अपराजितां दिश मुपतिष्ठत इति यदुक्तं, तत्रैशान्या दिशो मुख्यापराजितत्वं दर्शयति — "देवासुरा वा एषु लोकेषु संयेतिरे ; त एतस्यां प्राच्यां दिशि येतिरे ; तांस्ततो ऽसुरा अजयंस्ते दक्षिणस्यां दिशि येतिरे ; तांस्ततो ऽसुरा अजयंस्ते प्रतीच्यां दिशि

येतिरे ; तांस्ततोऽसुरा अजयंस्त उदीच्यां दिशि येतिरे ; तांस्ततोऽसुरा अजयंस्त एतस्मिन्नवान्तरदेशे येतिरे ; य एष प्राङुदङ् ते ह ततो जिग्युः"—इति । पुरा कदाचिद् देवाश्च असुराश्च 'एषु' भूरादिलोकेषु निमित्तभूतेषु 'संयेतिरे' युद्धं कृतवन्तः । तत्र प्राच्यादिषु चतसृषु यत्रयत्र युद्धं कृतम्, तत्रतत्रासुराणा मेव विजयोऽभूत् । 'य एष प्राङुदङ्' दिग्द्वयस्पर्शी कश्चिदवान्तरदेश ऐशान्यात्मकः, एतस्मिन् देशे यदा युद्धं कृतं, तदा 'ते' देवाः 'ततः' देशान्निमित्तभूतात् 'जिग्युः' जयं प्राप्ताः । तस्मादिय मैशानी दिगपराजिता पूर्वोक्तमन्त्रेणोपस्थेया ॥

त मेत मभिषिक्तक्षत्रियवृत्तान्तं तावदवस्थाप्य, तत्प्रसङ्गागतं पुरुषान्तरवृत्तान्तं दर्शयति— "तं यदि क्षत्रिय उपधावेत् सेनयोः समायत्योस्तथा मे कुरु, यथाह मिमां सेनां जयानीति ; स यदि तथेति ब्रूयाद्, वनस्पते वीड्वङ्गो हि भूया इत्यस्य रथोपस्थ मभिमृश्याथैनं ब्रूयाद्"—इति । क्वचिद् * देशे युद्धार्थ मुभे सेने परस्परं समागच्छतः । तयोः समागच्छन्त्योः 'सेनयोः' मध्ये यः कोऽपि 'क्षत्रियः' विजयार्थी सन् 'तम' अभिषिक्तं ऐशानीदिगुपस्थानयुक्तं राजानं यदि 'उपधावेत्' शरणं गच्छेत् । केन अभिप्रायेण ? इति, सोऽभिधीयते— हे अभिषिक्त क्षत्रिय! यथा अहम् इमां शत्रुसेनां जयानि, तथा मे अनुग्रहं कुरु इति तदभिप्रायः । तदानीं 'सः' अभिषिक्तः क्षत्रियः यदि 'तथा—इति' अङ्गीकारं ब्रूयात्, तदानीं "वनस्पते"—इत्यृचा (सं० ६. ४७. २६. †) जयार्थिनः पुरुषस्य रथोर्ध्वभाग मभिमृश्यानन्तरम् 'एनं' जयार्थिनं प्रति वक्ष्यमाणं मन्त्रं ब्रूयात् ॥

---

* 'कस्मिंश्चिद्' ख ।

† आश्व० गृ० सू० २, ६, ८० ।

तं मन्त्रं दर्शयति— "आतिष्ठस्वैतां ते दिश मभिमुखः सन्नद्धो रथोऽभिप्रवर्त्ततां ; स उदङ्, स प्रत्यङ्, स दक्षिणा, स प्राङ्, सोऽभ्यमित्र मिति"-इति। हे जयार्थिन् ! 'एताम्' ऐशानीं दिशम् 'आतिष्ठस्व' प्राप्नुहि। ते रथः 'एताम्' ऐशानीं दिशं प्रत्यभिमुखः 'सन्नद्धः' सर्वायुधादिसन्नाहोपेतः अभितः प्रवर्त्तताम्। ततः 'सः' रथ उदङ्मुखः प्रवर्त्तताम् ; ततः 'सः' रथः प्रत्यङ्मुखः प्रवर्त्तताम् ; ततः 'सः' रथः दक्षिणामुखः प्रवर्त्तताम् ; ततः 'सः' रथः प्राङ्मुखः प्रवर्त्तताम् ; तत ऊर्द्ध्वम् 'अभ्यमित्र' त्वदीयं शत्रुं प्रति प्रवर्त्तताम् ॥

जयार्थिनं प्रति एतन्मन्त्रकथनादूर्द्ध्व मभिषिक्तस्य कर्त्तव्यं दर्शयति— "अभीवर्त्तेन हविषेत्येवैन मावर्त्तयेदथैन मन्वीक्षेता-प्रतिरथेन शासेन सौपर्णेनेति"-इति। "अभीवर्त्तेन" इत्यादिसूक्तेन (सं० १०.१७४. *) 'एनं' जयार्थिनं सूक्तक्रमेण दिक्ष्वावर्त्तयेत्। 'अथ' अनन्तर मावर्त्तमान मेनं सूक्तत्रयेण अन्वीक्षेत। "आशुः शिशानः"-इति (सं० १०.१०३. †) अप्रतिरथं सूक्तम्, "शास इत्था"-इति (सं० १०. १५२. ‡) शाससूक्तम्, "प्र धारा यन्तु मधुनः"-इति सौपर्णं सूक्तम् § ॥

अभिषिक्तस्य कृत्य मुक्त्वा जयार्थिनः फलं दर्शयति—"जयति ह तां सेनाम्"-इति ॥

सेनाद्वययुद्धे जयार्थं प्रयोग मुक्त्वा पुरुषद्वन्द्वयुद्धेऽपि त माह— "यद्यु वा एन मुपधावेत्सङ्ग्रामं संयतिष्यमाणस्तथा मे कुरु यथाऽह मिमं सङ्ग्रामं सञ्जयामीत्येतस्या मेवैनं दिशि यातयेज्जयति ह

---

* आश्व० गृ० सू० ३. ११ द्र०। †, ‡ आश्व० गृ० ३. १२ द्र०।

§ आश्व० गृ० ३, १२, १५,— ऋभा० ३५०पृ० द्र०।

तं सङ्ग्रामम्"-इति । यः कोऽपि पुमान् 'संयतिष्यमाणः' युद्धं करिष्यन् तं सङ्ग्रामं जेतुम् 'एनम्' अभिषिक्तं यदि उपधावेत्, तथा मे कुर्विति पूर्ववत् (२११ पृ०) ॥

राष्ट्राद् भ्रष्टस्य पुनरपि राष्ट्रप्राप्त्यर्थं प्रयोगं दर्शयति—"यद्यु वा एन मुपधावेद्राष्ट्रादपरुध्यमानस्तथा मे कुरु यथाऽह मिदं राष्ट्रं पुनरवगच्छानीत्येता मेवैनं दिश मुपनिष्क्रमयेत्तथा ह राष्ट्रं पुनरवगच्छति"-इति । यथा वै सेनयोर्युद्धे पुरुषयोर्युद्धे वा अभिषिक्तेन उदीचीं दिशं प्रति प्रस्थापितस्य जयः, तथैव राष्ट्रभ्रष्टोऽपि अभिषिक्तेनैशानीं दिशं प्रस्थापितो राष्ट्रं पुनः प्राप्नोति ॥

इत्थं प्रासङ्गिकं प्रयोगत्रय मुक्त्वा प्रकृत मेव अभिषिक्तविषयं प्रयोग माह—"उपस्थायामित्राणां व्यपनुत्तिं ब्रुवन् गृहानभ्येत्यप प्राच इन्द्र विश्वाँ अमित्रानिति सर्वतो हास्मा अनमित्र मभयं भवत्युत्तरोत्तरिणीं ह श्रिय मश्नुते ; ऽश्नुते ह प्रजाना मैश्वर्यं माधिपत्यं ; य एव मेता ममित्राणां व्यपनुत्तिं ब्रुवन् गृहानभ्येति"-इति । पूर्वत्र (२०८ पृ०) "कृमिरसि"-इत्यादिमन्त्रेण अभिषिक्तस्य पदत्रयाभ्युत्क्रमेणैशानदिगुपस्थानं चाभिहितम्, तां दिश मुपस्थाय, अनन्तरम् 'अमित्राणां' शत्रूणां 'व्यपनुत्तिं' विशेषेणापनोदनहेतुम्, अत एव व्यपनुत्त्यभिधानाम् "अप प्राचः"-इत्यादिका मृचं (सं०१०.१३१.१.) ब्रुवन्, स्वगृहानभिगच्छेत् । तस्या मृचि द्वितीयपादे नुदस्वेतिश्रवणादियमृगमित्राणां व्यपनुत्तिः । 'अस्मै' एवं गृह मागच्छतोऽस्य यजमानस्य 'सर्वतः' सर्वासु दिक्षु शत्रुराहित्यलक्षण मभयं भवति । न केवलं भयराहित्यं किन्तु उत्तरोत्तराभिवृद्धिमन्यत्रामुत्रपायादिक मपि यथोक्तमन्त्रोच्चारणेन गृहानभ्यागतो भवति ॥

गृहप्राप्तेरूर्ध्वं कर्त्तव्यं विधत्ते— "एत्य गृहान् पश्चाद् गृह्यस्याग्नेरुपविष्टायान्वारब्धाय ऋत्विगन्ततः कंसेन चतुर्गृहीतास्तिस्र आज्याहुतीरैन्द्रीः प्रपदं जुहोत्यनार्त्त्या अरिष्ट्या अज्यान्या अभयाय"–इति। 'एत्य' गृहान् प्रत्यागत्य, योऽयं 'गृह्यः' गृहे वर्त्तमानः औपासनोऽग्निः, तस्य पश्चाद् भागे 'उपविष्टाय' आसीनाय ऋत्विजे 'अन्वारब्धाय' उपस्पृष्टवते क्षत्रियाय, तादृशस्य क्षत्रियस्य अनार्त्त्यादिसिद्ध्यर्थम् 'ऋत्विक्' अध्वर्युः 'अन्ततः' सर्वप्रयोगान्ते 'कंसेन' कांस्यपात्रेण 'चतुर्गृहीताः' चतुर्वारस्वीकृताः 'ऐन्द्रीः' इन्द्रदेवताकाः वक्ष्यमाणैस्त्रिभिः मन्त्रैस्तिस्र आज्याहुतीः प्रपदं यथा भवति तथा जुहुयात्। 'प्रपद' प्रकृष्टं पदम्। तथा च आहुः—

"पादा यस्यास्तु यावन्तो यावदक्षरसम्मिताः।
ऋच्यध्ययन मेतेषां प्रपदं तद्विदुर्बुधाः"–इति॥

अतः प्रपदशब्देन अक्षरपादादिविकल्परहितं लाक्षणिक मुच्चारण मभिधीयते। 'अनार्त्तिः' व्याधिपीडाराहित्यम्। 'अरिष्टिः' शत्रुभिरहिंसा। 'अज्यानिः' द्रव्यहानिराहित्यम्। 'अभयं' चौरादिभयराहित्यम् *॥ ६ (१०)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) षष्ठः खण्डः॥ ६ (१०)॥

---

* तै० सं० १, ८, १५, तै० ब्रा० १, ७, ९, शत० ब्रा० ५, ४, ३, कात्या० श्रौ० १५, ६ ४०।

॥ अथ सप्तमः खण्डः ॥

पर्यू षु प्र धन्व वाजसातये परि वृत्रा भूर्ब्रह्म प्राण ममृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये सह प्रजया सह पशुभिर्णि सक्षणिर्द्विषस्तरध्या ऋणया न ईयसे स्वाहा अनु हि त्वा सुतं सोम मदामसि महे सम भुवो ब्रह्म प्राण ममृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये सह प्रजया सह पशुभिर्य राज्ये वाजाँ अभि पवमान प्रगाहसे स्वाहा अजीजनो हि पवमान सूर्यं विधारे श स्वर्ब्रह्म प्राण ममृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये सह प्रजया सह पशुभिः क्मना पयो गोजीरया रंहमाणः पुरन्ध्या स्वाहेत्यनार्तो ह वा अरिष्टो ऽजीतः सर्वतो गुप्तस्त्रय्यै विद्यायै रूपेण सर्वा दिशो ऽनु सञ्चरत्यैन्द्रे लोके प्रतिष्ठितो यस्मा एता ऋत्विगन्ततः कांसेन चतुर्गृहीतास्तिस्र आज्याहुतीरैन्द्रीः प्रपदं जुहोत्यथान्ततः प्रजाति माशास्ते गवा मश्वानां पुरुषाणा मिह गावः प्रजायध्व मिहाश्वा इह पूरुषाः इहो सहस्रदक्षिणो वीरस्त्राता निषीदत्विति बहुर्ह वै प्रजया पशुभिर्भवति य एव मेता मन्ततः प्रजाति माशास्ते गवा मश्वानां पुरुषाणा मेष ह वाव क्षत्रियो विकृष्टो य मेवंविदो

याजयन्त्यथ ह तं व्येव कर्षन्ते यथा ह वा इदं निषादा वा सेळगा वा पापकृतो वा वित्तवन्तं पुरुष मरण्ये गृहीत्वा कर्त्त मन्वस्य वित्त मादाय द्रवन्त्येव मेव त ऋत्विजो यजमानं कर्त्त मन्वस्य वित्त मादाय द्रवन्ति य मनेवंविदो याजयन्त्येतद्ध स्म वै तद्विद्वानाह जनमेजयः पारिक्षित एवंविदं हि वै मा मेवंविदो याजयन्ति तस्मादहं जयाम्यभीत्वरीं सेनां जयाम्यभीत्वर्या सेनया न मा दिव्या न मानुष्य इषव ऋच्छन्त्येष्यामि सर्व मायुः सर्वभूमिर्भविष्यामीति न ह वा एनं दिव्या न मानुष्य इषव ऋच्छन्त्येति सर्व मायुः सर्वभूमिर्भवति य मेवंविदो याजयन्ति याजयन्ति ॥ ७ (११) ॥

इत्यैतरेयब्राह्मणेऽष्टमपञ्चिकायां द्वितीयोऽध्यायः ॥२॥

छत्राद्युत्थयं प्रथमं मन्त्र माह - "पर्यू षु प्र धन्व वाजसातये परि वृत्रा भूर्बश्च प्राण ममृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये ; सह प्रजया सह पशुभिर्णि सक्षणिर्द्विषस्तरध्या ऋणया न ईयसे स्वाहा"-इति । अत्र "पर्यूषु"-इत्यादिकाया ऋचः परि वृत्राणि सक्षणिरिति द्वितीयः पादः* ; तस्मिन् पादे 'वृत्राणि'-इति यत् पदं , तस्य पदस्य मध्ये भूरित्यादिकं पशुभि

---

* "पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः । द्विषस्तरध्या ऋणया न ईयसे"-इति ऋ० ९. ११०, १ ।

रित्यन्तं पदजातं प्रक्षेपणीयम् । हवेत्येतदक्षरद्वयं पुरस्तात्, षीत्येतत् परस्तात्, मध्ये प्रक्षेपः । अत एव अस्योच्चारणस्य प्रपद मिति नाम सम्पन्नम् । प्रक्षिप्तं पदजातं यस्मिन् उच्चारणे तदुच्चारणं 'प्रपदम्' । तत्र तावत् संहितायां माम्नातायां ऋचो ऽय मर्थः— हे इन्द्र ! 'वाजसातये' अन्नलाभाय । 'परि-ऊ-षु'-इति निपातत्रयसमूहेन परित इत्येतावानेवार्थो ऽभिधीयते । 'परितः' सर्वतः 'प्र धन्व' प्रकर्षेण धारय । धारणार्थो धन्वति-धातुः । अस्मभ्य मन्नं धातुं चित्तं धारयेत्यर्थः । 'वृत्राणि' शत्रून् 'परि सक्षणिः' परितः निराकरिष्णुर्भव । सक्षणि-धातुरौचित्यान्निराकरणं ब्रूते । 'द्विषः' शत्रून् 'तरध्यै' तरितुम् 'ऋणयाः' प्रयत्नशीलः, 'नः' अस्मदर्थम् 'ईयसे' चेष्टसे इति । अस्या मृचि 'वृत्राणि' -इतिपदस्य मध्ये प्रक्षिप्तस्य भूरित्यादि-पशुभिरित्यन्त-पदजातस्याय मर्थः— 'अयं' क्षत्रियः 'असौ' विष्णुगुप्तादिनामको भूरादीन् 'प्रपद्यते' शरणं गच्छति । 'भूः' पृथिवी 'ब्रह्म' वेदः, 'प्राणः' प्रसिद्धः, 'अमृतं' मरणरहितम् । देवतारूपं भूरादिकं शरणं प्रपन्नस्य क्षत्रियस्य 'प्रजया' पुत्रादिरूपया सह, 'पशुभिः' गवादिभिश्च सह 'स्वस्तये' क्षेमार्थं, त्वं 'शर्म' सुखं, 'वर्म' कवचम्, 'अभय'' भयरहितं देवतादिरूपं स्थानञ्च, कुर्विति शेषः । एतस्मिन्नर्थे 'स्वाहा' तुभ्य मिदं सुहुत मस्तु ॥

प्रपदनामकं प्रथमं मन्त्र मुक्त्वा, तन्नामकं द्वितीयं मन्त्र माह—"अनु हि त्वा सुतं सोम मदामसि महे सम भूवो ब्रह्म प्राण ममृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये सह प्रजया सह पशुभिर्य राज्ये वाजाँ अभि पवमान प्र गाहसे स्वाहा"-इति । अत्रापि "अनु हि त्वा"-इत्येतस्या मृचि 'महे समर्य राज्ये'-इति द्वितीयः

पादः * । तत्र 'समर्य'–इति यत् पदं, तस्य समेत्यक्षरद्वय मधस्तात् कृत्वा, र्यंत्येतत् तृतीय मक्षर मुपर्यवस्थाप्य, भुव इत्यादिकं पदजातं प्रक्षेपणीयम् । तस्या ऋचोऽय मर्थः — हे सोम ! 'सुतम्' अभिषुतं त्वाम् 'अनुमदामसि' वयं हृष्यामः । समरं युद्धम्, तदर्हति 'समर्यः' शूरः ; तथाविध हे इन्द्र ! 'महे' महति राज्ये † 'एनं' क्षत्रियं, स्थापयेति शेषः । हे 'पवमान' शोधक ! 'वाजान्' अन्नानि 'अभिप्रगाहसे' सर्वतः प्रकर्षेण गाहसे विलोडयसि, सम्पादयसीत्यर्थः । पदमध्ये प्रक्षिप्तस्य पदजातस्य आदौ 'भुवः'–इत्यक्षरमिच मुच्यते ; ब्रह्मेत्यादिकं स्वाहाकारान्तं पूर्ववत् (२१७ पृ०) ॥

प्रपदनामकं तृतीयं मन्त्र माह — "अजीजनो हि पवमान सूर्यं विधारे श स्वर्ब्रह्म प्राण ममृतं प्रपद्यते ऽय मसौ शर्म वर्माभयं स्वस्तये सह प्रजया सह पशुभिः क्मना पयो गोजीरया रंहमाणः पुरन्ध्या स्वाहेति"–इति । अत्रापि 'विधारे शक्मना'–इति द्वितीयः पादः ‡। तत्र तस्य शक्मनेतिपदस्य शेत्येक मक्षर मधस्तादुत्कार्य, क्मनेत्यक्षर मुपरिष्टादवस्थाप्य, मध्ये स्वरित्यादिकं पशुभिरित्यन्तं पदजातं प्रक्षेपणीयम् । तस्या ऋचोऽय मर्थः— हे 'पवमान' शोधक ! इन्द्र ! त्वं सूर्यम् 'अजीजनः' उत्पादितवानसि । 'शक्मना' स्वशक्त्या 'पयः' जलं 'विधारे' विशेषेण

---

* "अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये । वाजाँ अभि पवमान प्र गाहसे"–इति सं० ९, ११०, २ ।

† पदसंहितायां तु 'समर्यराज्ये'–इत्येकं पदं, अवग्रहणं कृतं च तद्व्याख्यानं कृत मनेनैवाचार्येण संहिताभाष्ये ।

‡ "अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः । गोजीरया रंहमाणः पुरन्ध्या"–इति सं० ९. ११०. ३ ।

मेघमध्ये धारयसि । ‘गोजीरया’ गवां जीवनेन निमित्तेन ‘रंहमाणः’ वृष्टिप्रदानार्थं सञ्चरन्, ‘पुर’ पूर्णफलं ‘ध्या’ चिन्तया *। गोजीरयेत्युपलक्षणं, सर्वप्राणिजीवन मित्यर्थः । अत्रापि ‘शक्मना’-इतिपदमध्ये प्रक्षिप्तस्य पदजातस्यादौ ‘स्वः’-इति द्युलोकोऽभिधीयते ; वक्ष्वेत्यादिकं स्वाहाकारान्तं पूर्ववत् (२१७ पृ०)। एतेषां प्रपदनामकानां मन्त्राणां लक्षणं पूर्व मेव ‘पादा यस्यास्तु’-इतिश्लोकेनोदाहृतम् (२१४ पृ०)। पर्युष्वित्यादिकाया ऋचो मध्ये मूर्द्धा पाणीत्यादिकायाः अस्या ऋचो यावन्तः पादाः यावदक्षरसम्मिताः, तेषां सर्वेषां पतनं प्रपद मिति तस्य लक्षणवाक्यस्यार्थः ॥

उक्तमन्त्रत्रयसाध्या आहुतीः प्रशंसति— “अनार्त्तो ह वा अरिष्टोऽजीतः सर्वतो गुप्तस्त्रय्यै विद्यायै रूपेण सर्वा दिशोऽनुसञ्चरत्यैन्द्रे लोके प्रतिष्ठितो यस्मा एता ऋत्विगन्ततः कंसेन चतुर्गृहीतास्ता आज्याहुतीरैन्द्रीः प्रपदं जुहोति”-इति । ‘यस्मै’ क्षत्रियाय ‘ऋत्विक्’ अध्वर्युः ‘अन्ततः’ अभिषेकप्रयोगान्ते यथोक्तक्रमेण जुहोति । असौ क्षत्रियः ‘अनार्त्तः’ रोगरहितः, ‘अरिष्टः’ शत्रुभिरहिंसितः, तैः शत्रुभिः युद्धेऽप्यजितः†, सर्वतो ‘गुप्तः’ इन्द्रेण रक्षितः । केन साधनेन रक्षित इति, तदुच्यते— ‘त्रय्यै विद्यायै रूपेण’ वेदत्रयोक्तमन्त्रेणेत्यर्थः । तेन रक्षितः सन्, ‘सर्वा दिशः’ प्राच्याद्याः ‘अनुसञ्चरति’ अनुक्रमेण विजयार्थं प्रवर्त्तते, मरणादूर्द्ध्वम् ऐन्द्रे लोके प्रतिष्ठितो भवति ॥

होमादूर्द्ध्व माशीर्मन्त्रपाठं विधत्ते— “अथान्ततः प्रजाति

---

* “‘पुरन्ध्या’ बहुविधप्रज्ञानेन”-इति संहिताभाष्ये सायणः ।

† मूलपाठन्तु अजीत इति दीर्घमध्य ; तथैव आम्नान मजित इति ।

माशास्ते,— गवा मश्वानां पुरुषाणा मिह गावः प्रजायध्व मिहाश्वा इह पूरुषाः इहो सहस्रदक्षिणो वीरस्त्राता निषीदत्विति"-इति । 'अथ' होमानन्तरम्, 'अन्ततः' प्रयोगान्ते "इह गावः"-इत्यादिमन्त्रेण * गवादीनां 'प्रजातिम्' उत्पत्तिम् 'आशास्ते' प्रार्थयेत । मन्त्रस्याय मर्थः-- गावः 'इह' राष्ट्रे 'प्रजायध्वं' प्रकर्षेणोत्पन्ना भवत । एव मश्वाः, पुरुषाश्च । 'इहो' अस्मिन्नेव राष्ट्रे 'सहस्रदक्षिणः' यागेषु सहस्रसङ्ख्यदक्षिणादानशीलो 'वीरः' पुत्रः 'त्राता' प्रजानां रक्षकः सन्, निषीदतु ॥

अनेन मन्त्रेण प्रार्थनं प्रशंसति— "बहुर्ह वै प्रजया पशुभिर्भवति य एव मेतां मन्त्रतः प्रजाति माशास्ते गवा मश्वानां पुरुषाणाम्"-इति । य एव माशास्ते क्षत्रियः, प्रजादिभिः बहुर्हं वै स्यामिति ; स एव तथा भवति ॥

पुनरभिषेकप्रश्नेऽस्मिन् क्षत्रिययागे याजयितॄणामृत्विजां वेदनं प्रशंसति -- "एष ह वाव क्षत्रियोऽविकृष्टो य मेवंविदो याजयन्ति"-इति । 'एवम्' उक्ताभिषेकप्रकारं जानन्त ऋत्विजो 'यं' क्षत्रियं याजयति, 'एष एव' क्षत्रियः सर्वेषु 'अविकृष्टः' अनपकृष्टः ; न ह्यस्य कदाचिदप्यपकर्षो भवति ॥

ऋत्विजा मभिषेकपरिज्ञानाभावं निन्दति -- "अथ ह तं व्येव कर्षन्ते, यथा ह वा इदं निषादा वा सेलगा वा पापकृतो वा वित्तवन्तं पुरुष मरण्ये गृहीत्वा कर्त मन्वस्य वित्त मादाय द्रवन्त्येव मेव त ऋत्विजो यजमानं कर्त मन्वस्य वित्त मादाय द्रवन्ति, य मनेवंविदो याजयन्ति"-इति । 'अनेवंविदः' अभिषेकप्रकार मजानन्त ऋत्विजो 'यं' क्षत्रियं याजयन्ति, 'तं'

---

* मा० स० आ० १, ९, १३ । "उर्जोऽपि पुष्टा नि०"-इति तत्र पाठः ।

क्षत्रियं 'विकर्षन्त एव' विकृष्ट मपकृष्टं कुर्वन्त्येव । तत्रेदं निदर्शन मुच्यते — 'निषादाः' नीचजातयो मनुष्याः, 'सेळगाः' चौराः । इळा मन्नं, तया सह वर्त्तन्ते इति 'सेळाः' धनिकाः, तान् धनापहारार्थं गच्छन्तीति चौराः 'सेळगाः' । 'पापकृतः' हिंसाकारिणः । त एते त्रिविधा दुष्टाः 'वित्तवन्तं' बहुधनोपेतं पुरुष मरण्यमध्ये गृहीत्वा 'कर्त मन्वस्य' कस्मिंश्चिदन्धकूपादिरूपे गर्ते तं प्रक्षिप्य, तदीयं धन मपहृत्य 'द्रवन्ति' पलायन्ते ; एव मेव अनभिज्ञा ऋत्विजो यजमानं नरकरूपं कर्त मन्वस्य, नरकहेतोरनुष्ठाने अवस्थाप्य, दक्षिणारूपेण तदीयं द्रव्य मपहृत्य, स्वगृहेषु गच्छन्ति ॥

उक्ताभिषेकपर्यन्तक्षत्रिययाग मुदाहरणमुखेन प्रशंसति— “एतद्ध स्म वै तद्विद्वानाह जनमेजयः पारिक्षितः,— एवंविदं हि वै मा मेवंविदो याजयन्ति, तस्मादहं जयाम्यभीत्वरीं सेनां जयाम्यभीत्वर्या सेनया न मा दिव्या न मानुष्य इषव ऋच्छन्त्येष्यामि सर्व मायुः सर्वभूमिर्भविष्यामीति”–इति । परिक्षितस्य राज्ञः पुत्रो जनमेजयः, 'तदेतत्' सर्वं प्रयोगमाहात्म्यं विद्वान्, सभामध्ये एव मुवाच— अह मप्येवंवित्, ऋत्विजोऽप्येवंविदः ; तस्माद् अभिषेकान्तेन यागेन द्वन्द्वयुद्धे जयामि । किञ्च 'अभीत्वरीम्' अभितो युद्धार्थं मुद्युक्तां परकीयां सेनां सदृश्या सेनया जयामि । तथाविधं मां 'दिव्या इषवः' देवप्रेरिता बाणाः न प्राप्नुवन्ति, 'मानुष्यः' चेषवः नाप्नुवन्ति, अपमृत्युरहितः सर्व मप्यायुः प्राप्स्यामि, सर्वा चतुस्सागरपरिवेष्टिता भूमिर्यस्याधीना सोऽयं 'सर्वभूमिः', तादृशो भविष्यामीति ॥

जनमेजयवाक्योदाहरणे दृढीकृत मर्थं निगमयति— “न ह वा एनं दिव्या न मानुष्य इषव ऋच्छन्त्येति, सर्व मायुः

सर्वभूमिर्भवति, य एवंविदो याजयन्ति—याजयन्ति"—इति । स्पष्टोऽर्थः । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ७ (११) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां द्वितीयाध्याये
(सप्तत्रिंशाध्याये) सप्तमः खण्डः ॥ ७ (११) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'-नामभाष्ये
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायाः द्वितीयोऽध्यायः ॥

॥ अथ तृतीयाध्यायः ॥

(३८)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ अथात ऐन्द्रो महाभिषेकस्ते देवा अब्रुवन्त्सप्रजापतिका । अयं वै देवाना मोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतम । इम मेवाभिषिञ्चामहा इति तथेति । तद्वैतदिन्द्र मेव तस्मा एता मासन्दीं समभरन्नृचं नाम । तस्यै बृहच्च रथन्तरञ्च पूर्वौ पादावकुर्वन् । वैरूपं च वैराजं चापरौ । शाक्वररैवते शीर्षण्ये । नौधसञ्च कालेयं चानूच्ये । ऋचः प्राचीनातानान्सामानि तिरश्चीनवायान् । यजूंष्यतीकाशान् । यश आस्तरणं । श्रिय मुपबर्हणं । तस्यै सविता च बृहस्पतिश्च पूर्वौ पादावधारयतां । वायुश्च पूषा चापरौ । मित्रावरुणौ शीर्षण्ये । अश्विनावनूच्ये । स एता मासन्दी मारोहद्वसवस्त्वा गायत्रेण छन्दसा त्रिवृता स्तोमेन रथन्तरेण साम्ना ऽऽरोहन्तु तानन्वारोहामि साम्राज्याय । रुद्रास्त्वा त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन बृहता साम्ना ऽऽरोहन्तु । तानन्वारोहामि भौज्यायादित्यास्त्वा जागतेन छन्दसा । सप्तदशेन

स्तोमेन वैरूपेण साम्ना ऽऽरोहन्तु तानन्वारोहामि स्वाराज्याय विश्वे त्वा देवा आनुष्टुभेन छन्दसैकविंशेन स्तोमेन वैराजेन साम्ना ऽऽरोहन्तु तानन्वारोहामि वैराज्याय साध्याश्च त्वाप्त्याश्च देवाः पाङ्क्तेन छन्दसा त्रिणवेन स्तोमेन शाक्वरेण साम्ना ऽऽरोहन्तु तानन्वारोहामि राज्याय मरुतश्च त्वाङ्गिरसश्च देवा अतिच्छन्दसा छन्दसा त्रयस्त्रिंशेन स्तोमेन रैवतेन साम्ना ऽऽरोहन्तु तानन्वारोहामि पारमेष्ठ्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायारोहामीत्येता मासन्दी मारोहत् त मेतस्या मासन्द्या मासीनं विश्वे देवा अब्रुवन्न वा अनभ्युत्क्रुष्ट इन्द्रो वीर्यं कर्तु मर्हत्यभ्येन मुत्क्रोशामेति तथेति तं विश्वे देवा अभ्युदक्रोशन्निमं देवा अभ्युत्क्रोशत सम्राजं साम्राज्यं भोजं भोजपितरं स्वराजं स्वाराज्यं विराजं वैराज्यं राजानं राजपितरं परमेष्ठिनं पारमेष्ठ्यं क्षत्र मजनि क्षत्रियो ऽजनि विश्वस्य भूतस्याधिपतिरजनि विशा मत्ता ऽजनि पुरां भेत्ता ऽजन्यसुराणां हन्ता ऽजनि ब्रह्मणो गोप्ता ऽजनि धर्मस्य गोप्ता ऽजनीति त मभ्युत्क्रुष्टं प्रजापतिरभिषेक्ष्यन्नेतयर्चाभ्यमन्त्रयत ॥ १ (१२) ॥

॥ श्रीगणेशाय नमः ॥

पुनः कार्योऽभिषेकोऽन्ते क्रत्वन्तत्वेन वर्णितः ।
अभिषेकः पुमर्थो यस्तस्योपोद्घात उच्यते ॥ १ ॥

तत्रादाविन्द्रस्याभिषेकं प्रतिजानीते — "अथात ऐन्द्रो महाभिषेकः"-इति । 'अथ' मानुषक्षत्रियाभिषेकोक्त्यनन्तरम्, यतो दैवो ऽभिषेको बुभुत्सितः, अतः कारणादिन्द्रसम्बन्धी महाभिषेकः, कथ्यत इति शेषः । आरोहणाभ्युत्क्रोशनाभिमन्त्रणादिभिर्वक्ष्यमाणैरस्याभिषेकस्य महत्त्वं द्रष्टव्यम् ॥

तदभिषेकार्थं देवविचारं दर्शयति— "ते देवा अब्रुवन्सप्रजापतिका,— अयं वै देवाना मोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतम इम मेवाभिषिञ्चामहा इति ; तथेति ; तद्वै तदिन्द्र मेव"-इति । प्रजापतिना सह वर्तन्त इति 'सप्रजापतिकाः' । 'ते' अग्न्यादयो देवाः परस्पर मिदम् 'अब्रुवन्' हस्तेन एनं प्रदर्श्य कथयन्ति । अय मेवेन्द्रो 'देवानां' मध्ये 'ओजिष्ठः' अतिशयेनाष्टमधातुयुक्तः, 'बलिष्ठः' अतिशयेन शरीरबलयुक्तः, 'सहिष्ठः' अतिशयेन वैर्यभिभवशीलः, 'सत्तमः' अतिशयेन स्वभक्तेषु साधुः, 'पारयिष्णुतमः' अतिशयेन प्रक्रान्तस्य कार्यस्य समाप्तिकृत् ; तस्मादिम मेव सर्वे वय मभिषिञ्चामहै । इति कैश्चिद् उक्ते सति, अन्ये सर्वेऽपि 'तथा-इति' अङ्गीकृत्य, 'तद्वै' तदानी मेव, 'तदिन्द्र मेव' तं सर्वैरनुमत मिन्द्र मेव, अभ्यषिञ्चन्निति शेषः ॥

तत्र प्रकारं दर्शयति— "तस्मा एता मासन्दीं समभरन्नृचं नाम ; तस्यै बृहच्च रथन्तरञ्च पूर्वौ पादावकुर्वन्, वैरूपं च वैराजं चापरौ, शाक्वररैवते शीर्षण्ये, नौधसञ्च कालेयं चानूच्ये, ऋचः प्राचीनातानान्सामानि तिरश्चीनवायान्, यजूंष्यतीकाशान्,

यश मास्तरणं, श्रिय मुपबर्हणं; तस्यै सविता च बृहस्पतिश्च पूर्वौ पादावधारयतां, वायुश्च पूषा चापरौ, मित्रावरुणौ शीर्षण्ये, अश्विनावनूच्ये; स एता मासन्दी मारोहद्"-इति। 'तस्मै' इन्द्रार्थम 'एतां' वक्ष्यमाणां वेदमयीं आसन्दीं समभरन्। 'ऋचे नाम'-इति आसन्द्या विशेषणम्, ऋग्रूपा मन्त्रात्मिके त्यर्थः। 'तस्यै' तस्या ऋग्रूपाया आसन्द्या बृहदादीन्यष्टसामानि पूर्वपादाद्यष्टावयवान् अकुर्वन्। आसन्द्यां शयानस्येन्द्रस्य शिरोदेशस्थं फलकं 'शीर्षण्य'', तच्च पाददेशावस्थितस्य फलकस्योपलक्षणम्; अत एव 'शीर्षण्ये'-इति द्विवचन मुच्यते। 'अनूच्ये' पार्श्वद्वयवर्त्तिनी फलके। ऋग्रूपा ये मन्त्राः सन्ति, तान् 'प्राचीनातानान्' प्राक्प्रत्यगायतत्वेन विस्तारितान् दीर्घतन्तुविशेषानकुर्वन्। गीयमानानि 'सामानि' 'तिरश्चीनवायान्' तिर्यक्तन वयनहेतून् रज्जुविशेषान् अकुर्वन्। यजूंषि 'अतीकाशान्' अन्तरालच्छिद्रविशेषान् अकुर्वन्। 'यशः' कीर्त्तिः, देवतारूपम् तदासन्द्या उपरि आस्तरणम्। 'श्रियं' या तु श्रीः सम्पदभिमानिनी देवता, ताम् 'उपबर्हणम्' शिरस उपधान मकुर्वन्। 'तस्यै' तस्या आसन्द्याः पादादीनष्टावयवान् सवित्रादयो ऽष्टौ देवा अधारयन्। इन्द्रः 'एतां' वेदमयीं वक्ष्यमाणैः मन्त्रैरारोहत्॥

तान् मन्त्रान् दर्शयति—"वसवस्त्वा गायत्रेण छन्दसा त्रिवृता स्तोमेन रथन्तरेण साम्ना ऽऽरोहन्तु, तानन्वारोहामि साम्राज्याय; रुद्रास्त्वा त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन बृहता साम्ना ऽऽरोहन्तु, तानन्वारोहामि भौज्याय; ऽऽदित्यास्त्वा जागतेन छन्दसा सप्तदशेन स्तोमेन वैरूपेण साम्ना ऽऽरोहन्तु, तानन्वारोहामि

स्वाराज्याय ; विश्वे त्वा देवा आनुष्टुभेन छन्दसैकविंशेन स्तोमेन वैराजेन साम्ना ऽऽरोहन्तु , तानन्वारोहामि वैराज्याय ; साध्याश्च त्वाप्त्याश्च देवाः पाङ्क्तेन छन्दसा त्रिणवेन स्तोमेन शाक्वरेण साम्ना ऽऽरोहन्तु , तानन्वारोहामि राज्याय ; मरुतश्च त्वाङ्गिरसश्च देवा अतिच्छन्दसा छन्दसा त्रयस्त्रिंशेन स्तोमेन रैवतेन साम्ना ऽऽरोहन्तु, तानन्वारोहामि पारमेष्ठ्याय ; माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायारोहामीत्येता मासन्दी मारोहत्''-इति । यस्मादयो देवगणाः, गायत्र्यादिच्छन्दोभिः, त्रिवृदादिस्तोमैः ; रथन्तरादिसामभिश्च सह हे आसन्दि ! त्वां प्रथमत आरोहन्तु ; तान् 'अनु' पश्चादह मारोहामि । 'आप्त्याः'-इत्यनेनापि वस्वादिशब्दवत् कश्चिद्देवगणविशेष उच्यते । साम्राज्यादीन्यारोहणप्रयोजनानि । एते च शब्दाः पूर्वाध्याये “व्याघ्रचर्मणा स्तृणाति”-इत्यस्मिन् खण्डे (१८६ पृ०) व्याख्याताः । एतैः पञ्चभिर्मन्त्रैरिन्द्र उक्ता मासन्दी मारोहत् ॥

इन्द्रारोहणादूर्ध्वं देवाना मभ्युत्क्रोशनं दर्शयति— “स मेतस्या मासन्द्या मासीनं विश्वे देवा अब्रुवन् ,— न वा अनभ्युत्क्रुष्ट इन्द्रो वीर्यं कर्तु मर्हत्यभ्येन मुत्क्रोशामेति ; तथेति ; तं विश्वे देवा अभ्युदक्रोशन्निमं देवा अभ्युत्क्रोशत सम्राजं साम्राज्यं भोजं भोजपितरं स्वराजं स्वाराज्यं विराजं वैराज्यं राजानं राजपितरं परमेष्ठिनं पारमेष्ठ्यं , क्षत्र मजनि क्षत्रियो ऽजनि विश्वस्य भूतस्याधिपतिरजनि विशा मत्ता ऽजनि पुरां भेत्ता ऽजन्यसुराणां हन्ता ऽजनि ब्रह्मणो गोप्ता ऽजनि धर्मस्य गोप्ता ऽजनीति”-इति । 'एतस्यां' वेदमय्या मासन्द्या मासीनं 'तम्' इन्द्रं प्रति 'विश्वे' सर्वे देवाः परस्पर मिद मब्रुवन् । यथा लोके वन्दिनो गुणकथनेन

राज्ञः कीर्त्तिं कुर्वन्ति, एव मत्रापि गुणकीर्त्तनम् 'अभ्युत्क्रोशनम्', तेन रहितः 'अनभ्युत्क्रुष्टः' इन्द्रो युद्धादौ वीर्यं कर्त्तुं नैवार्हति ; कीर्त्तिं मन्तरेण परेषां प्रीत्यनुदयात् । तस्माद् अभितः 'एनम्' इन्द्रम् 'उत्क्रोशाम' उद्घोषयामि । 'इति' एवं विचार्य, 'तथा—इति' अङ्गीकृत्य, 'तम्' इन्द्रम् सर्वे देवा अभ्युदक्रोशन् । इम मित्यादिरभ्युत्क्रोशनप्रकारः । हे देवाः ! 'इमम्' इन्द्रम् अभितः 'उत्क्रोशत' उद्घोषयत । कीदृश मिन्द्रम् ? सम्राट्स्वरूपम्, अत एव साम्राज्यं कर्त्तुं मर्हम् ; 'भोज'' भोक्तारम्, अत एव 'भोजपितर'' भोगपालकम् ; स्वराड्रूपत्वादेव स्वाराज्यं कर्तुं मर्हम् ; विराड्रूपत्वादेव वैराज्यं कर्त्तुं मर्हम् ; राजरूपत्वाद् 'राजपितरं' सर्वेषां राज्ञां पालकम् ; परमेष्ठिरूपत्वात् पारमेष्ठ्यं पद मनुभवितुं योग्यम् । 'क्षत्र मजनि' ईदृशी क्षत्रियजातिर्लोके समुत्पन्ना । तज्जातिमान् क्षत्रियः पुरुषः समुत्पन्नः । सर्वस्य प्राणिजातस्याधिपतिरुत्पन्नः । 'विशां' प्रजानाम् 'अत्ता' भोक्ता समुत्पन्नः । 'पुरां' परकीयानां 'भेत्ता' विदारयिता समुत्पन्नः । असुराणां 'हन्ता' घातकः समुत्पन्नः । 'ब्रह्मणः' वेदस्य 'गोप्ता' रक्षकः समुत्पन्नः । 'इति' अय मुत्क्रोशनमन्त्रः ॥

अभ्युत्क्रोशनादूर्ध्वं प्रजापतिकर्त्तव्यं दर्शयति— "त मभ्युत्क्रुष्टं प्रजापतिरभिषेक्ष्यन्नेतयर्चाभ्यमन्त्रयत"–इति । 'एतया' निषसादेति (२२८ पृ०) वक्ष्यमाणया ॥ १ (१२) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां तृतीयाध्याये
(अष्टत्रिंशाध्याये) प्रथमः खण्डः ॥ १ (१२) ॥

॥ अथ द्वितीयः खण्डः ॥

निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठाय सुक्रतुरिति त मेतस्या मासन्द्या मासीनं प्रजापतिः पुरस्तात् तिष्ठन् प्रत्यङ्मुख औदुम्बर्यार्द्रया शाखया सपलाशया जातरूपमयेन च पवित्रेणान्तर्धायाभ्यषिञ्चद् इमा आपः शिवतमा इत्येतेन तृचेन देवस्य त्वेति च यजुषा भूर्भुवस्स्वरित्येताभिश्च व्याहृतिभिः ॥ २ (१३) ॥

“एतयर्चाभ्यमन्त्रयत”-इत्यत्र योऽयं मन्त्र ऋक्शब्देन विवक्षितः, तं मन्त्रं दर्शयति— “निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठाय सुक्रतुरिति”-इति । ‘धृतव्रतः’ स्वीकृतनियमो ‘वरुणः’ सर्वस्यारिष्टस्य निवारयितेन्द्रः. ‘पस्त्यासु’ गृहेष्वागत्य, साम्राज्यादिफलसिद्ध्यर्थं ‘सुक्रतुः’ शोभनसङ्कल्पो भूत्वा ‘निषसाद’ अस्या मासन्द्यां निषण्णवान् ॥

अनेन मन्त्रेणाभिमन्त्रितस्येन्द्रस्याभिषेकप्रकारं दर्शयति— “त मेतस्या मासन्द्या मासीनं प्रजापतिः पुरस्तात् तिष्ठन् प्रत्यङ्मुख औदुम्बर्यार्द्रया शाखया सपलाशया जातरूपमयेन च पवित्रेणान्तर्धायाभ्यषिञ्चद् , इमा आपः शिवतमा इत्येतेन तृचेन, देवस्य त्वेति च यजुषा , भूर्भुवस्स्वरित्येताभिश्च व्याहृतिभिः”-

इति । 'एतस्यां' पूर्वोक्तायां वेदमय्या मासन्द्यां मासीनं 'तम्' इन्द्रं प्रजापतिरभ्यषिञ्चत् । किं कुर्वन् ? 'पुरस्तात्' आसन्द्याः पूर्वस्यां दिशि प्रत्यङ्मुखस्तिष्ठन् । किं कृत्वा ? 'आर्द्रया' आर्द्रपलाशोपेतया उदुम्बरशाखया सुवर्णमयेन च पवित्रेण 'अन्तर्धाय' व्यवधानं कृत्वा । केन मन्त्रेण ? "इमा आपः"-इत्यादिकेन, क्षत्वङ्गाभिषेके प्रोक्तेन (१८८पृ०) त्रिविधेन मन्त्रजातेन ॥२(१३)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां तृतीयाध्याये
(अष्टत्रिंशाध्याये) द्वितीयः खण्डः ॥ २ (१३) ॥

॥ अथ तृतीयः खण्डः ॥

अथैनं प्राच्यां दिशि वसवो देवाः॑ षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्च॑न्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः साम्राज्याय॑ तस्मादेतस्यां प्राच्यां दि॑शि ये के च प्राच्यानां राजा॑नः साम्राज्यायैव तेऽभिषिच्यन्ते॑ सम्राळित्येनानभिषिक्तानाचक्षत॑ एता मेव देवानां विहि॑ति मन्वथैनं दक्षिणस्यां दि॑शि रुद्रा देवा॑ः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्च॑न्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभि॑र्भौ-

ज्याय । तस्मादेतस्यां दक्षिणस्यां दिशि । ये के च सत्वतां राजानो भौज्यायैव ते ऽभिषिच्यन्ते । भोजेत्येनानभिषिक्तानाचक्षत । एतामेव देवानां विहितिं मन्वथैनं प्रतीच्यां दिश्यादित्या देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः स्वाराज्याय । तस्मादेतस्यां प्रतीच्यां दिशि । ये के च नीच्यानां राजानो ये ऽपाच्यानां स्वाराज्यायैव ते ऽभिषिच्यन्ते । स्वराडित्येनानभिषिक्तानाचक्षत । एतामेव देवानां विहितिं मन्वथैनमुदीच्यां दिशि विश्वे देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्वैराज्याय । तस्मादेतस्यामुदीच्यां दिशि । ये के च परेण हिमवन्तं जनपदा उत्तरकुरव उत्तरमद्रा इति वैराज्यायैव ते ऽभिषिच्यन्ते । विराडित्येनानभिषिक्तानाचक्षत । एतामेव देवानां विहितिमन्वथैनमस्यां ध्रुवायां । मध्यमायां प्रतिष्ठायां दिशि । साध्याश्चाप्त्याश्च देवाः । षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभी राज्याय तस्मादस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि । ये के च कुरुपञ्चालानां

राजानः सवशोशीनराणां राज्यायैव ते ऽभिषिच्यन्ते राजेत्येनानभिषिक्तानाचक्षत एता मेव देवानां विहितिं मन्वथैन मूर्द्धायां दिशि मरुतश्चाङ्गिरसश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः पारमेष्ठ्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायेति स परमेष्ठी प्राजापत्यो ऽभवत् स एतेन महाभिषेकेणाभिषिक्त इन्द्रः सर्वा जितीरजयत् सर्वाँल्लो*कानविन्दत् सर्वेषां देवानां श्रैष्ठ्य मतिष्ठां परमता मगच्छत्साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्यं जित्वास्मिँल्लोके † स्वयम्भूः स्वराळमृतो ऽमुष्मिन्त्स्वर्गे लोके सर्वान्कामानाप्त्वा ऽमृतः समभवत् समभवत् ॥ ३ (१४) ॥

इत्यैतरेयब्राह्मणेऽष्टमपञ्चिकायां तृतीयोऽध्यायः॥ ३ ॥

इन्द्रस्य प्रजापतिकृताभिषेकादूर्ध्वं दिग्भेदेन देवविशेषै रभिषेकः कृतः ; तत्र प्राच्यां दिशि त मभिषेकं दर्शयति—"अथैनं प्राच्यां दिशि वसवो देवाः षड्भिश्चैव पञ्चविंशैरहोभि-

---

* 'सर्वान्लो०'–इति क, 'सर्वाल्लो०'–इति ग, 'सर्वांल्लो०'–इति ख, ङ ।

† '०स्मिंल्लोकं'–इति क, ग, '०स्मिँल्लोके'–इति ङ ।

रभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः साम्राज्याय"-इति । 'अथ' प्राजापत्याभिषेकानन्तरम्, 'एनम्' इन्द्रं प्राच्यां दिशि अवस्थिता वसवो देवा एकत्रिंशत्सु अहस्सु पूर्वोक्तैर्मन्त्रैः अभ्यषिञ्चत् ; तच्च साम्राज्यसिद्धये भवति ॥

इदानीं लौकिकाचारप्रदर्शनेनेन्द्रस्य प्राच्यां दिशि तमभिषेकं द्रढयति— "तस्मादेतस्यां प्राच्यां दिशि ये के च प्राच्यानां राजानः साम्राज्यायैव तेऽभिषिच्यन्ते सम्राडित्येनानभिषिक्तानाचक्षत एता मेव देवानां विहिति मनु"-इति । यस्माद् वसुभिः प्राच्यां दिश्यभिषेकः कृतः, 'तस्मात्' इदानी मपि 'प्राच्यानां' पूर्वदिग्वर्त्तिनां मनुष्याणां ये के च राजानः सन्ति, ते सर्वेऽपि 'देवानां' वसूनां सम्बन्धिनीम् 'एता मेव विहितिं' पूर्वोक्त मेव विधानम् अनु 'साम्राज्याय' साम्राज्यसिद्ध्यर्थ मभिषिच्यन्ते । अत एव अभिषिक्तान् 'एनान्' राज्ञः 'सम्राट्' 'इति' अनेन शब्देन व्यवहरन्ति ॥

दिगन्तरेषु* देवान्तरैरिन्द्राभिषेकं दर्शयति— "अथैनं दक्षिणस्यां दिशि रुद्रा देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्भौज्याय तस्मादेतस्यां दक्षिणस्यां दिशि ये के च सत्वतां राजानो भौज्यायैव तेऽभिषिच्यन्ते भोजेत्येनानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैनं प्रतीच्यां दिश्यादित्या देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः स्वाराज्याय तस्मादेतस्यां प्रतीच्यां दिशि ये के च नीच्यानां राजानो येऽपाच्यानां स्वाराज्यायैव तेऽभिषिच्यन्ते स्वराडित्ये-

---

* "दिगन्तरेऽपि"-इति ख ।

नानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैन मुदीच्या दिशि विश्वे देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्वैराज्याय तस्मादेतस्या मुदीच्यां दिशि ये के च परेण हिमवन्तं जनपदा उत्तरकुरव उत्तरमद्रा इति वैराज्यायैव ते ऽभिषिच्यन्ते विराडित्येनानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैन मस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चाप्त्याश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभी राज्याय तस्मादस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि ये के च कुरुपञ्चालानां राजानः सवशोशीनराणां राज्यायैव ते ऽभिषिच्यन्ते राजेत्येनानभिषिक्तानाचक्षत एता मेव देवानां विहिति मन्वथैन मूर्द्धायां दिशि मरुतश्चाङ्गिरसश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः पारमेष्ठ्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायेति स परमेष्ठी प्राजापत्यो ऽभवत्"–इति । प्रथमपर्यायवद् व्याख्येयम् । 'सत्वतां' दक्षिणस्यां दिशि वर्त्तमानाः प्राणिनः सत्वन्नामकाः *, तेषाम् । ये राजानोऽभिषिक्ताः, ते 'भोज' 'इति' अनेन शब्देन व्यवह्रियन्ते । प्रतीच्यां दिशि वर्त्तमानाः प्राणिनो नीच्या अपाच्याश्च† । निकर्ष मश्नन्तीति 'नीच्याः', अपकर्ष मश्नन्तीति 'अपाच्याः' । जात्या निकर्षः, व्यवहारेणापकर्षः । उभयविधानां प्राणिनां ये राजानः सन्ति, ते 'स्वराट्' 'इति' अनेन

---

* "तदेतद् गाथयाभिगीतम्— 'शतानीकः समन्तासु मेध्यं सात्राजितो हयम् । आदत्त यज्ञं काशीनां भरतः सत्वता मिव'–इति"–इति शत० ब्रा० १३. ५. ४. २१ ।

† 'उड्राः कुन्तलाश्च अपाच्याः'–इति हे० अभि० चि० ९५१ ।

शब्देन व्यवह्रियन्ते । उदीच्यां दिशि 'हिमवन्तं परेण' हिमवत्पर्वतस्य परभागे 'जनपदाः' ग्रामविशेषाः 'उत्तरकुरवः' उत्तरकुरुनामकाः *, 'उत्तरमद्राः' उत्तरमद्रनामकाः सन्ति, तत्रत्या राजानो 'विराट्' 'इति' अनेन शब्देन व्यवह्रियन्ते । 'मध्यमा दिक्' मध्यदेशः । स च प्राच्यादिभिर्दिग्भिः सर्वाभिरपेक्ष्यत्वेन 'ध्रुवः' भवति ; तदपेक्षयैव पूर्वा पश्चिमेत्यादिः व्यवहारः । स च देशः सर्वेषां वैदिकानामाश्रयः । तत्र ये वशदेशैः † उशीनरदेशैश्च सहिताः कुरुपञ्चालदेशाः सन्ति, तेषां देशानां ये राजानः, ते 'राजा' 'इति' अनेन शब्देन व्यवह्रियन्ते । 'ऊर्ध्वायां दिशि' स्वर्गरूपायाम्, मनुष्यस्य सञ्चाराभावात् तत्र राजानो नोदाहृताः, किन्तु इन्द्रस्यैवाभिषेक उक्तः । तस्यां दिश्यभिषेकेण 'सः' इन्द्रः 'परमेष्ठी' परमपदे अवस्थितः, 'प्राजापत्यः' प्रजापतिसम्बन्धी अभवत् ॥

अन्त्य मिन्द्राभिषेकं निगमयति— "स एतेन महाभिषेकेणाभिषिक्त इन्द्रः सर्वा जितीरजयत् सर्वांल्लोकानविन्दत् सर्वेषां देवानां श्रैष्ठ्य मतिष्ठां परमता मगच्छत्साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्यं जित्वास्मिंल्लोके स्वयम्भूः स्वराळमृतोऽमुष्मिन्स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत्--समभवत्"-इति । पूर्वोक्ताभिषेकेण अभिषिक्तः

---

* 'अहो सह शरीरेण प्राप्तोऽसि परमां गतिम् । उत्तरान् वा कुरून् पुण्यानथ वाप्यमरावतीम्"-इति महा० भा० १२ प० २८४१ । 'नैवेशिकं सर्वगुणोपपन्नं ददाति वै यस्तु नरो द्विजाय । स्वाध्यायचारित्रगुणान्विताय तस्यापि लोकाः कुरुषूत्तरेषु'—इति च तत्रैव २८५८ ।

† वश इत्यस्यैवाक्षरविपर्ययेणैकाक्षरद्वययोगेन च महाभारतादौ प्रसिद्धः किं शिबिरिति ? । तथा चादिपर्वणि 'शिबिरौशीनरः'-इति ३३६९ ।

इन्द्रः 'जितीः' जेतव्याः सर्वा युद्धभूमीः अजयत् । तेन जयेन सर्वान् लोकान् 'अविन्दत्' अलभत ; देवानां मध्ये 'श्रैष्ठ्यम्' अतिशयेन प्रशस्तत्वम् , 'अतिष्ठां' सर्वानतिक्रम्यावस्थानं 'परमताम्' उत्कृष्टत्व मगच्छत् । जातितः उत्तमत्वं श्रैष्ठ्यम् , गुणैरुत्तमत्वं परमत्वम् । साम्राज्यादीनि पदानि अस्मिंल्लोके 'जित्वा' प्राप्य 'स्वयम्भूः' प्रजापतिरूपः , 'स्वराट्' स्वतन्त्रराजः , 'अमृतः' इतरमनुष्यवदल्पकाले मरणरहितः सन् 'अमुष्मिन्' परोक्षे स्वर्गे लोके सर्वान् 'कामान्' भोगान् प्राप्य 'अमृतः' मरणरहितो मुक्तः समभवत् ॥ अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ३ (१४) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां तृतीयाध्याये
(अष्टत्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (१४) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'–नामभाष्ये
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायाः तृतीयोऽध्यायः ॥

॥ अथ चतुर्थाध्यायः ॥

(३९)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ स य इच्छेदेवंवित्क्षत्रिय मयं॑ सर्वा जितीर्ज॑येता॑यं सर्वाँल्लोकान् * विन्दे॑ता॑यं सर्वे॑षां राज्ञां॑ श्रैष्ठ्य मतिष्ठां परमतां गच्छेत॑ साम्राज्यं भौ॑ज्यं स्वाराज्यं वैराज्यं॑ पारमेष्ठ्यं राज्यं॑ माहाराज्य माधिप॑त्य मयं॑ समन्तपर्यायी स्या॑त्सार्वभौमः सार्वायुष॑ † आन्तादा परार्धात्॑ पृथिव्यै समुद्रपर्यन्ताया एकरा॑ळिति त मेतेनैन्द्रेण महाभिषेकेण॑ क्षत्रिय॑ शापयित्वा ‡ ऽभिषि॑ञ्चेद् याञ्च रात्री मजायेथा॑ याञ्च प्रे॑तासि तदुभय मन्तरेणेष्टापूर्तं ते लोकं॑ सुकृत मायुः प्रजां वृञ्जीयं॑ यदि मे द्रुह्येरिति॑ स य इच्छेदेवंविद्क्षत्रियो॑ ऽहं॑ सर्वा जितीर्जयेय॑ मह॑ सर्वाँल्लोकान् विन्देय॑ मह॑ सर्वेषां राज्ञां॑ श्रैष्ठ्य मतिष्ठां परमतां गच्छेय॑ साम्राज्यं भौज्यं॑ स्वाराज्यं वैराज्यं॑ पारमेष्ठ्यं राज्यं॑ माहाराज्य माधिपत्य॑ महं

---

* "सर्वान् लोकान्" क, 'सर्वांलोकान्' ग, "सर्वांल्लोकान्" ङ।

† "सर्वायुषः" क, ख।

‡ "श्रावयित्वा" ङ।

समन्तपर्यायी स्यां सार्वभौमः सार्वायुष आन्तादा परार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराळिति स न विचिकित्सेत्स ब्रूयात्सह श्रद्धया यां च रात्री मजाये ऽहं यां च प्रेतास्मि तदुभयमन्तरेणेष्टापूर्त्तं मे लोकं सुकृत मायुः प्रजां वृञ्जीथा यदि ते द्रुह्येय मिति ॥ १ (१५) ॥

॥ श्रीगणेशाय नमः ॥

पुरुषार्थाभिषेकार्थं मादावैन्द्राभिषेचनम् ।
उक्त मत्र पुमर्थोऽय मभिषेक उदीर्यते ॥ १ ॥

त मभिषेकं विधत्ते— "स य इच्छेदेवंवित् क्षत्रिय मयं सर्वा जितीर्जयेतायं सर्वांल्लोकान् विन्देतायं सर्वेषां राज्ञां श्रैष्ठ्य मतिष्ठां परमतां गच्छेत साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्य मयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुष आन्तादा परार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराळिति त मेतेनैन्द्रेण महाभिषेकेण क्षत्रियं शापयित्वा ऽभिषिञ्चेद्"-- इति । 'एवंवित्' इन्द्रसम्बन्धिमहाभिषेकविद् 'यः' आचार्यः क्षत्रियं प्रति सर्वजयादिफल मिच्छेत्, 'सः' आचार्यः क्षत्रिय मेतं 'शापयित्वा' शपथं कारयित्वा, 'एतेन' पूर्वोक्तेन इन्द्रसम्बन्धिना महाभिषेकविधानेन 'तं' क्षत्रिय मभिषिञ्चेत् । कीदृशी फलेच्छा ? इति, साभिधीयते— 'अयं' क्षत्रियो जेतव्याः सर्वा युद्धभूमीर्जयेत् ; तथा 'सर्वान् लोकान्' देशविशेषान् लभेत ; 'सर्वेषां' राज्ञां मध्ये श्रैष्ठ्याद्याधिपत्यान्तगुणयुक्तो भवेत् ; 'समन्तपर्यायी' देशतः कालतः सर्वव्यापी स्यात् ; 'आ अन्तात्' समुद्र-

तीरपर्यन्तं सार्वभौमत्वं देशव्याप्तिः, 'आ परार्धात्' परार्धशब्दाभिधेयकालसङ्ख्यापर्यन्तं सर्वायुष्ट्वं कालव्याप्तिः ; एवंविधो भूत्वा समुद्रपर्यन्तायाः पृथिव्याः एक एव राजा अस्तु ; 'इति' अनयेच्छया आचार्यो महाभिषेकेण त मभिषिञ्चेत् ॥

शापयित्वेति यदुक्तं, त मेव शपथप्रकारं दर्शयति— "याञ्च रात्री मजायेथा, याञ्च प्रेतासि, तदुभय मन्तरेणेष्टापूर्तं ते लोकं सुकृत मायुः प्रजां वृञ्जीय यदि मे द्रुह्येरिति"-इति । अभिषिच्यमान ! हे क्षत्रिय ! यद्याचार्याय मे 'द्रुह्येः' द्रोहं कुर्याः, तदानीं त्वं 'यां रात्रिं मजायेथाः' यस्यां रात्रावुत्पन्नोऽसि, 'याञ्च रात्रिं प्रेतासि' यस्यां रात्रौ मरिष्यसि, 'तदुभय मन्तरेण' उत्पत्तिमरणदिनयोर्द्वयोर्मध्ये 'ते' तव 'इष्टापूर्तं' श्रौतस्मार्तकर्मद्वयं, तथा पुण्यलोकं, तद्धेतुभूत मन्यदपि सुकृतं, दीर्घ मायुः, 'प्रजां' पुत्रादिकां 'वृञ्जीय' त्वत्तो वर्जयेयम् ; 'इति' एतद् आचार्यस्य वाक्यम् । तदेतदङ्गीकारयित्वा पश्चादभिषिञ्चेत् आचार्यः ॥

क्षत्रियार्थं यादृशीं फलपरम्परां कामयित्वा शपथं कारयति, क्षत्रियोऽपि तादृशीं फलपरम्परां कामयमानः शपथं कुर्यात् । तदेतत् क्षत्रियवाक्यं दर्शयति— "स य इच्छेदेवंवित् क्षत्रियो ऽहं सर्वा जितीर्जयेय महं सर्वांल्लोकान् विन्देय महं सर्वेषां राज्ञां श्रैष्ठ्य मतिष्ठां परमतां गच्छेयं साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्य महं समन्तपर्यायी स्यां सार्वभौमः सार्वायुष आन्तादा परार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराळिति, स न विचिकित्सेत्, स ब्रूयात् सह श्रद्धया, याञ्च रात्री मजाये ऽहं याञ्च प्रेतास्मि, तदुभय मन्तरेणेष्टापूर्तं मे लोकं सुकृत मायुः प्रजां वृञ्जीथा यदि ते द्रुह्येय मिति"-इति । 'यः' क्षत्रियः

'एवंवित्' महाभिषेकमाहात्म्याभिज्ञः, सर्वजयादिकं समुद्रपर्यन्तं, पृथिव्या मेकराजत्वपर्यन्तं फलजात मिच्छेत् (पूर्वत्राचार्यवाक्यत्वात् जयेत विन्देतेत्यादिः प्रथमपुरुषप्रयोगः, अत्र तु क्षत्रियवाक्यत्वात् जयेय मित्यादिः उत्तमपुरुषप्रयोगः), 'सः' क्षत्रियः फलकामी 'न विचिकित्सेत्' आचार्योक्तेऽर्थे संशयं न कुर्यात् । 'सः' क्षत्रिय आचार्यस्याभीष्टं शपथ मेवं कुर्यात्,— हे आचार्य ! अहं यदि ते द्रुह्येयम्, तदानीं त्वं मम जन्ममरणमध्यवर्त्तीष्टापूर्त्तादिकं सर्वं 'वृञ्जीथाः' नाशयेः, इति श्रद्धया सहितं शपथं ब्रूयात् ॥ १ (१५) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) प्रथमः खण्डः ॥ १ (१५) ॥

॥ अथ द्वितीयः खण्डः ॥

अथ ततो ब्रू॑याच्चतुष्टयानि वानस्पत्यानि सम्भरत॑ नैयग्रोधान्यौ॑दुम्बराण्या॑श्वत्थानि प्लाक्षाणीति॑ क्षत्रं वा एतद् वनस्पतीनां यन्न्यग्रोधो॑ यन्नैयग्रोधानि सम्भरन्ति॑ क्षत्र मेवास्मिंस्तद्दधाति॑ भौज्यं॑ वा एतद् वनस्पतीनां यदुदुम्बरो॑ यदौदुम्बराणि सम्भरन्ति॑ भौज्य मेवास्मिंस्तद्दधाति॑ साम्राज्यं वा एतद्

वनस्पतीनां यदश्वत्थो यदाश्वत्थानि सम्भरन्ति साम्राज्य मेवास्मिंस्तद्दधाति स्वाराज्यञ्च ह वा एतद् वैराज्यञ्च वनस्पतीनां यत् प्लक्षो यत्प्लाक्षाणि सम्भरन्ति स्वाराज्यवैराज्ये एवास्मिंस्तद्दधात्यथ ततो ब्रूयाच्चतुष्टयान्यौषधानि सम्भरत तोक्मकृतानि व्रीहीणां महाव्रीहीणां प्रियङ्गूनां यवाना मिति क्षत्रं वा एतदोषधीनां यद् व्रीहयो यद् व्रीहीणां तोक्म सम्भरन्ति क्षत्र मेवास्मिंस्तद्दधाति साम्राज्यं वा एतदोषधीनां यन् महाव्रीहयो यन्महाव्रीहीणां तोक्म सम्भरन्ति साम्राज्य मेवास्मिंस्तद्दधाति भौज्यं वा एतदोषधीनां यत् प्रियङ्गवो यत् प्रियङ्गूनां तोक्म सम्भरन्ति भौज्य मेवास्मिंस्तद्दधाति सैनान्यं वा एतदौषधीनां यद्यवा यद्यवानां तोक्म सम्भरन्ति सैनान्य मेवास्मिंस्तद्दधाति ॥ २ (१६) ॥

सम्भारान् विधत्ते— "अथ ततो ब्रूयाच्चतुष्टयानि वानस्पत्यानि सम्भरत,— नैयग्रोधान्यौदुम्बराण्याश्वत्थानि प्लाक्षाणीति" -इति । 'अथ' क्षत्रियशपथानन्तरम्, यत्र आचार्येणाभिषेकः कर्त्तव्यः, 'ततः' कारणादाचार्यः परिचारकान् ब्रूयात्,— वनस्पतिसम्बन्धीनि न्यग्रोधादीनि (फलानि चतुर्विधानि *) हे परिचारकाः ! सम्पादयतेति ॥

---

* बन्धनीचिह्नान्तर्गतपदद्वयं घ च पुस्तकयोर्नास्ति ।

तत्र वृक्षचतुष्टयं क्रमेण प्रशंसति— "क्षत्रं वा एतद् वनस्पतीनां यन्न्यग्रोधो ; यन्नैयग्रोधानि सम्भरन्ति, क्षत्र मेवास्मिंस्तद्दधाति ; भौज्यं वा एतद् वनस्पतीनां यदुदुम्बरो ; यदौदुम्बराणि सम्भरन्ति, भौज्य मेवास्मिंस्तद्दधाति ; साम्राज्यं वा एतद् वनस्पतीनां यदश्वत्थो ; यदाश्वत्थानि सम्भरन्ति, साम्राज्य मेवास्मिंस्तद्दधाति ; स्वाराज्यञ्च ह वा एतद् वैराज्यञ्च वनस्पतीनां यत् प्लक्षो ; यत् प्लाक्षाणि सम्भरन्ति, स्वाराज्यवैराज्ये एवास्मिंस्तद्दधाति"-इति । न्यग्रोधस्य वनस्पतीनां मध्ये राजवद् व्याप्त्याधिक्यात् क्षत्रत्वम् ; उदुम्बरादीनां भौज्यादिसाधनत्वात् तद्रूपत्वम् । अतश्चतुर्विधफलसम्पादनेन यजमाने क्षत्रभौज्यादीनि फलानि सम्पादयति ॥

सम्भारान्तराणि विधत्ते — "अथ ततो ब्रूयाच्चतुष्टयान्यौषधानि सम्भरत तोक्मकृतानि,— व्रीहीणां, महाव्रीहीणां, प्रियङ्गूनां, यवाना मिति"-इति । 'अथ' नैयग्रोधादिफलसम्पादनानन्तरम्, यतो व्रीह्याद्यङ्कुरसम्पादन मपेक्षितम्, 'ततः' आचार्य एवं ब्रूयात्,— हे परिचारकाः ! 'तोक्मकृतानि' अङ्कुरनिमित्तान्यौषधिद्रव्याणि चतुर्विधानि सम्पादयत । सूक्ष्मबीजरूपा व्रीहयः, प्रौढबीजरूपा महाव्रीहयः, प्रियङ्गवो यवाश्च प्रसिद्धाः ॥

चतुर्विध मोषधिद्रव्यं प्रशंसति— "क्षत्रं वा एतदोषधीनां यद् व्रीहयो ; यद् व्रीहीणां तोक्म सम्भरन्ति, क्षत्र मेवास्मिंस्तद्दधाति ; साम्राज्यं वा एतदोषधीनां यन्महाव्रीहयो ; यन्महाव्रीहीणां तोक्म सम्भरन्ति, साम्राज्य मेवास्मिंस्तद्दधाति ; भौज्यं वा एतदोषधीनां यत् प्रियङ्गवो ; यत् प्रियङ्गूनां तोक्म सम्भरन्ति ; भौज्य मेवास्मिंस्तद्दधाति ; सैनान्यं वा एतदोषधीनां यद्यवा ;

यद्यवाणां तोक्म सम्भरन्ति, सैनान्य मेवास्मिंस्तद्दधाति"–इति । ओषधीनां मध्ये व्रीहीणां बलहेतुत्वात् क्षत्त्रत्वम्, महाव्रीह्यादीना मपि अनुष्ठानद्वारा साम्राज्यहेतुत्वात् तद्रूपत्वम् ; अतो व्रीह्यादितोक्माना मङ्कुराणां सम्पादनेन यजमाने क्षत्त्रसाम्राज्यादिकं सर्वं सम्पादयति ॥ २ (१६) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनविंशाध्याये) द्वितीयः खण्डः ॥ २ (१६) ॥

॥ अथ तृतीयः खण्डः ॥

अथास्मा औदुम्वरीमासन्दीं सम्भरन्ति तस्या उक्तं ब्राह्मणमौदुम्वरश्चमसो वा पात्री वौदुम्वरशाखा तानेतान्त्सम्भारान्त्सम्भृत्यौदुम्वर्यां पात्र्यां वा चमसे वा समावपेयुस्तेषु समोप्तेषु दधि मधु सर्पिरातपवर्ष्या आपोऽभ्यानीय प्रतिष्ठाप्यैना मासन्दी मभिमन्त्रयेत वृहच्च ते रथन्तरञ्च पूर्वौ पादौ भवतां वैरूपञ्च वैराजं चापरौ शाक्वररैवते शीर्षण्ये नौधसञ्च कालेयं चानूच्ये ऋचः प्राचीनातानाः सामानि तिरश्चीनवाया यजूंष्यतीकाशा यश आस्तरणं श्रीरुप-

बर्हिषा सविता च ते बृहस्पतिश्च पूर्वौ पादौ धारयतां वायुश्च पूषा चापरौ मित्रावरुणौ शीर्षण्ये अश्विनावनूच्ये इत्यथैन मेता मासन्दी मारोहयेद् वसवस्त्वा गायत्रेण छन्दसा * त्रिवृता स्तोमेन रथन्तरेण साम्ना ऽऽरोहन्तु तानन्वारोह साम्राज्याय रुद्रास्त्वा त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन बृहता साम्ना ऽऽरोहन्तु तानन्वारोह भौज्यायादित्यास्त्वा जागतेन छन्दसा सप्तदशेन स्तोमेन वैरूपेण साम्ना ऽऽरोहन्तु तानन्वारोह स्वाराज्याय विश्वे त्वा देवा आनुष्टुभेन छन्दसैकविंशेन स्तोमेन वैराजेन साम्ना ऽऽरोहन्तु तानन्वारोह वैराज्याय मरुतश्च त्वाङ्गिरसश्च देवा अतिच्छन्दसा छन्दसा त्रयस्त्रिंशेन स्तोमेन रैवतेन साम्ना ऽऽरोहन्तु तानन्वारोह पारमेष्ठ्याय साध्याश्च त्वाप्त्याश्च देवाः पाङ्क्तेन छन्दसा त्रिणवेन स्तोमेन शाक्वरेण साम्ना ऽऽरोहन्तु तानन्वारोह राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायारोहेत्येता मासन्दी मारोहयेत् त मेतस्या मासन्द्या मासीनं राजकर्त्तारो ब्रूयुर्न वा अनभ्युत्क्रुष्टः क्षत्रियो वीर्यं कर्त्तु मर्हत्यभ्येन मुत्क्रोशामेति तथेति तं राजकर्त्तारोऽभ्युत्क्रोशन्तीमं जना अभ्युत्क्रोशत सम्राजं

---

* "छन्दसा"-इति ङ। एव मिहोत्तरत्रापि।

साम्राज्यं भोजं भोजपितरं स्वराजं स्वाराज्यं विराजं वैराज्यं परमेष्ठिनं पारमेष्ठ्यं राजानं राजपितरं क्षत्रमजनि क्षत्रियोऽजनि विश्वस्य भूतस्याधिपतिरजनि विशामत्ताऽजन्यमित्राणां हन्ताऽजनि ब्राह्मणानां गोप्ताऽजनि धर्मस्य गोप्ताऽजनीति तमभ्युत्क्रुष्टमेवंविदभिषेक्ष्यन्नेतयर्चाभिमन्त्रयेत ॥ ३ ॥ (१७) ॥

आसन्द्यादिसम्भारान् विधत्ते— "अथैतामौदुम्बरीमासन्दीं सम्भरन्ति ; तस्या उक्तं ब्राह्मणमौदुम्बरश्चमसो वा पात्री वोदुम्बरशाखा ; तानेतान्सम्भारान्सम्भृत्यौदुम्बर्यां पात्र्यां वा चमसे वा समावपेयुस्तेषु समोप्तेषु दधि मधु सर्पिरातपवर्ष्या आपोऽभ्यानीय प्रतिष्ठाप्यैतामासन्दीमभिमन्त्रयेत" इति । 'अथ' वानस्पत्यौषधिसम्भारानन्तरम् , 'अमी' ऋत्विज औदुम्बरीमासन्दीं सम्पादयेयुः । 'तस्याः' चासन्द्या विधायकं 'ब्राह्मणं' "प्रादेशमात्राः पादाः"–इत्यादिना पूर्वमेवोक्तम् † । चतुष्कोणो दण्डयुक्तः पात्रविशेषश्चमसः ‡ । आकारनियमरहिता

---

* भाष्य एष एव खण्डः किञ्चित्[illegible] (२२०१०) ।

† १८२पृ० ९पं०, १८४पृ० १०पं० ।

‡ 'चमसो देवपानः'–इति ऋ० मं० १०. १६. ८ । 'औदुम्बरेण चमसेन चतुःस्रक्तिना'–इति शत० ब्रा० ७. ९. ११. २ । [illegible] काष्ठनिर्मितश्च भवति । 'दश चमसाध्वर्यवः'–इति आ० श्रौ० ९. २. २२ । 'सदस्याः'–इति च मानवसूत्रम् । तथाच ते [illegible]; होतुः, ब्रह्मणः, उद्गातुः, सुन्वतः, प्रशास्तुः, ब्राह्मणाच्छंसिनः, पोतुः, नेष्टुः, आग्नीध्रस्य, अच्छावाकस्येति दश । कात्या० श्रौ० (९. ९. २५; १२. ३.) भाष्यं द्रष्टव्यम् ।

'पात्री' *। तयोः पात्रीचमसयोरन्यतरदौदुम्बरं सम्पादयेत्। यद्वा, पात्री मृन्मयी, शाखा चौदुम्बरी सम्पादनीया। ततः पात्रीचमसयोरन्यतरस्मिन् वालस्थलौषधिसम्भारान् समावपेयुः। समोप्तेषु तेषु सम्भारेषु दध्यादीनां सेचनं कृत्वा चमसं भूमौ प्रतिष्ठाप्य एता मासन्दीं वक्ष्यमाणमन्त्रेणाभिमन्त्रयेत्॥

तं मन्त्रं दर्शयति— "बृहच्च ते रथन्तरञ्च पूर्वौ पादौ भवतां, वैरूपञ्च वैराजं चापरौ, शाक्वररैवते शीर्षण्ये, नौधसञ्च कालेयं चानूच्ये, ऋचः प्राचीनातानाः, सामानि तिरश्चीनवायाः, यजूंष्यतीकाशाः, यश आस्तरणं, श्रीरुपबर्हणं, सविता च ते बृहस्पतिश्च पूर्वौ पादौ धारयतां, वायुश्च पूषा चापरौ, मित्रावरुणौ शीर्षण्ये, अश्विनावनूच्ये इति"—इति। इन्द्रासन्दीप्रतिपादकवाक्यवदयं मन्त्रो व्याख्येयः †॥

अभिमन्त्रणादूर्द्ध्वं माचार्यकर्त्तव्यं दर्शयति— "अथैन मेता मासन्दी मारोहयेद्"—इति। 'अथ' अभिषिक्तम् 'एनं' क्षत्रियं एतस्या मासन्द्यारूढं कुर्यात्॥

तत्र मन्त्रं दर्शयति— "वसवस्त्वा गायत्रेण छन्दसा, त्रिवृता स्तोमेन, रथन्तरेण साम्ना ऽऽरोहन्तु, तानन्वारोह साम्राज्याय; रुद्रास्त्वा त्रैष्टुभेन छन्दसा, पञ्चदशेन स्तोमेन, बृहता साम्ना ऽऽरोहन्तु, तानन्वारोह भौज्याय; आदित्यास्त्वा जागतेन छन्दसा,

---

* पात्री त्रिविधा भवति। तत्र 'दण्डापात्री' अरत्निमात्री मध्यसङ्कुचिता; 'पुरोडाशपात्री' प्रादेशमात्री समचतुरस्रा अर्थात् षडङ्गुलपरिमितपरिमण्डलखातवती; 'पिष्टपात्री' हविर्धारणी अतिविपुला; सैवाकारनियमरहिता इति विवेकः। कात्या० श्रौ० १. ३. ३६ सू० या० ह० प०।

† २२५पृ० २१पं० आरभ्य द्रष्टव्यम्।

सप्तदशेन स्तोमेन, वैरूपेण साम्ना ऽऽरोहन्तु ; तानन्वारोह स्वाराज्याय ; विश्वे त्वा देवा आनुष्टुभेन छन्दसैकविंशेन स्तोमेन, वैराजेन साम्ना ऽऽरोहन्तु ; तानन्वारोह वैराज्याय ; मरुतश्च त्वाङ्गिरसश्च देवा अतिच्छन्दसा छन्दसा , त्रयस्त्रिंशेन स्तोमेन , रैवतेन साम्ना ऽऽरोहन्तु ; तानन्वारोह पारमेष्ठ्याय ; साध्याश्च त्वाप्त्याश्च देवाः पाङ्क्तेन छन्दसा , त्रिणवेन स्तोमेन , शाक्वरेण साम्ना ऽऽरोहन्तु ; तानन्वारोह राज्याय साम्राज्यायाधिपत्याय स्वावश्यायातिष्ठायारोहेत्येता मासन्दी मभिमन्त्रयेत्'' -इति । इत्यारोहणमन्त्रवत् व्याख्येयम् * । तत्र आरोहमन्त्रे: प्रथमोत्तमत्वात् 'आरोहामि'-इत्युत्तमपुरुषः, अत्र त्वभिषेच्यत्वात् 'आरोह' -इति मध्यमपुरुषः । [illegible] पञ्चमषष्ठयोः अत्र क्रमविपर्यासो ऽध्ययनसम्प्रदायप्राप्तः (२२३पृ०) । अनेन मन्त्रेण आचार्यः आसन्द्यां क्षत्रिय मारोहयेत् ॥

आरोहणादूर्द्ध्वमभ्युत्क्रोशनं दर्शयति— "तमेतस्यामासन्द्यामासीनं राजकर्त्तारो ब्रूयुर्न वा अनभ्युत्क्रुष्टः क्षत्रियो वीर्यं कर्त्तुमर्हत्यभ्येन मुत्क्रोशामेति ; तथेति ; तं राजकर्त्तारो ऽभ्युत्क्रोशन्तीमं जना अभ्युत्क्रोशत सम्राजं साम्राज्यं भोजं भोजपितरं स्वराजं स्वाराज्यं विराजं वैराज्यं परमेष्ठिनं पारमेष्ठ्यं राजानं राजपितरं ; क्षत्रमजनि, क्षत्रियो ऽजनि, विश्वस्य भूतस्याधिपतिरजनि, विशामत्ता ऽजनि, अमित्राणां हन्ता ऽजनि, ब्राह्मणानां गोप्ता ऽजनि, धर्मस्य गोप्ता ऽजनीति'' -इति । राज्ञः कर्त्तारो 'राजकर्त्तारः' पितृभ्रात्रादयः । इन्द्रविषयाभ्युत्क्रोशनवाक्यवदिदं वाक्यं व्याख्येयम् † ॥

---

* २२६पृ० १०पं० मारभ्य द्रष्टव्यम् ।

† २२७पृ० १४पं० मारभ्य द्रष्टव्यम् ।

आचार्यस्य क्षत्रियाभिमन्त्रणं विधत्ते— "त मभ्युत्क्रुष्ट मेवंविदभिषिच्यैतयर्चाभिमन्त्रयेत"–इति । पूर्ववद् (२२८ पृ०) व्याख्येयम् ॥ ३ (१७) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनत्रिंशाध्याये) तृतीयः खण्डः ॥ ३ (१७) ॥

॥ अथ चतुर्थः खण्डः ॥

निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठाय सुक्रतुरिति त मेतस्या मासन्द्या मासीन मेवंवित् पुरस्तात् तिष्ठन् प्रत्यङ्मुख औदुम्बर्याद्रया शाखया सपलाशया जातरूपमयेन च पवित्रेणान्तर्धायाभिषिञ्चतीमा आपः शिवतमा इत्येतेन तृचेन देवस्य त्वेति च यजुषा भूर्भुवस्स्वरित्येताभिश्च व्याहृतिभिः * ॥ ४ (१८) ॥

---

* पुरस्तादप्याम्नात एष खण्डः। अस्ति च तत्र द्वयोः पाठभेदः (२२९पृ०)।

एतयर्चेत्युक्तं (२४५पृ० ६पं०) मन्त्रं दर्शयति—"निषसाद धृतव्रतो वरुणः पस्त्यास्वा, साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठाय सुक्रतुरिति"—इति। पूर्ववद् (२२८पृ०) व्याख्येयम्॥

अभिमन्त्रणादूर्ध्वं अभिषेकप्रकारं दर्शयति—"स एतस्या मासन्द्या मासीन मेवंवित् पुरस्तात् तिष्ठन् प्रत्यङ्मुख औदुम्बर्यार्द्रया शाखया सपलाशया जातरूपमयेन च पवित्रेणान्तर्धायाभिषिञ्चतीमा आपः शिवतमा इत्येतेन तृचेन, देवस्य त्वेति च यजुषा, भूर्भुवस्स्वरित्येताभिश्च व्याहृतिभिः"—इति। इन्द्राभिषेकवाक्यवद् (२३०पृ०) व्याख्येयम्॥ ४ (१८)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) चतुर्थः खण्डः॥ ४ (१८)॥

॥ अथ पञ्चमः खण्डः॥

प्राच्यां त्वा दिशि वसवो देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः साम्राज्याय दक्षिणस्यां त्वा दिशि रुद्रा देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृ-

तिभिर्भौज्याय॑ प्रतीच्यां त्वा दिश्यादित्या देवाः॑ षड्भिश्चैव पञ्चविंशै॑रहोभिरभिषिञ्च॑न्त्वेतेन च तृचेनैतेन च यजुषै॑ताभिश्च व्याहृतिभिः स्वाराज्यायो॑दीच्यां त्वा दिशि विश्वे देवाः॑ षड्भिश्चैव पञ्चविंशै॑रहोभिरभिषिञ्च॑न्त्वेतेन च तृचेनैतेन च यजुषैता॑भिश्च व्याहृतिभिर्वैराज्यायो॑र्ध्वायां त्वा दिशि मरुतश्चाङ्गिरसश्च देवाः॑ षड्भिश्चैव पञ्चविंशै॑रहोभिरभिषिञ्च॑न्त्वेतेन च तृचेनैतेन च यजुषै॑ताभिश्च व्याहृतिभिः पारमेष्ठ्याया॑स्यां त्वा ध्रुवायां॑ मध्यमायां प्रतिष्ठायां दिशि॑ साध्याश्चाप्त्याश्च देवाः॑ षड्भिश्चैव पञ्चविंशै॑रहोभिरभिषिञ्च॑न्त्वेतेन च तृचेनैतेन च यजुषैता॑भिश्च व्याहृतिभी राज्याय॑ माहाराज्यायाधिपत्याय॑ स्वावश्यायातिष्ठायेति॑ स परमेष्ठी प्राजापत्यो भवति॑ स एतेनैन्द्रेण महाभिषेके॑णाभिषिक्तः क्षत्रियः॑ सर्वा जितीर्जयति सर्वाँल्लोकान्* विन्दति॑ सर्वेषां राज्ञां॑ श्रैष्ठ्यमतिष्ठां॑ परमतां गच्छति॑ साम्राज्यं भौज्यं॑ स्वाराज्यं वैराज्यं॑ पारमेष्ठ्यं राज्यं॑ माहाराज्यमाधिपत्यं॑ जित्वाऽस्मिँल्लोके† स्वयम्भूः॑ स्वराडमृतोऽमुष्मिन्स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः सम-

---

* "सर्वाल्लोकान्" घ, "सर्वान् लोकान्" क, ङ। "सर्वांल्लोकान्" ख।

† "ऽस्मिं लोके" घ, "ऽस्मिंल्लोके" क, ङ।

वर्ति य मेतेनैन्द्रेण महाभिषेकेण क्षत्रियं शापयित्वाऽभिषिञ्चति ॥ ५ (१८) ॥

अभिषेकादूर्ध्व मभिमन्त्रण माह—"प्राच्यां त्वा दिशि वसवो देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः साम्राज्याय ; दक्षिणस्यां त्वा दिशि रुद्रा देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्भौज्याय ; प्रतीच्यां त्वा दिश्यादित्या देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः स्वाराज्याय ; उदीच्यां त्वा दिशि विश्वे देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्वैराज्याय ; ऊर्ध्वायां त्वा दिशि मरुतश्चाङ्गिरसश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः पारमेष्ठ्याय ; अस्यां त्वा ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चामराश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभी राज्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायेति ; स परमेष्ठी प्राजापत्यो भवति"—इति । उक्तेन मन्त्रेणाभिमन्त्रितः क्षत्रियः परमेष्ठिपदस्य योग्यो भूत्वा प्रजापतेः सम्बन्धीति ॥

महाभिषेक मुपसंहरति— "स एतेनैन्द्रेण महाभिषेकेणाभिषिक्तः क्षत्रियः सर्वा जितीर्जयति , सर्वाँल्लोकान् विन्दति , सर्वेषां राज्ञां श्रैष्ठ्य मतिष्ठां परमतां गच्छति ; साम्राज्यं भौज्यं स्वाराज्य' वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्य माधिपत्य' जित्वाऽस्मिँल्लोके

स्वयम्भूः स्वराळमृतो ऽमुष्मिन्स्वर्गे लोके सर्वान् कामानाप्त्वा ऽमृतः सम्भवति, य एतेनैन्द्रेण महाभिषेकेण क्षत्रियं शापयित्वा ऽभिषिञ्चति"-इति । 'यं' क्षत्रियं आचार्यः स्वद्रोहराहित्याय शपथं कारयित्वा इन्द्रसम्बन्धिना महाभिषेकेण अभिषिञ्चति, सोऽभिषिक्तः क्षत्रियः इन्द्रवत् सर्वं जयादि फलं प्राप्नोति ॥ ५ (१९) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) पञ्चमः खण्डः ॥ ५ (१९) ॥

॥ अथ षष्ठः खण्डः ॥

इन्द्रियं वा एतदस्मिँल्लोके * यद्दधि॑ यद्दध्ना ऽभिषिञ्चतीन्द्रिय॑मेवास्मिंस्तद्दधाति॑ रसो वा एष ओषधिवनस्पतिषु यन् मधु॑ यन् मध्वाभिषिञ्चति॑ रस॑मेवास्मिंस्तद्दधाति॑ तेजो वा एतत्पशूनां यद् घृ॑तं यद् घृतेनाभिषिञ्चति॑ तेज एवास्मिंस्तद्दधात्य॑मृतं वा एतदस्मिँल्लोके † यदापो॑ यदद्भिरभिषिञ्चत्य॑मृतत्वमेवास्मिंस्तद्दधाति॑ सो ऽभिषिक्तो ऽभिषेक्त्रे ब्राह्मणाय हिरण्यं॑ दद्यात्॑ सहस्रं दद्यात्॑ क्षेत्रं चतुष्पाद्

---

*, † "०स्मिन् लोके" क, "०स्मिंल्लोके" ख, ङ, "०स्मिंलोके" घ ।

दद्यादथाप्याहुरसङ्ख्यात मेवापरिमितं दद्यादपरिमितो वै क्षत्रियोऽपरिमितस्यावरुद्ध्या इत्यथास्मै सुराकंसं हस्त आदधाति स्वादिष्ठया मदिष्ठया पवस्व सोम धारया इन्द्राय पातवे सुत इति तां पिबेद् यदत्र शिष्टं रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः इदं तदस्य मनसा शिवेन सोमं राजान मिह भक्षयामि अभि त्वा वृषभा सुते सुतं सृजामि पीतये तृम्पा व्यश्नुही मद मिति यो ह वाव सोमपीथः सुरायां प्रविष्टः सहैवैतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य भक्षितो भवति न सुरा तां पीत्वा ऽभिमन्त्रयेतापाम सोमं शन्नो भवेति तद्यथैवादः प्रियः पुत्रः पितरं प्रिया वा जाया पतिं सुखं शिव मुपस्पृशत्याविस्रसं एवं हैवैनेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य सुरा वा सोमो वान्यद्वान्नाद्यं सुखं शिव मुपस्पृशत्याविस्रसः ॥ ६ (२०) ॥

अभिषेकसाधनानि दध्यादिद्रव्याणि प्रशंसति— "इन्द्रियं वा एतदस्मिँल्लोके यद्दधि, यद्दध्ना ऽभिषिञ्चतीन्द्रिय मेवास्मिंस्तद्दधाति ; रसो वा एष ओषधिवनस्पतिषु यन् मधु, यन् मध्वाभिषिञ्चति रस मेवास्मिंस्तद्दधाति ; तेजो वा एतत् पशूनां यद् घृतं, यद् घृतेनाभिषिञ्चति तेज एवास्मिंस्तद्दधाति ; अमृतं वा एतदस्मिन् लोके यदापो, यदद्भिरभिषिञ्चत्यमृतत्व मेवास्मिंस्तद्-

धाति"-इति। दध्न इन्द्रियपाटवहेतुत्वाद् इन्द्रियत्वम्। मधुनः पुष्पजन्यत्वेन ओषधिवनस्पतिरसत्वम्। घृतस्य स्निग्धभास्वरत्वेन पशुतेजस्त्वम्। अपां चाप्यायनहेतुत्वादमृतत्वम्। एतैर्द्रव्यैरभिषिक्ते सति यजमान इन्द्रियादिकं सम्पादयति॥

आचार्याय दक्षिणादानं विधत्ते— "सोऽभिषिक्तोऽभिषेक्त्रे ब्राह्मणाय हिरण्यं दद्यात्, सहस्रं दद्यात्, क्षेत्रं चतुष्पाद्दद्यात्; अथाप्याहुरसङ्ख्यात मेवापरिमितं दद्यादपरिमितो वै क्षत्रियोऽपरिमितस्यावरुद्ध्या इति"-इति। हिरण्यस्यैव सङ्ख्या सहस्र मिति, सहस्रनिष्कपरिमित मित्यर्थः*। चतुष्पाच्छब्देन गवादिक मभिधीयते। पूर्वोक्तसहस्रपक्ष मपेक्ष्याधिकाभिप्रायेण असङ्ख्यात मिति पक्षान्तर मुक्तम्; तस्यैव व्याख्यान मपरिमित मिति। इयदेवेति सङ्ख्यानियमो नास्ति किन्तु स्वशक्त्यनुसारेण प्रभूत मेव दद्यात्। क्षत्रियो हि देशाधिपतित्वेन 'अपरिमितः' बहुधनयुक्तः, अतः 'अपरिमितस्य' प्रभूतस्य फलस्य सिद्ध्यर्थ मित्यभिप्रायेण पक्षान्तरम्॥

दक्षिणायां दत्ताया माचार्यकर्त्तव्यं दर्शयति – "अथास्मै सुराकंसं हस्त आदधाति, स्वादिष्ठया मदिष्ठया पवस्व सोमधारया इन्द्राय पातवे सुत इति"-इति। 'अथ' दक्षिणास्वीकारादनन्तरम्, 'अस्मै' अस्य क्षत्रियस्य हस्ते सुरया पूर्णं कांस्यपात्रं

---

* "सर्षपाः षट् यवो मध्यस्, त्रियवं त्वेककृष्णलम्।
पञ्चकृष्णलको माषस्, ते सुवर्णस्तु षोडश।
* * * * । चतुःसौवर्णिको निष्कः"-इत्यादि म० सं० ८. १३३-१३८। "अभिषेचनीये तु द्वात्रिंशत्-द्वात्रिंशत् सहस्राणि पृथक् मुख्येभ्यः, षोडश-षोडश द्वितीयिभ्यः, अष्टावष्टौ तृतीयिभ्यः, चत्वारि-चत्वारि पादिभ्यः"-इति आप० श्रौ० ९, २, ३-५।

स्वादिष्ठयेति मन्त्रेण स्नापयेत् । स च मन्त्रः क्रत्वङ्गाभिषेके व्याख्यातः (२०२पृ० ५पं०) ॥

क्षत्रियकर्त्तव्यं दर्शयति— “तां पिबेद् , यदत्र शिष्टं रसिनः सुतस्य , यदिन्द्रो अपिबच्छचीभिः , इदं तदस्य मनसा शिवेन , सोमं राजान मिह भक्षयामि ; अभि त्वा वृषभा सुते , सुतं सृजामि पीतये, तृम्पा व्यश्नुही मद मिति”–इति । ‘तां’ कांस्यपात्रस्थां सुरां क्षत्रियो यदत्रेतिमन्त्रद्वयेन पिबेत् । ‘अत्र’ कांस्यपात्रे ‘रसिनः’ रसयुक्तस्य ‘सुतस्य’ अभिषुतस्य व्रीह्याद्यङ्कुरजस्य पेयद्रव्यस्य यत् ‘शिष्ट’’ योऽवशिष्टो भागः , ‘यत्’ च द्रव्य ‘शचीभिः’ कर्मविशेषैः संस्कृत मिन्द्रो ऽपिबत् । शचीशब्दः कर्मनाम * । ‘इह’ अस्मिन्नभिषेककर्मणि ‘सोमं राजानं’ सोमसदृशं ‘अस्य’ पेयद्रव्यस्य , ‘तदिदं’ स्वरूपं ‘शिवेन’ शान्तेन भक्तियुक्तेन मनसा भक्षयामि । सोऽय मेको मन्त्रः । (वा० सं० १९. ३५.) हे ‘वृषभ’ श्रेष्ठ ! इन्द्र ! त्वामभिलक्ष्य ‘सुते’ अस्मिन् द्रव्ये अभिषुते सति ‘पीतये’ तव पानार्थं ‘सुतम्’ अभिषुतं द्रव्यं ‘सृजामि’ त्वद्धस्ते ददामि । ‘तृम्प’ तेन द्रव्येण तृप्तो भव । ‘मद’’ हर्षं ‘व्यश्नुहि’ विशेषेण प्राप्नुहि । अथ द्वितीयो मन्त्रः (सं० ८. ४५. २२.) ॥

तदिदं पानं प्रशंसति— “यो ह वाव सोमपीथः सुरायां प्रविष्टः, स हैवैतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य भक्षितो भवति ; न सुरा”–इति । ‘यो ह वाव’ यः खलु ‘सोमपीथः’ सोमस्य पानविशेषः ‘सुरायां’ सुराद्रव्ये प्रविष्टोऽस्ति , ‘एतेन’ सोमपानविशेषेण सहैव पूर्वोक्तैन्द्राभिषेकविधानेन अभिषिक्तस्य

---

* निघ० २, १, २२ । निरु० ३, १, १ ; १२, ३, ८ ।

क्षत्रियस्य द्रव्यविशेषो भक्षितो भवति; न तु सुरा भक्षिता भवति *। सोऽयं मन्त्रद्वयस्य महिमा † ॥

पानादूर्द्ध्व मभिमन्त्रणं विधत्ते— "तां पीत्वा ऽभिमन्त्रयेतापाम सोमं, शन्नो भवेति"-इति । "अपाम सोमम्"-इत्यृगेका (सं० ८. ४८. ३. ‡), "शन्नो भव"-इति द्वितीया (सं० ८. ४८. ४. §); ताभ्या मभिमन्त्रयेत ॥

इदानीं दृष्टान्तेन पानं प्रशंसति— "तद्यथैवादः प्रियः पुत्रः पितरं, प्रिया वा जाया पतिं, सुखं शिव मुपस्पृशत्याविस्रसः, एवं हैवैतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य सुरा वा सोमो वान्यद्वान्नाद्यं सुखं शिव मुपस्पृशत्याविस्रसः"-इति । 'तत्' तत्र पाने, आदौ लौकिकं निदर्शन मुच्यते,— यथैव प्रियः पुत्रः शिवं सुखं यथा भवति तथा पितर मुपस्पृशति, प्रिया वा जाया च पतिं यथा स्पृशति । 'शिवं' शान्तम्; शास्त्रनिषिद्धमार्गेण यत् सुखं, तत् नरकहेतुत्वादुग्रम्; विहितमार्गेण तु तदभावाच्छान्तम्; सुखस्पर्शस्यावधिर्मेत्याविस्रस इत्यनेनोच्यते । 'आ अविस्रसः' आ अविस्रंसनात्, देहपातपर्यन्त मित्यर्थः । यथा

---

* "न वा एतदयो न हिरण्यं, यत् सीसम्; न स्त्री न पुमान्, यत् क्लीबः; न सोमो न सुरा, यत् सौत्रामणीसम्बद्धा"-इति तै० ब्रा० १. ८. ५. २। "सुरा सुनोतेः"-इति निरु० १. ४. १।

† "आम्नायवचनादहिंसा प्रतीयेत"-इति, "आम्नायवचनादेतत् भवति"-इति च निरु० १. ५. १; ७. ७. १।

‡ "अपाम सोम ममृता अभूमागन्म ज्योतिरविदाम देवाम् ।
किं नूनमस्मान् कृणवदरातिः किमु धूर्त्तिरमृत मर्त्त्यस्य"-इति तत्पाठः ।

§ "शं नो भव हृद आ पीत इन्दो पितेव सोम सूनो सुशेवः ।
सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः"-इति तत्पाठः ।

स्वर्गहयं हृष्टहेतुः, 'एवं हैव' अनेनैव प्रकारेण पूर्वोक्तैन्द्रमहाभिषेकविधिना अभिषिक्तस्य क्षत्रियस्य सुरा वा सोमो वा अन्यान्यन्नद्रव्याणि वा देहपातपर्यन्तं आत्मसुखस्वर्गप्रदानि ॥ ६ (२०) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) षष्ठः खण्डः ॥ ६ (२०) ॥

॥ अथ सप्तमः खण्डः ॥

एतेन ह वा ऐन्द्रेण महाभिषेकेण तुरः कावषेयो जनमेजयं पारिक्षित मभिषिषेच तस्मादु जनमेजयः पारिक्षितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन * च मेध्येनेजे तदेषाभियज्ञगाथा गीयते आसन्दीवति धान्यादं रुक्मिणं हरितस्रजम् अश्वं बबन्ध सारङ्गं देवेभ्यो जनमेजय इत्येतेन ह वा ऐन्द्रेण महाभिषेकेण च्यवनो भार्गवः शार्यातं मानव मभिषिषेच तस्मादु शार्यातो मानवः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे देवानां हापि सत्रे गृहपतिरासैतेन ह वा ऐन्द्रेण

---

* "परियायाश्वेन" घ । एवमिह सर्वत्र, उत्तरखण्डे ऽपि ।

महाभिषेकेण सोमशुष्मा वाजरत्नायनः शतानीकं सात्राजित मभिषिषेच तस्मादु शतानीकः सात्राजितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेज एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदावाम्बाष्ठ्य मभिषिषिचतुस्तस्मादाम्बाष्ठ्यः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेज एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदौ युधांश्रौष्टि मौग्रसैन्य मभिषिषिचतुस्तस्मादु युधांश्रौष्टिरौग्रसैन्यः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेज एतेन ह वा ऐन्द्रेण महाभिषेकेण काश्यपो विश्वकर्माणं भौवन मभिषिषेच तस्मादु विश्वकर्मा भौवनः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे भूमिर्ह जगावित्युदाहरन्ति न मा मर्त्यः कश्चन दातु मर्हति विश्वकर्मन् भौवन मां दिदासिथ निमङ्क्ष्ये ऽहं सलिलस्य मध्ये मोघस्त एष काश्यपायास सङ्गर इत्येतेन ह वा ऐन्द्रेण महाभिषेकेण वसिष्ठः सुदासं पैजवन मभिषिषेच तस्मादु सुदाः पैजवनः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेज एतेन ह वा ऐन्द्रेण महाभिषेकेण संवर्त्त आङ्गिरसो मरुत्त

माविक्षित मभिषिषेच तस्मादु मरुत्त आविक्षितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे तदप्येष* श्लोको ऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे आविक्षितस्य कामप्रेर्विश्वे देवाः सभासद इति ॥ ७ (२१) ॥

उक्तं महाभिषेकं चिरन्तनशिष्टाचारोदाहरणेन प्रशंसति— “एतेन ह वा ऐन्द्रेण महाभिषेकेण तुरः कावषेयो जनमेजयं पारिक्षित मभिषिषेच ; तस्मादु जनमेजयः पारिक्षितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे”–इति । कवषस्य पुत्रः, तुरनामको महर्षिः, परिक्षितपुत्रं जनमेजयम्, उक्तविधानेन अभिषिषेच ; तस्मादेव कारणात् जनमेजयः ‘सर्वतः’ सर्वासु दिक्षु पृथिवीं ‘समन्तम्’ अन्तेन समुद्रतीरेण संयुक्तं यथा भवति तथा ‘जयन्’ विजयं प्राप्नुवन् ‘परीयाय’ परितश्चचार । अभिषेकमाहात्म्येनैव दिग्विजयं कृतवानित्यर्थः । अभिषेकप्रसादादेव ‘मेध्येन’ यागयोग्येन अश्वेन च ‘ईजे’ इष्टवान्, अश्वमेधं कृतवानित्यर्थः ॥

अस्मिन्नर्थे काञ्चिद् गाथा मुदाहरति— “तदेषाभियज्ञगाथा गीयते”–इति । ‘तत्’ तस्मिन् जनमेजयवृत्तान्ते ‘एषा’ वक्ष्यमाणा ‘गाथा’ यज्ञविषया गीतिः वैदिकैः अभितो गीयते ॥

तां गाथां दर्शयति—“आसन्दीवति धान्यादं रुक्मिणं हरितस्रजम्, अश्वं बबन्ध सारङ्गं देवेभ्यो जनमेजय इति”–इति । आसन्दीवानिति देशविशेषस्य नामधेयम् । तस्मिन् देशे जनमे-

---

* क-ख-पुस्तकयोरिह निर्विसर्गपाठः ।

जयो 'देवेभ्यो' देवार्थं यागयोग्य मश्वं बबन्ध । कीदृश मश्वम् ? 'धान्यादं' धान्य मेवात्ति , 'रुक्मिणं' रुक्मशब्देन ललाटगतं श्वेतलाञ्छन मुपलक्ष्यते , तदुक्तम् , हरितवर्णा स्रक् यस्यासौ 'हरितस्रक्' पुष्पमाला इव वर्णो देहं व्याप्य वर्त्तत इत्यर्थः, सारं कर्मसु श्रेष्ठं यागं गच्छतीति 'सारङ्गः' । 'इति' अनया गाथया जनमेजयस्य अभिषेकमहिमोदाहृतः ॥

जनमेजयवत् शार्यातनामकं राजान मुदाहरति -- "एतेन ह वा ऐन्द्रेण महाभिषेकेण च्यवनो भार्गवः शार्यातं मानव मभिषिषेच ; तस्माद् शार्यातो मानवः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे ; देवानां हापि सत्रे गृहपतिरास"-- इति । भृगोः पुत्रः , च्यवननामको महर्षिः , मनुवंशोत्पन्नं शार्यातनामकं राजानम् अभिषिषेच । तस्मात् फलं पूर्ववत् । किञ्च देवानां सम्बन्धिनि सत्रेऽपि शार्यातो गृहपतिरभूत् ॥

शतानीकनामानं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण सोमशुष्मा वाजरत्नायनः शतानीकं सात्राजित मभिषिषेच ; तस्माद् शतानीकः सात्राजितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"-इति । सोमशुष्मनामकः कश्चिन् महर्षिः , स च वाजरत्नस्य पौत्रः । तथाविधो मुनिः , सत्राजितः पुत्रं शतानीकनामकं क्षत्रियम् अभिषिषेच । शेषं पूर्ववत् ॥

आम्बाष्ठ्यनामानं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदावाम्बाष्ठ्य मभिषिषिचतुस्तस्मादाम्बाष्ठ्यः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"-इति ॥

युधांश्रौष्टिनामक मुग्रसेनस्य पुत्रं राजान मुदाहरति— “एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदौ युधांश्रौष्टि मौग्रसैन्य मभिषिषिचतुस्तस्मादु युधांश्रौष्टिरौग्रसैन्यः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे” इति ॥

भुवनाख्यस्य पुत्रं विश्वकर्मनामक राजान मुदाहरति — “एतेन ह वा ऐन्द्रेण महाभिषेकेण कश्यपो विश्वकर्माणं भौवन मभिषिषेच ; तस्मादु विश्वकर्मा भौवनः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे” इति ॥

भौवनाभिषेकमाहात्म्यं प्रशंसितुं पुरातनमहर्षिप्रोक्त मुदाहरणं दर्शयति— “भूमिर्ह जगावित्युदाहरन्ति” इति । ‘भूमि’ देवता ‘जगौ’ भौवनं प्रति किञ्चिद् वाक्यं गाथारूप मुक्तवती ‘इति’ एवं पूर्वे महर्षयः उदाहरन्ति ॥

तां गाथां दर्शयति— “न मा मर्त्यः कश्चन दातु मर्हति विश्वकर्मन् भौवन मां दिदासिथ, निमङ्क्ष्येऽहं सलिलस्य मध्ये मोघस्त एष कश्यपायास सङ्गर इति” इति । भुवनाख्यस्य पुत्र ! हे विश्वकर्मन् ! कश्चिदपि मनुष्यः ‘मां’ भूमिं दातुं नार्हति । अत एव मीमांसका विचार्य सर्वस्वदाने महाभूमिदानं निवारितवन्तः* । एवं सति, त्वं ‘मां’ भूमिं ‘दिदासिथ’ कश्यपाय त्वदीयाचार्याय दातु मिच्छसि , अहं तु ‘सलिलस्य’ समुद्रस्य मध्ये ‘निमङ्क्ष्ये’ निमज्जनं करिष्ये ; तथा सति, ‘ते कश्यपाय’ त्वदीयाचार्यस्य कश्यपस्य ‘एष सङ्गरः’ भूमिप्रतिग्रहविषयः ‘मोघः आस’ व्यर्थ एव बभूव । ‘इति’ ईदृश मपि महाभूमिमज्जनं महाभिषेकमहिम्ना निवारित मिति तात्पर्यार्थः ॥

---

* मी० द० ६, ७, १ सू० २ अधि० द्रष्टव्यम्।

सुदा इत्येतन्नामकं पिजवनस्य पुत्रं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण वसिष्ठः सुदासं पैजवन मभिषिषेच ; तस्मादु सुदाः पैजवनः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"–इति ॥

अविक्षिन्नामकस्य पुत्रं मरुत्तनामानं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेण संवर्त्त आङ्गिरसो मरुत्त माविक्षित मभिषिषेच ; तस्मादु मरुत्त आविक्षितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे"–इति । संवर्त्तनामको महर्षिः, अङ्गिरसः पुत्रः ॥

तेन कृतं मरुत्ताभिषेकं प्रशंसितुं श्लोक मुदाहरति— "तदप्येषः श्लोको ऽभिगीतः"–इति । 'तत्' तस्मिन् अपि मरुत्ताभिषेकमाहात्म्ये 'एषः' वक्ष्यमाणः 'श्लोकः' पादबद्धो मन्त्रः 'अभिगीतः' अभितः सर्वैः पठितः ॥

तं श्लोकं दर्शयति— "मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे, आविक्षितस्य कामप्रेर्विश्वे देवाः सभासद इति"–इति । मरुत्तनाम्नो राज्ञो गृहे मरुत्संज्ञका देवाः भोजनकाले परिवेषणस्य कर्त्तारो भूत्वा अवसन् ; तथैव 'आविक्षितस्य' अविक्षित्-पुत्रस्य 'कामप्रेः' सर्वकामपूरितस्य मरुत्तस्य गृहे 'विश्वे' सर्वे देवाः 'सभासदः' सभाया मुपविष्टाः, सेवका इति शेषः । 'इति' एवं सर्वो ऽपि महाभिषेकस्य महिमेत्यभिप्रायः ॥ ७ (२१) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) सप्तमः खण्डः ॥ ७ (२१) ॥

॥ अथ अष्टमः खण्डः ॥

एतेन ह वा ऐन्द्रेण महाभिषेकेणोदमय आत्रेयो ऽङ्ग मभिषिषेच, तस्मादङ्गः * समन्तं सर्व्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे, स होवाचालोपाङ्गो, दश नागसहस्राणि दश दासीसहस्राणि ददामि ते ब्राह्मणोप मा ऽस्मिन् यज्ञे ह्वयस्वेति,

तदप्येते श्लोका अभिगीताः,
याभिर्गोभिरुदमय, प्रैयमेधा † अयाजयन्
द्वे द्वे सहस्रे बद्धाना ‡ मात्रेयो मध्यतो ददात्,
अष्टाशीतिसहस्राणि, § श्वेतान् वैरोचनो हयान्,
प्रष्टीन् ¶ निसृज्य प्रायच्छद् यजमाने पुरोहिते,
देशाद्देशात्समोळ्हानां, सर्व्वासा माढ्याद्दुहितृणाम्,
दशाददात्सहस्राण्यात्रेयो निष्ककण्ठ्यः,
दश नागसहस्राणि दत्त्वात्रेयो ऽवचत्नुके
श्रान्तः पारिकुटान् प्रैप्सद्, दानेनाङ्गस्य ब्राह्मणः,
शतं तुभ्यं शतं, तुभ्य मिति स्मैव प्रताम्यति,
सहस्रं तुभ्य मित्युक्त्वा प्राणान्त्स्म प्रतिपद्यत
इति ॥ ८ (२२) ॥

---

* "तस्मादङ्गः" क।
† "प्रयमेधा" ख, घ, ङ।
‡ "बद्धाना" ग।
§ "अष्टाशीतिः सहस्राणि" ख, घ, ङ, च, ठ।
¶ "प्रष्ठीन्" क।

अङ्गनामकं राजान मुदाहरति— "एतेन ह वा ऐन्द्रेण महाभिषेकेणोदमय आत्रेयो ऽङ्ग मभिषिषेच ; तस्मादङ्गः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे" इति । उदमयनामकः कश्चित् महर्षिः अत्रेः पुत्रः, अङ्ग मभिषिषेच ॥

तस्याङ्गाभिषेकस्य माहात्म्यं दर्शयितुं कञ्चिद् वृत्तान्त माह— "स होवाचालोपाङ्गो,— दश नागसहस्राणि दश दासीसहस्राणि ददामि ते, ब्राह्मणोप मा ऽस्मिन् यज्ञे ह्वयस्वेति" इति । यो ऽय मङ्गनामको राजा उक्तः, 'सः' अयम् 'अलोपाङ्गः' अहदस्याङ्गसौष्ठवः, सम्पूर्णावयव इत्यर्थः । स कदाचित् स्वकीयाभिषेककर्त्तरि उदमयनामके पुरोहिते स्वार्थं यागं कुर्वाणे सति, तं प्रत्येव मुवाच । हे ब्राह्मण ! 'अस्मिन्' त्वदीये यज्ञे माम् 'उपह्वयस्व' ममाह्वानं कुरु ; अह मागत्य त्वदीययज्ञे दक्षिणासम्पूर्त्यर्थं तुभ्यं गजसहस्राणि दासीसहस्राणि च ददामीति * । सेयं बहुदानसम्पत्तिः, समृद्धिश्च महाभिषेकप्रसादलब्धा ॥

एत मेवार्थं प्रपञ्चयितुं श्लोकानुदाहरति— "तदप्येते श्लोका अभिगीताः"-इति । 'तत्' तस्मिन्नप्यङ्गराजपुरोहितस्य यागे दानप्रतिपादकाः 'एते' पञ्च श्लोकाः 'अभिगीताः' सर्वतो ऽभिज्ञैः पठिताः ॥

तत्र प्रथमं श्लोक माह— "याभिर्गोभिरुदमयं प्रैयमेधा अयाजयन्, द्वे द्वे सहस्रे बद्वाना मात्रेयो मध्यतो ऽददात्"-इति । प्रियमेधस्य पुत्राः 'प्रैयमेधाः' महर्षयः, उदमयनामकं अङ्गराजपुरोहितं 'याभिर्गोभिः' दक्षिणारूपाभिः 'अयाजयन्', ता गावो वक्ष्यन्त इति शेषः । 'बद्वम्'-इति शतकोटिसङ्ख्याया

---

* मूले तु "दश नागसहस्राणि, दश दासीसहस्राणि"-इति विद्यते ।

नामधेयम् * । 'बद्वानां' शतकोटिसङ्ख्याकानां गवां मध्ये, प्रतिदिनं द्वे द्वे सहस्रे 'मध्यत:' मध्यन्दिनसवने अत्रिपुत्र उदमयो दत्तवान् ॥

द्वितीयं श्लोक माह— "अष्टाशीतिसहस्राणि श्वेतान् वैरोचनो हयान्, प्रष्टीन् निशृत्य प्रायच्छद् यजमाने पुरोहिते"— इति । 'वैरोचन:' विरोचनस्य पुत्र: अङ्गनामको राजा, स्वकीयपुरोहिते उदमयनामके 'यजमाने' यागं कुर्वाणे, स्वय मागत्य अष्टाशीतिसहस्रसङ्ख्याकान् श्वेतवर्णान् 'प्रष्टीन्' पृष्ठवाहनयोग्यवयस्कान् 'निशृत्य' स्वकीयाश्वबन्धनस्थानान्निस्सार्य 'प्रायच्छत्' दत्तवान् ॥

तृतीयं श्लोक माह— "देशाद्देशात्समोळ्हानां सर्वासा माढ्यदुहितृणाम्, दशाददात्सहस्राण्यात्रेयो निष्ककण्ठ्य:" इति ।

---

* दश, [शतं], सहस्रम्, अयुतम्, प्रयुतम्, नियुतम्, अर्बुदम्, न्यर्बुदम्, निखर्वम्, बद्वम्, अक्षितम् । एताश्च संज्ञा: क्रमात् दशगुणोत्तरा वैदिक्य: । शा० ब्रा० 10. 14. २ द्रष्टव्यम् । तत्रात्र प्रयुत मिति लक्षस्यैव नामान्तरम्, अर्बुद मिति च कोटेर्नामान्तरम्; एवं शतकोटेर्नाम स्यान्निखर्व मिति, तथा बद्व मिति तु स्यात् सहस्रकोटेरेव नामधेय मिति विचार्यम् । कस्यचिन्मते त्विह बद्वशब्द: स्यात् बद्ध मिति नान्तस्यार्थे । तथा च 'बद्वानां' स्थिरतया दानार्थं रक्षितानां गवा मिति, देवयजनमार्गस्थानां गवा मिति वार्थ: सम्भाव्येत । नान्तवद्व्याख्यानं ता० ब्रा० १. १. ६ सा० भा० द्रष्टव्यम् । " चतुरशीत्यधिकैस्त्रयोदशसहस्रैरेकं बद्वं (बदं) भवति । तथाहि— 'हिरण्येन ०—० सप्त च (१९पं० ७, ८पं०)'-इति सुश्रुतानि सप्ताधिकशतं बद्वानि श्रीमद्भागवतश्लोके चतुर्दशलक्षत्वेन सङ्गृहीतानि,— 'अदात् कर्मणि मष्णारे नियुतानि चतुर्दश'-इति (२८ श्लो०) । एवं चतुर्दशलक्षाणां सप्ताधिकशतभागो बद्व मित्युक्तं भवति । इयञ्च बद्वसङ्ख्या श्लोकेन सङ्गृह्यते— 'चतुर्दशानां लक्षाणां सप्ताधिकशतांशक: । बद्वं चतुरशीत्यग्रसहस्राणि त्रयोदश'-इति"-इति भाग० पु० ९.२०.२९ श्लोकस्य १०. ७०. ९ श्लोकस्य च व्याख्याने स्वामी श्रीधर: ।

'देशाद्देशात्' दिग्विजयकाले तत्तद्देशविशेषात् 'समोळ्हानां' सम्यक् 'आ' समन्तात् 'ऊढानाम्' आनीतानाम् 'आढ्यदुहितॄणां' धनिकपुत्रीणां सर्वासां 'दश सहस्राणि' 'आत्रेयः' 'अङ्गराजपुरोहितो दत्तवान्। ताश्च दुहितरो 'निष्ककण्ठाः' आभरणोपेतकण्ठयुक्ताः ॥

चतुर्थं श्लोक माह— "दश नागसहस्राणि दत्त्वात्रेयोऽवसथके, श्रान्तः पारिकुटान् प्रैप्सद् दानेनाङ्गस्य ब्राह्मणः" इति। अङ्गराजस्य पुरोहितो ब्राह्मणः आत्रेयः, अवसथकनामके गजसहस्राणि दशसङ्ख्याकानि दत्त्वा, दानेन श्रान्तः सन् 'पारिकुटान्' परिचारकान् 'प्रैप्सत्' प्रेषितवान्, हे परिचारकाः! यूयं दत्तेत्येव मुक्तवानित्यर्थः ॥

पञ्चमं श्लोक माह— "शतं तुभ्यं शतं तुभ्य मिति स्मैव प्रताम्यति, सहस्रं तुभ्य मित्युक्त्वा प्राणान्स्म प्रतिपद्यत इति"-इति। परिचारकाणा मध्ये एकैकशो वक्तु मशक्तः, तुभ्यं शतं तुभ्यं शत मिति शतसङ्ख्या प्रोक्ता; तत्रापि 'प्रताम्यति स्मैव' ग्लानि मेव प्राप्तवान्। ततः शतसङ्ख्यां परित्यज्य सहस्रं तुभ्य मित्युक्त्वा, तस्या मपि सङ्ख्यायां बहुशः प्रोक्तायां श्रान्तः सन्, 'प्राणान् प्रतिपद्यते स्म' मध्ये मध्ये श्रमपरिहाराय दीर्घश्वासं कृतवान् इत्यर्थः। अङ्गराजस्य पुरोहितयागे तादृशसामर्थ्यं महाभिषेकप्रसादल्लब्ध मिति तात्पर्यार्थः ॥ ८ (२२) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) अष्टमः खण्डः ॥ ८ (२२) ॥

॥ अथ नवमः खण्डः ॥

एतेन ह वा ऐन्द्रेण महाभिषेकेण' दीर्घतमा मामतेयो' भरतं दौष्षन्ति * मभिषिषेच' तस्मादु भरतो दौष्षन्तिः' समन्तं' सर्वतः पृथिवीं जयन् परीयाया'श्वैश्च मेध्यैरीजे'

तदप्येते श्लोका अभिगीताः'

हिरण्येन परीवृतान्' कृष्णाञ्छुक्लदतो † मृगान्'
मष्णारे भरतोऽददाच्छतं' बद्धानि सप्त च'
भरतस्यैष दौष्षन्ते'रग्निः साचीगुणे ‡ चितः'
यस्मिन्त्सहस्रं ब्राह्मणा' बद्वशो गा विभेजिरे'
अष्टासप्ततिं भरतो' दौष्षन्तिर्यमुनामनु'
गङ्गायां वृत्रघ्ने'ऽबध्नात् पञ्चपञ्चाशतं' हयान्
त्रयस्त्रिंशच्छतं राजा'ऽश्वान् बद्ध्वाय मेध्यान्'
दौष्षन्तिरत्यगाद्राज्ञो' मायां मायवत्तरः' §
महाकर्म भरतस्य' न पूर्वे नापरे जनाः'
दिवं मर्त्त्य इव हस्ताभ्यां' नोदापुः पञ्चमानवा'

इत्येतं ह वा ऐन्द्रं महाभिषेकं' बृहदुक्थ ऋषिर्दुर्मुखाय पाञ्चालाय प्रोवाच' तस्मादु दुर्मुखः

---

* "दौष्यन्ति" क, "दौःषन्ति" ख, घ, ञ, ठ। एवमिहोत्तरत्रापि।

† "कृष्णान् शुक्लदतो" क, "कृष्णाच्छुक्लदतो" ख, ग।

‡ "साचिगुणे" क।

§ "मायावत्तरः" क।

पाञ्चालो॑ राजा सन् विद्यया॑ समन्तं सर्वतः पृथिवीं जयन् परीयायैतं॑ ह वा ऐन्द्रं॑ महाभिषेकं॑ वासिष्ठः सात्यहव्यो ऽत्यरातये॑ जानन्तपये प्रोवाच॑ तस्मादत्यरातिर्जानन्तपिरराजा सन् विद्यया॑ समन्तं॑ सर्वतः पृथिवीं जयन् परीयाय॑ स होवाच वासिष्ठः॑ सात्यहव्यो ऽजैषीर्वै॑ समन्तं॑ सर्वतः पृथिवीं महन् मा गमयेति॑ स होवाचात्यरातिर्जानन्तपिर्यदा ब्राह्मणोत्तरकुरून् जयेय मथ त्व मु हैव॑ पृथिव्यै॑ राजा स्याः॑ सेनापतिरेव ते ऽहं स्या मिति॑ स होवाच वासिष्ठः सात्यहव्यो॑ देवक्षेत्रं वै॑ तन्न वैतन्मर्त्यो जेतु मर्हत्य॑द्रुक्षो वै म आ ऽत इदं॑ दद इति॑ ततो हात्यरातिं जानन्तपि मात्तवीर्यं निःशुक्र ममित्रतपनः॑ शुष्मिणः शैब्यो * राजा जघान॑ तस्मादेवं विदुषे ब्राह्मणायैवं चक्रुषे॑ न क्षत्रियो द्रुह्येन्नेद्राष्ट्रादवपद्येय नेद्वा मा प्राणो जहदिति-जहदिति ॥ ९ (२३) ॥

॥इत्यैतरेयब्राह्मणेऽष्टमपञ्चिकायां चतुर्थोऽध्यायः ॥ ४॥

दुष्यन्तस्य पुत्रं † भरताख्यं राजान मुदाहरति—'एतेन ह वा ऐन्द्रेण महाभिषेकेण दीर्घतमा मामतेयो भरतं दौष्यन्ति मभिषिषेच ; तस्मादु भरतो दौष्यन्तिः समन्तं सर्वतः पृथिवीं

---

* "शैब्यो" क, ड, ज ।

† "दुष्यन्तपुत्रं" ख ।

जयन्, परीयायाश्वैश्च मेध्यैरीजे" इति। ममताख्यायाः स्त्रियाः पुत्रो 'दीर्घतमाः' इत्येतन्नामा मुनिर्भरत मभिषिषेच। भरतोऽपि दिग्विजयेन पृथिवीं परीत्य, मेध्यैरश्वैरपीजे। 'उ च' -इति निपातयोः समूहः समुच्चयार्थः॥

भरताभिषेकमाहात्म्यं दर्शयितुं श्लोकान् उदाहरति— "तदप्येते श्लोका अभिगीताः" इति। 'तत्' तस्मिन् भरताभिषेकमाहात्म्ये अपि 'एते' वक्ष्यमाणाः पञ्च श्लोकाः परिगीयन्ते॥

तत्र प्रथमं श्लोक माह— "हिरण्येन परीहृतान् कृष्णाञ्छुक्लदतो मृगान्; मष्णारे भरतोऽददाच्छतं बद्वानि सप्त च" इति। मृगशब्देनात्र गजा विवक्षिताः; मृगवदिति बाहुल्यविवक्षया वा मृगशब्दः। ते च गजाः 'हिरण्येन परीहृताः' स्वर्णाभरणयुक्ताः, शरीरपुष्ट्या वर्णोत्कर्षे सत्यन्तं कृष्णाः प्रतिभासन्ते, शुक्लाभ्यां दन्ताभ्यां युक्ताः। तादृशान् गजान्, मष्णारनामके देशे, भरतनामको राजा दत्तवान्। शत मित्यादिना तत्सङ्ख्योच्यते। 'बद्वम्'-'वृन्दम्'-इत्येतौ पर्यायौ *। वृन्दशब्दस्य शतकोटिवाचित्वेन गणितग्रन्थकारैर्दर्शितं॥

"एकं दश च शतं च सहस्रञ्चायुतनियुतं तदा।
प्रयुतकोट्यर्बुदवृन्दं स्थान स्थानाद् दशगुणात्" -इति †।

---

* नात्र मानं किञ्चित् पश्यामः।

† "एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः। अर्बुद मब्जं (शङ्कः) खर्वनिखर्वौ महापद्मशङ्कवस्तस्मात्। जलधिश्चान्त्यं मध्यं परार्धमिति दशगुणोत्तराः संज्ञाः सङ्ख्याया व्यवहारार्थं कृताः पूर्वैः"—इति लीला०। "एकं दश शतं चैव सहस्रमयुतं तथा। लक्षं च नियुतं चैव कोटिरर्बुदमेव च, वृन्दः खर्वो निखर्वश्च शङ्खपद्मौ च सागरः। अन्त्यं मध्यं परार्धं च दशवृद्ध्या यथोत्तरम्"—इति ब्रह्माण्ड पु०।

मानि च शतकोटिरूपाणि 'बद्धानि' सप्ताधिकशतसङ्ख्याकानि । तावतो गजान् दत्तवानित्यर्थः * ॥

द्वितीयं श्लोक माह — "भरतस्यैष दौःषन्तेरग्निः साचीगुणे चितः ; यस्मिन्त्सहस्रं ब्राह्मणा बद्वशो गा विभेजिरे"–इति । साचीनामगुणके कस्मिंश्चिद् देशे दुःषन्तपुत्रस्य भरतस्यैषोऽग्निश्चितः , अग्निचयनं कृतवानित्यर्थः । 'यस्मिन्' अग्निचयने सहस्रसङ्ख्याका ब्राह्मणाः 'बद्वशः' प्रत्येकं शतकोटिसङ्ख्यया † 'गाः विभेजिरे' गवां विभागं कृतवन्तः ॥

तृतीयं श्लोक माह— "अष्टासप्ततिं भरतो दौःषन्तिर्यमुना मनु ; गङ्गायां वृत्रघ्ने ऽबध्नात् पञ्चपञ्चाशतं हयान्"–इति । 'मेध्यैरश्वैरीजे'–इत्युक्तम् (२६८पृ० १,२पं०), तेषा मश्वानां सङ्ख्या अत्रोच्यते । अष्टाधिका सप्ततिः 'अष्टासप्ततिः' ताम्, अश्वाना मष्टासप्ततिं दुःषन्तपुत्रो भरतः 'यमुना मनु' यमुनायास्तीरे 'अबध्नात्' बद्धवान् , तावतो ऽश्वमेधान् कृतवानित्यर्थः । 'गङ्गायां' गङ्गातीरे वृत्रघ्ननामके देशे च पञ्चाधिकपञ्चाशत्सङ्ख्याकान् हयान् 'अबध्नात्' बद्धवान् , तावतो ऽश्वमेधान् कृतवानित्यर्थः ॥

चतुर्थं श्लोक माह — "त्रयस्त्रिंशच्छतं राजा ऽश्वान् बद्ध्वाय मेध्यान्; दौःषन्तिरत्यगाद्राज्ञो मायां मायवत्तरः"–इति । यमुनातीरे गङ्गातीरे च अनुष्ठिताः अश्वाः त्रयस्त्रिंशदधिकशतसङ्ख्याकाः । तावतो ऽश्वान् 'मेध्यान्' यज्ञयोग्यान् विध्युक्तक्रमेण बन्धनं कृत्वा , सोऽयं राजा दौःषन्तिः 'मायवत्तरः' अतिशयेन मायावी सन् , 'राज्ञः' स्वकीयशत्रोर्मायाम् 'अत्यगात्' अतिक्रान्तवान् ॥

---

* 'बद्धानि'–इत्यस्य स्थिराणि गजरूपद्रव्याणि देवयजनस्थितानि वेति चार्थः स्यात् ।

† 'बद्वशः'–इत्यस्य बन्धनक्रमेणेत्यप्यर्थः स्यात् सुकरः, स्थिरभावत इति वा ।

पञ्चमं श्लोक माह— "महाकर्म भरतस्य न पूर्वे नापरे जनाः; दिवं मर्त्य इव हस्ताभ्यां नोदापुः पञ्चमानवा इति"-इति। 'भरतस्य' राज्ञो यदेतत् 'महाकर्म', तदेतत् 'पूर्वे' पित्रादयो न कर्तुं शक्ताः, 'अपरे' जनाः पुत्रपौत्रादयश्च न कर्तुं शक्ताः। तत्र दृष्टान्तः। यथा मनुष्यो 'दिवं' स्वर्गं हस्ताभ्यां स्प्रष्टु मशक्तः, एवं 'पञ्चमानवाः' निषादपञ्चमाः चत्वारो वर्णाः* 'नोदापुः' तदीयं कर्म प्राप्तु मशक्ताः। सोऽयं सर्वोऽपि महाभिषेकस्य महिमेत्यर्थः॥

अथ सम्प्रदायकथनमुखेन महाभिषेकं प्रशंसति— "एतं ह वा ऐन्द्रं महाभिषेकं बृहदुक्थ ऋषिर्दुर्मुखाय पाञ्चालाय प्रोवाच; तस्मादु दुर्मुखः पाञ्चालो राजा सन्, विद्यया समन्तं सर्वतः पृथिवीं जयन्, परीयाय"-इति। बृहदुक्थनामकः कश्चन ऋषिः, पञ्चालदेशस्वामिने दुर्मुखनाम्ने राज्ञे त मेतम् इन्द्रसम्बन्धिनं महाभिषेकं प्रोवाच। तस्मादेव कारणात् स राजा सन् 'विद्यया' महाभिषेकज्ञानेनैव सर्वासु दिक्षु समन्तं समग्रां पृथिवीं जयन्, 'परीयाय' परितः सञ्चचार॥

अथ ब्राह्मणस्योक्ताभिषेकाधिकाराभावेऽपि तद्विद्याधिकारसद्भावात् तत्फलसिद्धिं दर्शयति— "एतं ह वा ऐन्द्रं महाभिषेकं वासिष्ठः सात्यहव्योऽत्यरातये जानन्तपये प्रोवाच; तस्मादत्यरातिर्जानन्तपिरराजा सन्, विद्यया समन्तं सर्वतः पृथिवीं जयन्, परीयाय"-इति। वसिष्ठगोत्रोत्पन्नो 'वासिष्ठः', सत्यहव्यस्य पुत्रः 'सात्यहव्यः', तादृशो मुनिः, अत्यरातिनामकाय जनन्तपपुत्राय

---

* "गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके, चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः"-इति निरु० ३. २. २।

ब्राह्मणाय, त मेतं महाभिषेकं प्रोवाच । तस्मादेव कारणादय मत्यरातिर्जानन्तपिः स्वय मराजा सन्नप्यभिषेकविद्यया जयं प्राप्तः परितो गतवान् ॥

यथा ऽभिषेके शपथं कृत्वा गुरुद्रोहो न कर्त्तव्यः , एवं विद्याया मपीति दर्शयति— "स होवाच वासिष्ठः सात्यहव्यो ऽजैषीर्वै महान्तं सर्वतः पृथिवीं महन् मा गमयेति ; स होवाचात्यरातिर्जानन्तपिर्यदा ब्राह्मणोत्तरकुरून् जयेय मथ त्व मु हैव पृथिव्यै राजा स्याः , सेनापतिरेव ते ऽहं स्या मिति ; स होवाच वासिष्ठः सात्यहव्यो देवक्षेत्रं वै तन्न वैतन् मर्त्यो जेतु मर्हत्यद्रुक्षो वै म आ ऽत इदं दद इति ; ततो हात्यरातिं जानन्तपि मात्तवीर्यं निःशुक्र ममित्रतपनः शुष्मिणः शैब्यो राजा जघान"—इति । सात्यहव्यो वासिष्ठो गुरुः , अत्यरातिं शिष्य मेव मुवाच,— हे अत्यराते ! विद्यासामर्थ्यात् पृथिवीं जितवानसि । अतो 'मां' गुरुं 'महद् गमय' महत्त्वम् ऐश्वर्यं प्रापय । ततः शिष्यो ऽत्यराति रेव मुवाच— मा भूदिदानीं तव महत्त्वम् , हे 'ब्राह्मण' आचार्य ! यदा अहम् 'उत्तरकुरून्' एतन्नामकान् हिमवत्पर्वतस्योत्तरदेशान् जयेयम् , तदानीं त्व मेव पृथिव्याः राजा भव , अहं तु त्वदीयसेनापतिरेव भवामीति । ततः सात्यहव्यो वासिष्ठः 'सः' गुरुरेव मुवाच,— हे अत्यराते ! हिमवत्पर्वतस्योत्तरतो* यदस्ति, तद्देवक्षेत्रम् , अतः तत् क्षेत्रं मनुष्यो जेतुं नैवार्हति ; त्वं तु 'मे' मह्यम् 'अद्रुक्षो वै' द्रोहं कृतवानेव ; मदपेक्षितं महत्त्वं दातु मनिच्छुः सन् वचनार्थं यत् किञ्चिद् उक्तवानसि ; अतः शपथोल्लङ्घिनो गुरुद्रोहिणः तव 'इदं' सामर्थ्यम् 'आ ददे' अपहरामीति । 'ततः'

---

* "मेरोरुत्तरतो" ठ ।

सामर्थ्यापहरणात् अत्यरातिं जानन्तपिम् 'आत्तवीर्यं' गुरुणापहृतवीर्यम् 'निःशुक्रम्' अपहृततेजस्कं, कश्चित् शत्रुतापनः शिबिपुत्रः शुष्मिणाख्यो * राजा 'अघान' हतवान् ॥

एतद्वृत्तान्तकथनफलं दर्शयति — "तस्मादेवं विदुषे ब्राह्मणायैवं चक्रुषे न क्षत्रियो द्रुह्येन्नेद्राष्ट्रादव पद्येयं नेन्मा प्राणो जहदिति जहदिति" इति। तस्माद् गुरुद्रोहे महती हानिरुक्ता, 'तस्मात्' 'एवं विदुषे' महाभिषेकाभिज्ञाय, 'एवं चक्रुषे' अभिषेककर्त्रे, 'ब्राह्मणाय' आचार्याय क्षत्रियो न द्रुह्येत्। केनाभिप्रायेणेति, सोऽभिधीयते— 'राष्ट्राद्' अस्माद् देशात् 'न इत् अव पद्येयम्' नैवापभ्रष्टो भूयासम्। अथवा मां प्राणो 'न इत् जहत्' नैव परित्यजत्वित्यभिप्रायः। अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ९ (२३) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां चतुर्थाध्याये
(एकोनचत्वारिंशाध्याये) नवमः खण्डः ॥ ९ (२३) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'-नामभाष्ये
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायाः चतुर्थोऽध्यायः ॥

---

* "शुष्माख्यो" अ ।

॥ अथ पञ्चमाध्यायः ॥

(नव)

॥ अथ प्रथमः खण्डः ॥

॥ ॐ ॥ अथातः पुरोधाया एव न ह वा अपुरोहितस्य राज्ञो देवा अन्न मदन्ति तस्माद्राजा यक्ष्यमाणो * ब्राह्मणं पुरो दधीत देवा मे ऽन्न मदन्नित्यग्नीन्वा एषः स्वर्ग्यान् राजोद्धरते यत् पुरोहितं तस्य पुरोहित एवाहवनीयो भवति जाया गार्हपत्यः पुत्रोऽन्वाहार्यपचनः स यत् पुरोहिताय करोत्याहवनीय एव तज्जुहोत्यथ यज्जायायै करोति गार्हपत्य एव तज्जुहोत्यथ यत् पुत्राय करोत्यन्वाहार्यपचन एव तज्जुहोति त एनं शान्ततनवोऽभिहुता अभिप्रीताः स्वर्गं लोक† मभिवहन्ति क्षत्रं च बलं च राष्ट्रं च विशं च त एवैन मशान्ततनवोऽनभिहुता अनभिप्रीताः स्वर्गाल्लोकान्नुदन्ते‡ क्षत्राच्च बलाच्च राष्ट्राच्च विशश्चाग्निर्वा एष वैश्वानरः पञ्चमेनिर्यत् पुरोहि-

---

* "ऽयक्ष्यमाणो" क । भाष्ये च पदान्तरत्वेन स्वीकृतः ।

† "स्वर्गंल्लोक" ङ ।

‡ "स्वर्गाल्लोकां नुदन्ते" ख, "स्वर्गाल्लोकां' नुदन्ते" घ, "स्वर्गाल्लोकान्नुदन्ते" ङ । [illegible] चैव मेव पाठाः ।

तस्तस्य वाच्येवैका मेनिर्भवति पादयोरेका त्वच्येका हृदय एकोपस्थ एका ताभिर्ज्वलन्तीभिर्दीप्यमानाभिरुपोदेति राजानं स यदाह क्व भगवो ऽवात्सीस्तृणान्यस्मा आहरतेति तेनास्य तां शमयति या ऽस्य वाचि मेनिर्भवत्यथ यदस्मा उदक मानयन्ति पाद्यं तेनास्य तां शमयति यास्य पादयोर्मेनिर्भवत्यथ यदेन मलङ्कुर्वन्ति तेनास्य तां शमयति यास्य त्वचि मेनिर्भवत्यथ यदेनं तर्पयन्ति तेनास्य तां शमयति यास्य हृदये मेनिर्भवत्यथ यदस्यानारुद्धो वेश्मसु वसति तेनास्य तां शमयति यास्योपस्थे मेनिर्भवति स एनं शान्ततनुरभिहुतो ऽभिप्रीतः स्वर्गं लोक* मभिवहति क्षत्रं च बलं च राष्ट्रं च विशं च स एवैन मशान्ततनुरनभिहुतो ऽनभिप्रीतः स्वर्गाल्लोकान्नुदते क्षत्राच्च बलाच्च राष्ट्राच्च विशश्च ॥ १ (२४) ॥

॥ श्रीगणेशाय नमः ॥

महाभिषेक ऐन्द्रो यः क्षत्रस्यासौ पुरोहितः ।
पौरोहित्यं ब्राह्मणस्य वक्तव्य मधुनोच्यते ॥ १ ॥

तदेतत् प्रतिजानीते— "अथातः पुरोधाया एव"—इति । 'अथ' क्षत्रियस्य महाभिषेककथनानन्तरम् , यतो ब्राह्मणस्य

---

* "स्वर्गंलोक" क ।

पौरोहित्यं बुभुत्सितं भवति, 'अतः' कारणात् 'पुरोधाया एव' पौरोहित्यस्यैव विधिः, उच्यत इति शेषः ॥

तद्विधिं दर्शयति— "न ह वा अपुरोहितस्य राज्ञो देवा अन्न मदन्ति, तस्माद्राजा यक्ष्यमाणो ब्राह्मणं पुरो दधीत,— देवा मेऽन्न मदन्निति"—इति । यस्मात् अपुरोहितस्य राज्ञः अन्नं देवाः 'न अदन्ति' न भक्षयन्ति, 'तस्मात्' राजा यक्ष्यमाणो ब्राह्मणं पुरोहितं कुर्यात् । केनाभिप्रायेणेति, सोऽभिधीयते — देवाः मदीय मन्न मदन्त्विति तस्याभिप्रायः । 'अयक्ष्यमाणः' इति वा पदच्छेदः । यागाभावेऽपि प्रजापालने धर्म्मबोधनाय पुरोहितः सम्पादनीयः ॥

तदेतत् प्रशंसति — "अग्नीन्वा एषः स्वर्ग्यान् राजोद्धरते, यत् पुरोहितम्"—इति । पुरोहितं सम्पादयतीति यदस्ति, तेन 'एषः' राजा स्वर्गहेतून् अग्नीनेवोद्धरते ॥

तानग्नीन् दर्शयति— "तस्य पुरोहित एवाहवनीयो भवति, जाया गार्हपत्यः, पुत्रोऽन्वाहार्यपचनः; स यत् पुरोहिताय करोत्याहवनीय एव तज्जुहोत्यथ यज्जायायै करोति गार्हपत्य एव तज्जुहोत्यथ यत् पुत्राय करोत्यन्वाहार्यपचन एव तज्जुहोति; त एनं शान्ततनवोऽभिहुता अभिप्रीताः स्वर्गं लोक मभिवहन्ति,— क्षत्रं च बलं च राष्ट्रं च विशं च"—इति । 'तस्य' ह राज्ञः पुरोहितादय एव आहवनीयाद्यग्निस्थानीयाः । अन्वाहार्यपचनो दक्षिणाग्निः । 'सः' राजा पुरोहितादिभ्यो 'यत्' अपेक्षितं करोति, तदेतदाहवनीयादिषु होमसमानम् । अतः पुरोहितद्वारा 'ते' अग्नयः 'शान्ततनवः' स्वकीय मुग्ररूपत्वं परित्यज्य अभीष्टहोमेन प्रीताः 'एनं' क्षत्रियं स्वर्गादिकं प्रापयन्ति । 'क्षत्रं'

मानसोत्साहरूपं शौर्यम्, 'बलं' शारीरम्, 'राष्ट्रं' देशः, 'विट्' प्रजाः; पुरोहितादिप्रीत्या तदेतत् सर्वं प्राप्यते ॥

विपक्षे बाधकमाह— "त एवैनमशान्ततनवो ऽनभिहुता अनभिप्रीताः स्वर्गाल्लोकान्नुदन्ते, क्षत्राच्च बलाच्च राष्ट्राच्च विशश्च" -इति। 'त एव' पुरोहितादयो ऽभीष्टलाभाभावेन प्रीतिरहिताः 'अशान्ततनवः' स्वर्गादेः 'एनं' राजानम् अपनुदन्ते ॥

पुनरपि पुरोहितं प्रकारान्तरेण प्रशंसति— "अग्निर्वा एष वैश्वानरः पञ्चमेनिर्यत् पुरोहितस्तस्य वाच्येवैका मेनिर्भवति, पादयोरेका, त्वच्येका, हृदय एकोपस्थ एका, ताभिर्ज्वलन्तीभिर्दीप्यमानाभिरुपोदेति राजानं; स यदाह क्व भगवो ऽवात्सीस्तृणान्यस्मा आहरतेति, तेनास्य तां शमयति यास्य वाचि मेनिर्भवत्यथ यदस्मा उदकमानयन्ति पाद्यं, तेनास्य तां शमयति यास्य पादयोर्मेनिर्भवत्यथ यदेनमलङ्कुर्वन्ति, तेनास्य तां शमयति यास्य त्वचि मेनिर्भवत्यथ यदेनं तर्पयन्ति तेनास्य तां शमयति यास्य हृदये मेनिर्भवत्यथ यदस्यानारुद्धो वेश्मसु वसति, तेनास्य तां शमयति यास्योपस्थे मेनिर्भवति"-इति। परोपद्रवकारिणी क्रोधरूपा शक्तिः 'मेनिः'-इत्युच्यते, यथाग्नेर्ज्वाला, तद्वत्। अतो यः पुरोहितोऽस्ति, सोऽयं पञ्चविधमेन्युपेतो वैश्वानरनामकाग्निसमानः; वागादीनि पञ्च मेनिस्थानानि च। अतः पुरोहितः 'ताभिः' मेनिभिः 'ज्वलन्तीभिः' ज्वालासदृशीभिः, 'दीप्यमानाभिः' परेषु दीप्तिं सन्तापं कुर्वन्तीभिः सह राजानम् 'उपोदेति' समीपे प्राप्नोति। तदा 'सः' राजा हे भगवन्! एतावन्तं कालं कुत्रावात्सीः? एतस्य पुरोहितस्योपवेशनार्थं हे परिचारकाः! 'तृणानि' तृणनिर्मितानि कुशाद्यासनानि आहरत; 'इति'

अनेन राजसम्बन्धिना प्रियवाक्येन, वाचि एका या 'मेनिः' बाधिका शक्तिः, तां स राजा शमयति। पाद्यार्थोदकानयनेन पादगता मेनिः शाम्यति। वस्त्रगन्धाद्यलङ्करणेन त्वग्गता मेनिः शाम्यति। धनादिना सन्तर्पणेन हृदयगता मेनिः शाम्यति। 'अस्य' राज्ञो वेश्मसु 'अनारुद्धः' विरोधरहितः शयनादिकं कुर्वन् विस्रम्भेण वसतीति यदस्ति, तेनोपस्थगता मेनिः शाम्यति। गृहे समागतस्य पुरोहितस्य एतावन्त उपचाराः कर्तव्या इत्यर्थः॥

अन्वयव्यतिरेकाभ्यामुक्तोपचारं प्रशंसति— "स एनं शान्ततनुरभिहुतोऽभिप्रीतः स्वर्गं लोकमभिवहति, क्षत्रं च बलं च राष्ट्रं च विशं च; स एवैनमशान्ततनुरनभिहुतोऽनभिप्रीतः स्वर्गाल्लोकान्नुदते, क्षत्राच्च बलाच्च राष्ट्राच्च विशश्च"—इति। उक्तोपचारहोमेन प्रीतौ सत्यां शान्ततनुः स्वर्गादिकं प्रापयतीत्यन्वयः। उक्तोपचारहोमाभावे स्वर्गादेरपनुदतीति व्यतिरेकः॥ १ (२४)॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये
(चत्वारिंशाध्याये) प्रथमः खण्डः॥ १ (२४)॥

॥ अथ द्वितीयः खण्डः॥

अग्निर्वा एष वैश्वानरः पञ्चमेनिर्यत् पुरोहितस्ताभी राजानं परिगृह्य तिष्ठति समुद्र इव भूमि-

अयुव मार्य॑स्य* राष्ट्रं॑ भवति॑ नै॑नं पुरायुषः॑ प्राणो जहात्याजरसं॑ जीव॑ति सर्व॑मायुरेति॑ न पुनर्म्रियते॑ यस्यैवं विद्वान् ब्राह्मणो॑ राष्ट्रगोपः पुरोहितः॑ क्षत्रेण क्षत्रं॑ जयति॑ बलेन बल॑मश्नुते॑ यस्यैवं विद्वान् ब्राह्मणो॑ राष्ट्रगोपः पुरोहितस्त॑स्मै विशः॑ सञ्जानते॑ सम्मुखा एकमनसो॑ यस्यैवं विद्वान् ब्राह्मणो॑ राष्ट्रगोपः पुरोहितः॑ ॥ २ (२५) ॥

उक्तोपचारेण प्रीतं पुरोहितं दृष्टान्तेन प्रशंसति — "अग्निर्वा एष वैश्वानरः, पञ्चमेनिर्यत् पुरोहितस्ताभी राजानं परिगृह्य तिष्ठति, समुद्र इव भूमिम्"-इति । योऽयं पुरोहितोऽस्ति, स एषः 'पञ्चमेनिः' पञ्चविधोग्रशक्तियुक्तो वैश्वानरनामकोऽग्निरेव ; निग्रहानुग्रहयोः अग्निवच्छक्तिमत्त्वात् । स पुरोहितः 'ताभिः' उग्रास्ताभिः शक्तिभिः तं राजानं 'परिगृह्य' परितः स्वीकृत्य तिष्ठति । यथा समुद्रो भूमिं परितः स्वीकृत्य तिष्ठति, तद्वत् ॥

पुरोहितवशादनिष्टपरिहारं दर्शयति— "अयुव मार्यस्य राष्ट्रं भवति, नैनं पुरायुषः प्राणो जहात्याजरसं जीवति, सर्वमायुरेति, न पुनर्म्रियते, यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः"-इति । 'यस्य' राज्ञः 'एवं विद्वान्' वेदशास्त्रोक्तप्रकारेण धर्माधर्मौ बोधयितु मभिज्ञो ब्राह्मणो 'राष्ट्रगोपः' राष्ट्रपरिपालनक्षमः पुरोहितो भवति, ईदृशस्यार्यस्य राज्ञो राष्ट्रम् 'अयुतं' कदाचिदपि पृथग्भावरहितं भवति । "यु मिश्रणामिश्रणयोः"

---

* "अयुतमार्यस्य"-इत्येवं च पाठो भाष्यसम्मतः ।

-इति धातुः (अदा० प०) अभिमर्षणेऽपि वर्त्तते , अयुवमितिपदेन स निषिध्यते ; राष्ट्र मस्थिरं न भवतीत्यर्थः । अत्र वा 'अस्य' राष्ट्रम् 'अयुवमारि' युवमरणरहितं भवतीत्यर्थः । 'एनं' राजानम् 'आयुषः पुरा' प्राणो न परित्यजति , अपमृत्युः न भवतीत्यर्थः । अत एव 'आ जरसं' जरापर्यन्तं सुखेन जीवति ; 'सर्व मायुरेति' प्राप्ताया मपि जराया मवशिष्टं सर्व मायुः प्राप्नोति । ततः सकृत् मृत्वा 'पुनर्न म्रियते' पुरोहितमुखेन तत्त्वज्ञानं सम्पाद्य मुच्यते इत्यर्थः ॥

अनिष्टपरिहारं दर्शयित्वा इष्टप्राप्तिं दर्शयति— "क्षत्रेण क्षत्रं जयति, बलेन बल मश्नुते, यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः"-इति । उक्तविधपुरोहितयुक्तो राजा स्वकीयेन 'क्षत्रेण' कुमारादिना, परकीयं 'क्षत्रं' कुमारादिकं जयति । यथा स्वकीयेन 'बलेन' सैन्येन , परकीयं 'बलं' सैन्यम् 'अश्नुते' व्याप्नोति, अभिभवतीत्यर्थः ॥

इष्टप्राप्त्यनिष्टपरिहारौ दर्शयित्वा प्रजानुरागं दर्शयति— "तस्मै विशः सञ्जानते , सम्मुखा एकमनसो यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः"-इति । उक्तविधपुरोहितयुक्ताय 'तस्मै' तस्य राज्ञो 'विशः' प्रजाः 'सञ्जानते' राज्ञा सहैकमत्यं प्राप्नुवन्ति ; प्राप्य च परस्पर मप्येकमनस्का राज्ञः सम्मुखा भवन्ति ; न तु कस्मिन्नपि कार्ये विमुखाः ॥ २ (२५) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये
(चत्वारिंशाध्याये) द्वितीयः खण्डः ॥ २ (२५) ॥

॥ अथ तृतीयः खण्डः ॥

तदप्येतदृषिणोक्तं स इद्राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येणेति सपत्ना वै द्विषन्तो भ्रातृव्या जन्यानि तानेव तच्छुष्मेण वीर्येणाधितिष्ठति बृहस्पतिं यः सुभृतं बिभर्त्तीति बृहस्पतिर्ह वै देवानां पुरोहितस्तमन्वन्ये मनुष्यराज्ञां पुरोहिता बृहस्पतिं यः सुभृतं बिभर्त्तीति यदाह पुरोहितं यः सुभृतं बिभर्त्तीत्येव तदाह वल्गूयति वन्दते पूर्वभाज मित्यपचिति मेवास्मा एतदाह स इत् क्षेति सुधित ओकसि स्व इति गृहा वा ओकः स्वेष्वेव तद्गृहेषु सुहितो वसति तस्मा इळा पिन्वते विश्वदानी मित्यन्नं वा इळान्न मेवास्मा एतदूर्जस्वच्छश्वद्भवति तस्मै विशः स्वय मेवा नमन्त इति राष्ट्राणि वै विशो राष्ट्राण्येवैनं तत् स्वय मुपनमन्ति यस्मिन् ब्रह्मा राजनि पूर्व एतीति पुरोहित मेवैतदाहाप्रतीतो जयति सं धनानीति राष्ट्राणि वै धनानि तान्यप्रतीतो जयति प्रतिजन्यान्युत वा सजन्येति सपत्ना वै द्विषन्तो भ्रातृव्या जन्यानि तानप्रतीतो जयत्यवस्यवे यो वरिवः कृणोतीति यदाहावसीयसे यो वसीयः करोतीत्येव तदाह

ब्रह्मणो राजा न मवन्ति देवा इति पुरोहित मेवैतदभिवदति ॥ ३ (२६) ॥

पुरोहितमहिमानं दृढयितुं * मन्त्र मुदाहरति— "तदप्येतदृषिणोक्तम्"-इति । 'तदेतत्' पुरोहितमाहात्म्य मपि 'ऋषिणा' मन्त्रदर्शिना तिसृभिः ऋग्भिरुक्तम् (सं० ४. ५०. ७-९.) ॥

तत्र प्रथमाया ऋचः पूर्वार्द्धं दर्शयति— "स इद्राजा प्रतिजन्यानि विश्वा, शुष्मेण तस्थावभि वीर्येणेति"-इति । 'स इत्' स एव पुरोहितयुक्तो राजा 'प्रतिजन्यानि' प्रतिपक्षकुलानि 'विश्वा' सर्वाणि 'शुष्मेण' वीर्येण स्वकीयेनाधिकेन बलेन 'अभितस्थौ' अभितिष्ठति, अभिभवतीत्यर्थः ॥

अस्यार्द्धस्य तात्पर्यं दर्शयति— "सपत्ना वै द्विषन्तो भ्रातृव्या जन्यानि तानेव तच्छुष्मेण वीर्येणाधितिष्ठति"-इति । 'जन्यानि' -इत्यनेन सपत्ना एव अभिधीयन्ते ; सपत्नशब्दस्य व्याख्या द्विषन्तो भ्रातृव्या इति । तानेव भ्रातृव्यान् 'तत्' तेन 'शुष्मेण' अधिकेन 'वीर्येण' सामर्थ्येन 'अधितिष्ठति' अभिभवति ॥

तृतीयं पाद मनूद्य व्याचष्टे— "बृहस्पतिं यः सुभृतं बिभर्त्तीति ; बृहस्पतिर्ह वै देवानां पुरोहितस्त मन्वन्ये मनुष्यराज्ञां पुरोहिता ; बृहस्पतिं यः सुभृतं बिभर्त्तीति यदाह, पुरोहितं यः सुभृतं बिभर्त्तीत्येव तदाह"-इति । यो हितोपदेशेन राजानं सुष्ठु बिभर्त्तीति 'सुभृत्' । तादृशं 'बृहस्पतिं' बृहस्पतिसमानं पुरोहितं 'बिभर्त्ति' पोषयति, स इद्राजेति पूर्वत्रान्वयः । "बृहस्पतिर्ह वै देवानां पुरोहितः" । यो बृहस्पतिः देवानां पुरो-

---

* "दर्शयितुं" ठ ।

हितः, तं बृहस्पतिम् 'अनु' पश्चात् मनुष्यराज्ञाम् अन्ये पुरोहिता वर्त्तन्ते ; अतः पुरोहितानां बृहस्पत्यनुसारित्वात् बृहस्पति मिति पदेन पुरोहितविषय मेवैतद् वाक्यं मन्त्र माह ॥

चतुर्थं पाद मनूद्य व्याचष्टे — "वल्गूयति वन्दते पूर्वभाज मित्यपचिति मेवास्मा एतदाह"–इति । स राजा 'पूर्वभाजं' प्रथमतो भजनयुक्तं पुरोहितं (स हि राजानं तदीयहितविचारेण प्रथमतो भजति , तादृशं) 'वल्गूयति' राजा अर्चयति , 'वन्दते' नमस्करोति । 'एतत्' एतेन पादेन 'अस्मै' अस्मिन् यजमाने 'अपचिति मेव' पूजा मेव मन्त्र आह ॥

द्वितीयस्या ऋचः प्रथमपाद मनूद्य व्याचष्टे— "स इत् क्षेति सुधित ओकसि स्व इति ; गृहा वा ओकः, स्वेष्वेव तद् गृहेषु सुहितो वसति"–इति । 'स इत्' स एव राज्ञा पूजितः पुरोहितः 'सुधितः' सुप्रीतः 'स्वे' स्वकीये एव 'ओकसि' गृहे 'क्षेति' निवसति । 'ओकः'-शब्देनात्र 'गृहाः' एवोच्यन्ते ; ततः स्वेष्वेव गृहेषु सुप्रीतो वसतीत्युक्तं भवति ॥

द्वितीयं पाद मनूद्य व्याचष्टे— "तस्मा इळा पिन्वते विश्वदानी मित्यन्नं वा इळान्न मेवास्मा एतदूर्जस्वच्छश्वद्भवति"–इति । 'तस्मै' पुरोहितयुक्ताय राज्ञे 'इळा' अन्नं 'विश्वदानीं' सर्वस्मिन्नपि काले (इदानीं तदानी मित्यादिवदवगन्तव्यम्*) 'पिन्वते' वर्द्धते, अन्नसमृद्धिर्भवति । अस्मिन् पादे 'इळा'-शब्देन अन्न मेवोच्यते ; 'एतत्' अन्नम् 'अस्मै' अस्मिन् राजनि 'ऊर्जस्वत्' क्षीरादिरसोपेतं 'शश्वत्' सर्वदा तिष्ठति ॥

तृतीयं पाद मनूद्य व्याचष्टे — "तस्मै विशः स्वय मेवा नमन्त

---

* अष्ट० प्राति ४, २१ । विश्वदानीं = सर्वदा निरु० ११, ४, १० ।

इति ; राष्ट्राणि वै विशो राष्ट्राण्येवैनं तत् स्वय मुपनमन्ति"–इति । 'तस्मै' पुरोहितयुक्ताय राज्ञे 'विशः' प्रजाः 'स्वय मेव तदीयप्रयत्ननिरपेक्षा एव 'आ नमन्ते' आनतिं प्राप्ता भवन्ति । अस्मिन् पादे 'विट्'-शब्देन 'राष्ट्राण्येव' प्रजोपेता देशा एव विवक्षिताः । तादृशानि राष्ट्राण्येव 'एनं' पुरोहितयुक्तं क्षत्रियं स्वय मेव प्राप्नुवन्ति ॥

चतुर्थं पाद मनूद्य व्याचष्टे — "यस्मिन् ब्रह्मा राजनि पूर्वं एतीति ; पुरोहित मेवैतदाह"–इति । 'यस्मिन्' राजनि 'ब्रह्मा' ब्राह्मणः हित मुपदिशन् 'पूर्व एति' प्रथमतो गच्छति , स इत् क्षेतीति पूर्वत्रान्वयः । अनेन पादेन पूर्वं एतीत्येतं पुरोहित मेव मन्त्रो ब्रूते ॥

तृतीयस्या ऋचः प्रथमपाद मनूद्य व्याचष्टे — "अप्रतीतो जयति सं धनानीति ; राष्ट्राणि वै धनानि तान्यप्रतीतो जयति"–इति । अयं पुरोहितयुक्तो राजा 'अप्रतीतः' प्रतिकूलैः शत्रुभिः इतः प्राप्तः प्रतीतः , तद्विपरीतो ऽप्रतीतः , शत्रुप्राप्तिरहित एव भूत्वा धनोपेतानि राष्ट्राणि सम्यक् 'जयति' सम्पादयति । अस्मिन् पादे 'धन'-शब्देन राष्ट्राण्येव विवक्षितानि ; तानि स्वयं प्रतिपक्षरहित एव जयति ॥

द्वितीयं पाद मनूद्य व्याचष्टे — "प्रतिजन्यान्युत या सजन्येति ; सपत्ना वै द्विषन्तो भ्रातृव्या जन्यानि तानप्रतीतो जयति"–इति । 'जन्यानि' शत्रून् , 'अप्रतीतः' स्वय मप्रतिपक्षो जयतीत्यनुवर्त्तते । किञ्च 'या' सेना 'सजन्या' शत्रुसहिता , ता मपि जयति । अस्मिन् पादे 'जन्य'-शब्देन सपत्ना अभिधीयन्ते, तस्य व्याख्यानं 'द्विषन्तो भ्रातृव्याः'–इति । 'तान्' भ्रातृव्यान् 'अप्रतीतः' प्रतिपक्षरहितो जयति ॥

तृतीयं पादमनूद्य व्याचष्टे— "अवस्यवे यो वरिवः कृणोतीति यदाहावसीयसे यो वसीयः करोतीत्येव तदाह"-इति । 'अवस्यवे' वसुरहिताय ब्राह्मणाय पुरोहिताय 'यः' राजा 'वरिवः कृणोति' परिचर्यां करोति 'इति' मन्त्रो यदाह, तत्र 'अवसीयसे' अत्यन्तदरिद्राय धनरहिताय 'यः' राजा 'वसीयः' अतिशयेन धनवन्तं करोति 'इति' अनेनैव प्रकारेण मन्त्रो ब्रूते ॥

चतुर्थं पादमनूद्य व्याचष्टे— "ब्रह्मणे राजा तमवन्ति देवा इति; पुरोहितमेवैतदभिवदति"-इति । 'ब्रह्मणे' ब्राह्मणाय पूर्वोक्तेन अवस्यव इति चतुर्थ्यन्तेन अन्वेति, तथा राजेति पदं य इत्यनेन अन्वेति । 'तं' तादृशं पुरोहितपूजकं राजानं देवाः 'अवन्ति' पालयन्ति । 'एतद्' एतेन ब्रह्मण इति पदेन पुरोहितमेव मन्त्रः अभिवदति ॥ ३ (२६) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये
(चत्वारिंशाध्याये) तृतीयः खण्डः ॥ ३ (२६) ॥

॥ अथ चतुर्थः खण्डः ॥

यो ह वै त्रीन् पुरोहितांस्त्रीन् पुरोधातॄन् वेद स ब्राह्मणः पुरोहितः स वदेत पुरोधायां अग्निर्वाव पुरोहितः पृथिवी पुरोधाता वायुर्वाव पुरोहितो

ऽन्तरिक्षं पुरोधाता ऽऽदित्यो वाव पुरोहितो द्यौः पुरोधातैष ह वै पुरोहितो य एवं वेदाथ स तिरोहितो य एवं न वेद तस्य राजा मित्रं भवति द्विषन्त मप बाधते यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः क्षत्रेण क्षत्रं जयति बलेन बल मश्नुते यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितस्तस्मै विशः सञ्जानते सम्मुखा एकमनसो यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितो भूर्भुवस्स्वरो ममो ऽह मस्मि स त्वं स त्व मस्यमो ऽहं द्यौरहं पृथिवी त्वं सामाह मृक् त्वं तावेह संवहावहै पुराण्यस्मान् महाभयात् तनूरसि तन्वं मे पाहि या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ता मह्य मस्मिन्नासने ऽच्छिद्रं शर्म यच्छत या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ता मह्य मस्मिन्नासने ऽच्छिद्रं शर्म यच्छत अस्मिन्राष्ट्रे श्रिय मावेशयाम्यतो देवीः प्रति पश्याम्यापः दक्षिणं पाद मवनेनिजे ऽस्मिन् राष्ट्र इन्द्रियं दधामि सव्यं पाद मवनेनिजे ऽस्मिन् राष्ट्र इन्द्रियं वर्द्धयामि पूर्व मन्य मपर मन्यं पादाववनेनिजे देवा राष्ट्रस्य गुप्त्या अभयस्यावरुद्ध्यै आपः पादावनेजनीर्द्विषन्तं निर्दहन्तु मे ॥ ४ (२७) ॥

अथ पौरोहित्यस्य योग्यायोग्यौ ब्राह्मणौ विविनक्ति— "यो ह वै त्रीन् पुरोहितांस्त्रीन् पुरोधातॄन् वेद, स ब्राह्मणः पुरोहितः; स वदेत पुरोधाया ; अग्निर्वाव पुरोहितः, पृथिवी पुरोधाता ; वायुर्वाव पुरोहितो, ऽन्तरिक्षं पुरोधाता ; ऽऽदित्यो वाव पुरोहितो, द्यौः पुरोधातैष ह वै पुरोहितो य एवं वेदाथ स तिरोहितो य एवं न वेद"–इति । राजा स्वहितोपदेशार्थं स्वस्य पुरोहितो ऽवस्थापितः ; तस्य पुरोहितस्य योऽयमवस्थापयिता राजा, स पुरोधाता । देवतासु मध्ये ये त्रयः पुरोहिताः सन्ति, ये च त्रयः पुरोधातारः सन्ति, तानुभयविधान् 'यो वेद' तत्प्रतिपादकं मन्त्रं सर्वदानुसन्धत्त इत्यर्थः । 'सः' तादृशो ब्राह्मणः 'पुरोहितः' पुरोहितो भवितुं योग्यः । 'सः' च ब्राह्मणः 'पुरोधायै' पौरोहित्यार्थम् "अग्निः"–इत्यादिकं मन्त्रं जपेत् । अग्निवाय्वादित्याः पुरोहितरूपाः, पृथिव्यन्तरिक्षद्युलोकाः पुरोधातृरूपा इति मन्त्रार्थः । 'यः' पुमान् 'एवं वेद' मन्त्रार्थमनुसन्धत्ते, 'एषः' एव योग्यः पुरोहितः ; 'अथ' तद्वैलक्षण्येन 'यः' पुमान् 'एवं' न वेद, स 'तिरोहितः' पौरोहित्यादन्तर्हितः, तदयोग्य इत्यर्थः ॥

योग्यं पुरोहितं प्रशंसति— "तस्य राजा मित्रं भवति द्विषन्तमप बाधते, यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः"–इति । यस्य 'एवं' मन्त्रादिवेदित्वगुणयुक्तः पुरोहितो भवेत्, 'तस्य' राज्ञो देशान्तरवर्त्ती 'राजा' 'मित्रं' बन्धुर्भवति । तथा 'द्विषन्तम्' अन्यं राजानं पुरोहितयुक्तो राजा 'बाधते' विनाशयति ॥

पुनरपि द्वेधा प्रशंसति — "क्षत्रेण क्षत्रं जयति, बलेन बलमश्नुते, यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितस्तस्मै विशः

सञ्जानते, सम्मुखा एकमनसो, यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः"-इति । पूर्ववद् (२८७पृ०) व्याख्येयम् ॥

अथ राज्ञः पुरोहितवरणमन्त्र माह— "भूर्भुवस्स्वरो ममोऽह मस्मि, स त्वं; स त्व मस्यमोऽहं; द्यौरहं पृथिवी त्वं; सामाहमृक् त्वं; तावेह संवहावहै, पुराण्यस्मान् महाभयात् तनूरसि तन्वं मे पाहि"-इति । 'भूर्भुवस्स्वः'-इतिशब्दैर्लोकत्रयाभिमानिन्य देवता उच्यन्ते, प्रणवेन परमात्मा । एते सर्वे अनुगृह्णन्त्वित्यभिप्रायः । पुरोहितः 'अहम्' 'अमः' द्युलोकरूपोऽस्मि, त्वन्तु 'सः' भूलोकरूपोऽसि । पुनरपि 'स त्व मसि, अमोऽहम्'-इत्यभिधानं दार्ढ्यार्थम् । तस्यैव व्याख्यानं 'द्यौरहं पृथिवी त्वम्'-इति । तथा सामस्वरूपोऽहम्, ऋक्स्वरूपस्त्व मसि । 'तौ' उभावावाम् 'इह' राष्ट्रे 'आ' समन्तात् 'पुराणि' तदुपलक्षितग्रामाद्य 'संवहावहै' सम्यग् वहनं पुरादिनिर्वाहं करवावहै । त्वं मम 'तनूः' शरीर मसि, अतो मदीयां 'तन्वं' शरीरं 'अस्मात्' ऐहिकात्, आमुष्मिकात् च 'महाभयात्' 'पाहि' रक्ष ॥

अनेन मन्त्रेण राज्ञा वृतो यः पुरोहितः, तस्य राजदत्तविष्टराभिमन्त्रण माह— "या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः, ता मह्य मस्मिन्नासनेऽच्छिद्रं शर्म यच्छत"-इति * । सोमो राजा यासा मोषधीनां ताः 'सोमराज्ञः', 'बह्वीः' बहुजातीयाः, 'शतविचक्षणाः' शतशाखाभिन्नाः । तादृश्य ओषधयो याः सन्ति, तास्तथाविधाः हे ओषधयः ! 'अस्मिन्नासने' तृणादिनिर्मिते कटादिरूपे 'मह्यं' पुरोहिताय 'छिद्ररहितं शर्म' दुःखसम्भेदरहितं सुखं 'यच्छत' दत्त ॥

---

* सं० १०. ९७. १८ । म० ब्रा० २. ८. २ । गो० गृ० सू० ४. १०. ४ ।

अभिमन्त्रिते विष्टरे उपवेशनमाह — "या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु, ता मह्यमस्मिन्नासनेऽच्छिद्रं शर्म यच्छत"-इति *। वंशदलादिनिर्मितविष्टरगताः 'ओषधयः' पृथिवीमनु 'विष्ठिताः' विशेषेण स्थापिताः, ता मह्यमित्यादि पूर्ववत् (२८८पृ०) ॥

पुरोहितस्य पाद्यार्थं समानीतानामपामभिमन्त्रणमन्त्रं दर्शयति — "अस्मिन् राष्ट्रे श्रियमावेशयाम्यतो देवीः प्रति पश्याम्यापः"-इति †। हे आपः! पुरोहितोऽहमस्मिन् राष्ट्रे 'श्रियम् आवेशयामि' धनादिसम्पदं सम्पादयामि। अतः कारणाद् 'देवीः' द्योतनात्मिकाः युष्मान् प्रति पश्यामि ॥

ताभिरद्भिः पुरोहितस्य पादप्रक्षालनमन्त्रमाह— "दक्षिणं पादमवनेनिजेऽस्मिन् राष्ट्र इन्द्रियं दधामि; सव्यं पादमवनेनिजेऽस्मिन् राष्ट्र इन्द्रियं वर्द्धयामि; पूर्वमन्यमपरमन्यं पादाववनेनिजे देवा राष्ट्रस्य गुप्त्या अभयस्यावरुद्ध्यै"-इति ‡। मदीयं दक्षिणं पादम् 'अवनेनिजे' प्रक्षालयामि। तेन अस्मिन् राष्ट्रे प्राणिनामिन्द्रियपाटवहेतुं धनं सम्पादयामि। वामपादप्रक्षालनेन च तद् वर्द्धयामि। 'पूर्वं' प्रथमम् 'अन्यं' दक्षिणं पादं शोधयित्वा, 'अपरं' पश्चात् 'अन्यं' वामं पादं शोधयामि। हे देवाः! एवमुभौ पादौ प्रक्षालयामि, तच्च राष्ट्रस्य 'गुप्त्यै' रक्षार्थम्, 'अभयस्य' चौरादिभयराहित्यस्य 'अवरुद्ध्यै' सम्पादनाय भवति ॥

---

* ऋ० सं० १०.९७.१९। वा० सं० १२.९२ (एतत्पूर्वा ऋगपि तत्र ९२)। म० ब्रा० २.८.४। गो० गृ० ४.१०.५।

† म० ब्रा० २.८.५, ६। गो० गृ० ४.१०.७, ८।

‡ म० ब्रा० २.८.७, ८। गो० गृ० ४.१०.९, १०।

पादप्रक्षालनावशिष्टाना मपा मभिमन्त्रणमन्त्र माह— "आपः पादावनेजनीर्द्विषन्तं निर्दहन्तु मे"—इति । 'पादावनेजनीः' पादशुद्धिकरणभूता इमा आपो 'मे' मदीयं 'द्विषन्तं' शत्रुं निःशेषेण दहन्तु ॥ ४ (२७) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये
(चत्वारिंशाध्याये) चतुर्थः खण्डः ॥ ४ (२७) ॥

॥ अथ पञ्चमः खण्डः ॥

अथातो ब्रह्मणः परिमरो॑ यो ह वै ब्रह्मणः परिमरं वेद॑ पर्येनं॑ द्विषन्तो भ्रातृव्याः॑ परि सपत्ना॑ म्रियन्ते॑ ऽयं वै ब्रह्म योऽयं पवते॑ त एताः पञ्च देवताः॑ परिम्रियन्ते॑ विद्युद्वृष्टिश्चन्द्रमा आदित्योऽग्निर्विद्युद्वै विद्युत्॑ वृष्टि मनुप्रविशति॑ सान्तर्धीयते॑ तां॑ न निर्जानन्ति॑ यदा वै म्रियते ऽथान्तर्धीयते॑ ऽथैनं न निर्जानन्ति॑ स ब्रूयाद्विद्युतो मरणे॑ द्विषन्मे म्रियतां॑ सो ऽन्तर्धीयतां॑ तं मा निर्ज्ञासिषुरिति॑ क्षिप्रं हैवैनं न निर्जानन्ति॑ वृष्टिर्वै वृष्ट्वा चन्द्रमस मनुप्रविशति॑ सान्तर्धीयते॑ तां न निर्जानन्ति॑ यदा वै म्रियते ऽथा-

न्तर्धीयतेऽथैनं न निर्जानन्ति स ब्रूयाद् वृष्टेर्मरणे द्विषन् मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति क्षिप्रं हैवैनं न निर्जानन्ति चन्द्रमा वा अमावास्यायामादित्य मनुप्रविशति सोऽन्तर्धीयते तं न निर्जानन्ति यदा वै म्रियतेऽथान्तर्धीयतेऽथैनं न निर्जानन्ति स ब्रूयाच्चन्द्रमसो मरणे द्विषन्मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति क्षिप्रं हैवैनं न निर्जानन्त्यादित्यो वा अस्तं यन्नग्नि मनुप्रविशति सोऽन्तर्धीयते तं न निर्जानन्ति यदा वै म्रियतेऽथान्तर्धीयतेऽथैनं न निर्जानन्ति स ब्रूयादादित्यस्य मरणे द्विषन्मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति क्षिप्रं हैवैनं न निर्जानन्त्यग्निर्वा उद्वान् वायु मनुप्रविशति सोऽन्तर्धीयते तं न निर्जानन्ति यदा वै म्रियतेऽथान्तर्धीयतेऽथैनं न निर्जानन्ति स ब्रूयादग्नेर्मरणे द्विषन्मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति क्षिप्रं हैवैनं न निर्जानन्ति ता वा एता देवता अत एव पुनर्जायन्ते वायोरग्निर्जायते प्राणाद्धि बलान् मथ्यमानोऽधिजायते तं दृष्ट्वा ब्रूयादग्निर्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघात्वित्यतो हैव पराङ् प्रजिघात्यग्नेर्वा

आदित्यो जायते तं दृष्ट्वा ब्रूयादादित्यो जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघात्वित्यतो हैव पराङ् प्रजिघात्यादित्याद्वै चन्द्रमा जायते तं दृष्ट्वा ब्रूयाच्चन्द्रमा जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघात्वित्यतो हैव पराङ् प्रजिघाति चन्द्रमसो वै वृष्टिर्जायते तां दृष्ट्वा ब्रूयाद् वृष्टिर्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघात्वित्यतो हैव पराङ् प्रजिघाति वृष्टेर्वै विद्युज्जायते तां दृष्ट्वा ब्रूयाद्विद्युज्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघात्वित्यतो हैव पराङ् प्रजिघाति * स एष ब्रह्मणः परिमरस्तं मेतं ब्रह्मणः परिमरं मैत्रेयः कौषारवः सुत्वने कैरिशये भार्गायणाय राज्ञे प्रोवाच तं ह पञ्च राजानः परिमम्रुस्ततः सुत्वा महज्जगाम तस्य व्रतं न द्विषतः पूर्व उपविशेद् यदि तिष्ठन्तं मन्येत तिष्ठेतैव न द्विषतः पूर्वः संविशेद् यद्यासीनं मन्येतासीतैव न द्विषतः पूर्वः प्रस्वप्याद् यदि जाग्रतं मन्येत जाग्रियादेवाऽपि ह यद्यस्याश्ममूर्धा द्विषन् भवति क्षिप्रं हैवैनं स्तृणुते-स्तृणुते ॥ ६ (२८) ॥

॥ इत्यैतरेयब्राह्मणेऽष्टमपञ्चिकायां पञ्चमोध्यायः ॥ ५ ॥

---

* "प्रजिघ्यत्वित्यतो०—० प्रजिघ्यति" क। एवं पूर्वत्र चैव सर्वत्र।

अथोक्तपुरोहितसहितस्य शत्रुक्षयार्थं कञ्चित् प्रयोग माह — "अथातो ब्रह्मणः परिमरो ; यो ह वै ब्रह्मणः परिमरं वेद, पर्येनं द्विषन्तो भ्रातृव्याः परि सपत्ना म्रियन्ते"—इति । 'अथ' पौरोहित्यविधानानन्तरम् , यतः पुरोहितेन सम्पाद्यः शत्रुक्षयो ऽपेक्षितः , 'अतः' कारणाद् 'ब्रह्मणः परिमरः' एतन्नामकः कर्मविशेषः, अभिधीयत इति शेषः । ब्रह्मशब्देनात्र वायुर्विवक्षितः* ; "अयं वै ब्रह्म, योऽयं पवते"—इति वक्ष्यमाणत्वात् (१४पं०) । तस्य वायोः परितो विद्युदादीनां मरणप्रकारः 'परिमरः'—इत्युच्यते † । तद्भावनारूपस्य कर्मविशेषस्य तदेव नामधेयम् । 'यः' पुमान् ब्राह्मणः परिमरं 'वेद' मनसा भावयति , 'एनं परि' एतस्य परितो ऽवस्थितासु सर्वासु दिक्षु , इदानीम् एनं 'द्विषन्तः' द्वेषं कुर्वन्तः शत्रवो म्रियन्ते ; ज्ञात्या शत्रवः 'सपत्नाः', तेऽपि परितो म्रियन्ते ‡ ; तस्मादेतद् वेदनं सम्पादनीयम् ॥

वेद्यस्वरूप माह— "अयं वै ब्रह्म , यो ऽयं पवते , त मेताः

---

* "तद् ब्रह्मणः परिमर इत्युपासीत"—इति तै० आ० ९. १०. ४ । "ब्रह्मणः परिमरः । परिम्रियन्ते ऽस्मिन् पञ्च देवता विद्युद्वृष्टिश्चन्द्रमा आदित्यो ऽग्निरित्येताः ; अतो वायुः परिमरः , ग्रन्थान्तरप्रसिद्धेः (ऐ० ब्रा० ८. ५. ५.) । स एष एवायं वायुराकाशेनानन्य इत्याकाशो ब्रह्मणः परिमरः , त माकाशं वाय्वात्मानं ब्रह्मणः परिमर इत्युपासीत"—इति तत्र शां० भा० ।

† "परिमरौ उभयतो मरणयुक्तौ ; यस्य पशोः अग्रजोऽपि मृतः , अनुजोऽपि मृतः , तादृशौ"—इति तै० सं० ५. ६. २१. सा० भा० ।

‡ "पर्येणं म्रियन्ते द्विषन्तः सपत्नाः परि येऽप्रिया भ्रातृव्याः"—इति तै० आ० ९. १०. ४ । "परि एन मेवंविदं प्रतिस्पर्द्धिनो द्विषन्तोऽद्विषन्तोऽपि सपत्ना यतो भवन्ति, अतो विशिष्यन्ते द्विषन्तः सपत्ना इति । य एनं द्विषन्तः सपत्नाः , ते परिम्रियन्ते प्राणान् जहति । किञ्च ये चाप्रिया अस्य भ्रातृव्याः अद्विषन्तोऽपि , ते च परिम्रियन्ते" —इति तत्र शां० भा० ।

पञ्च देवताः परिम्रियन्ते,— विद्युद् वृष्टिश्चन्द्रमा आदित्योऽग्निः” -इति । यः ‘अयं’ वायुः ‘पवते’ अन्तरिक्षे सञ्चरति, अय मेव ब्रह्मशब्देन विवक्षितः । ‘एताः’ विद्युदादयः पञ्च देवताः ‘तं’ वायुं ‘परिम्रियन्ते’ तस्य परितो विनाशं गच्छन्ति । तदेतदनुसन्धेयस्वरूपम् ॥

तत्रादौ विद्युतो मृतिं प्रतिपादयति— “विद्युद्वै विद्युत्य वृष्टि मनुप्रविशति, सान्तर्धीयते, तां न निर्जानन्ति”-इति । येयं विद्युदस्ति, सा ‘विद्युत्य’ प्रकाशं कृत्वा, पश्चाद् वृष्टि मनुप्रविशति ; अत एव सा ‘अन्तर्धीयते’ अस्माभिर्न दृश्यते । ‘तां’ वृष्टौ प्रविष्टां विद्युतं क्व गता, कुत्र स्थिता ? इति मनुष्या निःशेषेण न जानन्ति ॥

तत्र दृष्टान्त माह — “यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति”-इति । लोके कश्चित् पुरुषो यस्मिन् क्षणे म्रियते, तस्मिन्नेव क्षणे अन्यैर्न दृश्यते,, ततो जना विचार्यापि क्व गतः कुत्रावस्थित इति ‘एनं’ पुरुषं मृतं ‘न निर्जानन्ति’ ; यद्यपि कुणपं पश्यन्ति, तथापि जीवात्मानं न जानन्त्येव । तथैव विद्युद्विनाश इति द्रष्टव्यम् ॥

यथोक्तध्यानवतो जप्यं मन्त्र* माह— “स ब्रूयाद्विद्युतो मरणे द्विषन् मे म्रियतां, सोऽन्तर्धीयतां, तं मा निर्ज्ञासिषुरिति”-इति । विद्युतो मरणे सत्युपासको द्विषदित्यादिकं मन्त्रं ब्रूयात् । तस्याय मर्थः— इयं विद्युदिव मदीयः शत्रुः म्रियताम्, स पुनः केनापि न दृश्यताम्, अतो विचार्यापि क्व गतः, क्वास्ते ? इति ‘तं’ शत्रुं तदीया बन्धवो निःशेषेण मा जानन्त्विति ॥

---

* “जपमन्त्र” ज ।

जपफलं दर्शयति— "क्षिप्रं हैवैनं न निर्जानन्ति"-इति । शीघ्र मेव मृत मेनं शवं तदीया बन्धवो नैव जानन्ति ॥

विद्युत इव वृष्टेर्विनाशं दर्शयति— "वृष्टिर्वै वृष्ट्वा चन्द्रमस मनुप्रविशति, सान्तर्धीयते, तां न निर्जानन्ति ; यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति , स ब्रूयाद् वृष्टेर्मरणे द्विषन् मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति ; क्षिप्रं हैवैनं न निर्जानन्ति"-इति । येयं वृष्टिरस्ति, सेयं 'वृष्ट्वा' भूमौ जलं पातयित्वा, स्वय माप्यमण्डलरूपं चन्द्रमस मनुप्रविशति । अन्यत् पूर्ववद् योज्यम् ॥

चन्द्रमसो विनाशं दर्शयति— "चन्द्रमा वा अमावास्याया मादित्य मनुप्रविशति, सोऽन्तर्धीयते, तं न निर्जानन्ति; यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति, स ब्रूयाच्चन्द्रमसो मरणे द्विषन् मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति ; क्षिप्रं हैवैनं न निर्जानन्ति"-इति । अयं चन्द्रमाः 'अमावास्यायां' तिथौ साकल्येन आदित्य मनुप्रविशति । अन्यत् पूर्ववत् ॥

आदित्यस्य विनाशं दर्शयति— "आदित्यो वा अस्तं यन्नग्नि मनुप्रविशति , सोऽन्तर्धीयते, तं न निर्जानन्ति ; यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति, स ब्रूयादादित्यस्य मरणे द्विषन् मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति ; क्षिप्रं हैवैनं न निर्जानन्ति"-इति । आदित्यो यदास्त मेति, तदानीं मग्नि मनुप्रविशति । तदेतत् तैत्तिरीयैः समाम्नातम्— "अग्निं वावादित्यः सायं प्रविशति, तस्मादग्निर्दूरान्नक्तं ददृशे ; उभे हि तेजसी सम्पद्येते"-इति (ब्रा० ८. १. २. *) अन्यत् पूर्ववत् ॥

---

* "उद्यन्तं वावादित्य मग्निरनुसमारोहति , तस्माद्धूम एवाग्नेर्दिवा ददृशे"-इति तत्परांशः ।

अग्नेर्विनाशं दर्शयति— "अग्निर्वा उद्वान् वायु मनुप्रविशति, सोऽन्तर्धीयते, तं न निर्जानन्ति ; यदा वै म्रियते ऽथान्तर्धीयते ऽथैनं न निर्जानन्ति, स ब्रूयादग्नेर्मरणे द्विषन् मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति ; क्षिप्रं हैवैनं न निर्जानन्ति"-इति। 'उद्वान्' अग्नेरुपशमः, तं प्राप्नुवन्नग्निर्वायु मनुप्रविशति ; वायुबाहुल्ये दीपविनाशदर्शनात् । अन्यत् पूर्ववत् ॥

वायोः परितो म्रियमाणानां देवतानां पुनर्वायोरेव जन्म दर्शयति— "ता वा एता देवता अत एव पुनर्जायन्ते"-इति । 'वायोः' जगत्कारणभूतसूत्रात्मरूपत्वात् जगदेकदेशानां विद्युदादीनां जन्मविनाशौ वाय्वधीनौ ॥

पूर्वं विद्युदादीना मग्न्यन्तानां क्रमेण विनाशो दर्शितः ; इदानी मग्न्यादीनां विद्युदन्तानां क्रमेण उत्पत्तिं विवक्षुरग्नेरुत्पत्तिं दर्शयति— "वायोरग्निर्जायते ; प्राणाद्धि बलान्मथ्यमानो ऽधिजायते ; तं दृष्ट्वा ब्रूयादग्निर्जायतां मा मे द्विषन् जन्यत एव पराङ् प्रजिघ्यत्वित्यतो हैव पराङ् प्रजिघ्यति"-इति । योऽय मग्निः, सोऽयं वायोर्जायते । कथ मेतदिति, तदुच्यते — 'प्राणाद्' बलात् प्राणवायुसम्बन्धिशक्तिवशान्मथ्यमानोऽय मग्निः अधिकत्वेन जायते* । 'तं' जायमान मग्निं दृष्ट्वा सोऽय मग्न्यादिजन्मध्याता अग्निरित्यादिकं मन्त्रं जपेत् । अथ मग्निर्वायोः सकाशात् सुखेन जायतां, 'मे द्विषन्' मदीयः शत्रुः 'मा जनि' मोत्पद्यताम् । अत एव मन्त्रः 'पराङ् प्रजिघ्यतु' विमुखो भूत्वा प्रकर्षेण गच्छतु । 'इति' एतस्मिन् मन्त्रे जपिते सति 'अतः' जपितुः सकाशात् शत्रुः विमुखो भूत्वा दूरे गच्छति ॥

---

* "'शमीगर्भादग्निं' मथ्यते"-इति तै॰ आ॰ १.१.९.१ द्रष्टव्यम् ।

आदित्यस्योत्पत्तिं दर्शयति — अग्नेर्वा आदित्यो जायते, तं दृष्ट्वा ब्रूयादादित्यो जायतां मा [illegible] पराङ् प्रजिघ्यलित्यतो [illegible] इति। [illegible] प्रविष्ट आदित्यः [illegible]। [illegible] आदित्योऽस्तमितः, सूर्योऽपि [illegible]।

चन्द्रमस उत्पत्तिं दर्शयति— आदित्याद्वै चन्द्रमा जायते, तं दृष्ट्वा ब्रूयाच्चन्द्रमा [illegible] प्रतिज्वलितमतो [illegible]। [illegible] आदित्ये प्रविष्टश्चन्द्रमा [illegible] जायते। [illegible]।

[illegible] दर्शयति— [illegible], तं दृष्ट्वा ब्रूयाद् [illegible] पति-

---

* २९५पृष्ठगता टीप्पनी [illegible]

† "अयं सोमो [illegible] रश्मिश्चन्द्रमसं प्रति [illegible] 'सुषुम्णः सूर्यरश्मिश्चन्द्रमा [illegible] 'अत्राह गोरमन्वत'—इति [illegible]

‡ "पर्जन्याद्वै [illegible] चन्द्रमसः रसानुप्रदानम् [illegible] नम् निरु० ११. १. ५, तै० [illegible] ७३. १। "सौम्या आपः" [illegible] ([illegible]) [illegible] सूर्यस्यैव मुख्यं [illegible]। [illegible] नयन्ति, यदा खलु वा [illegible] सं० २. ४. १०. स्फुटं दृष्टव्यम्। [illegible] ([illegible]) "अथाविमां [illegible]"।

ष्यतो हैव पराङ् प्रजिघ्यति"-इति । जलमये चन्द्रमण्डले प्रविष्टा वृष्टिः कालान्तरे चन्द्राज्जायते । अन्यत् पूर्ववत् ॥

विद्युदुत्पत्तिं दर्शयति— "वृष्टेर्वै विद्युज्जायते *; तां हा[illegible] ब्रूयाद् विद्युज्जायतां मा मे द्विषन् जायत एव पराङ् प्रजि[illegible]ष्यतो हैव पराङ् प्रजिघ्यति"-इति । वृष्टौ प्रविष्टा विद्युत् पुनरपि कदाचित् प्रसन्नाया वृष्टेर्जायते । अन्यत् पूर्ववत् ॥

उक्त मर्थ मुपसंहरति— "स एष ब्रह्मणः परिमरः"-इति । यश्च वायुसम्बन्धिपरिमरनामकः कर्मविशेष उक्तः (२८३पृ०), 'स एषः' ध्यानरूपो जप्य इत्यर्थः † ॥

त मेतं कर्मविशेष मुदाहरणमुखेन प्रशंसति— "त मेतं ब्रह्मणः परिमरं मैत्रेयः कौषारवः सुत्वने कैरिशये भार्गायणाय राज्ञे प्रोवाच, तं ह पञ्च राजानः परि मम्रुस्ततः सुत्वा महज्जगाम"-इति । उक्तं कर्मविशेषं कुषारपुत्रो मैत्रेयनामको महर्षिः सुत्वनाम्ने राज्ञे प्रोवाच । कीदृशाय सुत्वने ? किरिशस्यापत्यं कैरिशिः तस्मै 'कैरिशये', भर्गस्य गोत्रापत्यं भार्गायणः तस्मै 'भार्गायणाय' । 'तं' सुत्वनामकं राजानं 'परितः' सर्वदिक्षु वर्त्तमानाः पञ्चसङ्ख्याका द्वेषिणो राजानो मृताः । ततः 'सुत्वा' राजा 'महत्' प्रौढं निस्सपत्नपदं जगाम ॥

---

* "विद्युद्वा अपां ज्योतिः"-इति शत० ब्रा० ७, ५, २, ४९ । "आपो वै वृष्टिः"-इति च तत्रैव ८, २, ३, ४ । "आदित् प्रत्नस्य रेतसो ज्योतिः पश्यन्ति"-इति सं० ८, २, ६, १० । निरुक्तेऽपि ४, २, ६ द्रष्टव्यम् । आदिदितिमन्त्रस्य ब्रह्मपरं व्याख्यान मपि शङ्करैवाभाषि छा० उप० ३, १७, ७ द्रष्टव्यम् ।

† "षड् वै ब्रह्मणो मारो ऽग्निर्वायुरापश्चन्द्रमा विद्युदादित्यः"-इत्यादिः (११, ४, ४, १) शतपथस्य ग्रन्थः समालोच्य इति शिवम् ॥

अथ जपविशेष मनुष्ठातुः व्रतविशेषं विधत्ते— "तस्य व्रतं, —न द्विषतः पूर्व उपविशेद्, यदि तिष्ठन्तं मन्येत तिष्ठेतैव ; न द्विषतः पूर्वः संविशेद्, यद्यासीनं मन्येतासीतैव ; न द्विषतः पूर्वः प्रस्वप्याद्, यदि जाग्रतं मन्येत जाग्रियादेव"–इति । 'तस्य' अनुष्ठातुः, एतद् व्रत मुच्यते । एतदीयो द्विषन् यदा उपविशति, ततः प्रागनु स्वयं नोपविशेत् ; किन्तु चारमुखेन तदीयं वृत्तां बुध्येत्, यदि द्विषन्तं तिष्ठन्तं मन्येत, तदानीं स्वय मपि तिष्ठेतैव ; तथा यदा द्विषन् शयनं करोति, ततः प्राक् स्वयं न 'संविशेत्' शयनं न कुर्यात् ; यदि द्विषन्त मुपविष्टं मन्येत, तदा स्वय मप्युपविशेदेव । तथा द्विषन् यदा निद्रां करोति, ततः प्राक् स्वयं न प्रस्वप्यात् ; किन्तु यदि द्विषन्तं जाग्रतं मन्येत, तदानीं स्वय मपि 'जाग्रियात्' प्रबुद्ध एवावतिष्ठेतैव ॥

एवं व्रत माचरतः फलं दर्शयति— "अपि ह यद्यस्याश्ममूर्द्धा द्विषन् भवति क्षिप्रं हैवैनं स्तृणुते–स्तृणुते"–इति । 'अस्य' राज्ञो ऽनुष्ठातुः 'द्विषन्' शत्रुः यदि 'अश्ममूर्द्धा' पाषाणसदृशशिरस्को भवति, अतिप्रबल इत्यर्थः ; तथाप्ययं कर्मविशेषः क्षिप्रमेव 'एनं' शत्रुं 'स्तृणुते' हिनस्ति । अभ्यासोऽध्यायसमाप्त्यर्थः ॥ ५ (२८) ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायां पञ्चमाध्याये
(चत्वारिंशाध्याये) पञ्चमः खण्डः ॥ ५ (२८) ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरमाधवाचार्यादेशतो
भगवत्सायणाचार्येण विरचिते माधवीये 'वेदार्थप्रकाश'-नामभाष्ये
ऐतरेयब्राह्मणस्य अष्टमपञ्चिकायाः पञ्चमोऽध्यायः ॥

अथात स्तुतशस्त्रयोश्चत्वारि(१) । अथातः पुनरभिषिक्तस्य सप्त(२) । अथात ऐन्द्रस्त्रीणि(३) । स य इच्छेन्नव(४) । अथातः पुरोधायाः पञ्च(५) ॥ ५ * ॥

अथात स्तुतशस्त्रयोः, पर्यू षु प्र धन्व, एतेन ह वा अष्टौ ॥ ५ † ॥

॥ इति अष्टमपञ्चिका समाप्ता ॥

॥ इति ऐतरेयं ब्राह्मणं सम्पूर्णम् ॥

---

* १६५, १८९, २२६, २६७, ३०४ पृ० (४—७—३—९—५ = २८ खं०) ।

† १६५, २८५, २५,७४० (१०—१०—[illegible] = २५ [illegible]) । १आ० ९९९९० । द्रष्टव्यम् ।

BOUND BY
BOSE & CO.
23, Girish Mukherjee Road
Bhowanipur, Calcutta - 25